केशवमिश्रविरचिता

तर्कभाषा

गणेशदीक्षितविरचितया तत्वप्रबोधिनीव्याख्यया संवलिता

संम्पादकः :- डा. प. ना. शास्त्री

Published with financial assistance from the Rashtriya Sanskrit Sansthan, New Delhi

राष्ट्रिय - संस्कृत - संस्थानस्य आर्थिकसाहाय्येन प्रकाशितोऽयं ग्रन्थः ।

केशवमिश्रविरचिता

तर्कभाषा

गणेशदीक्षितविरचितया

तत्वप्रबोधिनीव्याख्यया संवलिता

TARKA - BHĀŚĀ

OF

KESAVA MIŚRA

WITH THE COMMENTARY

TATVAPRABODHINI OF GANEŚADIKŚITA

EDITED BY

Dr. PARAMESHWARA NARAYANA SHASTRI

Published with financial assistance from the Rashtriya Sanskrit Sansthan, New Delhi

राष्ट्रिय – संस्कृत – संस्थानस्य आर्थिकसाहाय्येन प्रकाशितोऽयं ग्रन्थः

कृष्णप्रभाप्रकाशनम्
जोगभट्रकेरी – हासणगी – पो
ता – यल्लापुर. उत्तरकन्नड – जिल्ला
कर्णाटकराज्यम् – ५८१ ३४७ भारतम्

© प्रकाशकस्य एव

प्रतिकृतय : १०००

मूल्यम् – रू ५५–००

मुद्रणम् – सूर्य प्रिण्टर्स मञ्चिकेरी

Publisher : **KRISHNAPRABHA** PRAKASHAN
JOGABATRAKERI – HASANAGI P. O.
Tq : YELLAPUR, NORTH KANARA – Dist.
KARNATAKA – 581 347 INDIA

Price Rs. 55–00 First Print 1995.

PRINTED AT **SURYA PRINTERS, MANCHIKERI**

आमुखम्

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इत्याभाणकं प्रसिद्धम्। तत्र काणादशब्दः न्यायदर्शनस्याप्युपलक्षणम्। तत्र कणादमुनिप्रवर्तितं वैशेषिकदर्शनं प्रमेयप्रधानम्, गोतममुनिप्रवर्तितं न्यायदर्शनं प्रमाणप्रधानम्। उभयमप्येकतन्त्रत्वेन स्वीकृतं वात्स्यायनजयन्तभट्टादिभिः। इदं न्यायवैशेषिकदर्शनं त्रेधा विभक्तुं शक्यते सूत्रप्रस्थानं वादप्रस्थानं प्रकरणप्रस्थानमिति।
सूत्र - भाष्य - वार्तिकतद्व्याख्यानादिरूपा ग्रन्थाः सूत्रप्रस्थाने, वादरूपेण प्रवृत्ताः ग्रन्थाः वादप्रस्थाने, बालानां सुखबोधाय सूत्रवादप्रस्थानप्रतिपाद्यविषयसंग्राहकाः ग्रन्थाः प्रकरणप्रस्थाने चान्तर्भवन्ति।

तत्र केशवमिश्रविरचिता तर्कभाषा न्यायवैशेषिकदर्शनप्रकरणग्रन्थः आदौ सर्वैरप्यधीयते स्म प्रायः अधीयते च। अन्नम्भट्टविरचिततर्कसंग्रहप्रादुर्भावात् प्राक् तर्कभाषैव प्रकरणग्रन्थत्वेन अधीयते स्मेति प्रतीयते। इदानीं तु प्रायः सर्वं तर्कसंग्रहमधीयते। तर्कभाषा अधुना विरलप्रचारा। अथाप्यस्याः कोऽप्यतिशयः अस्ति। अत एव प्राक्तनैः विद्वद्भिः कृतानि अष्टात्रिंशत् (38) व्याख्यानानि अस्या उपलभ्यन्ते मुद्रितरूपेण।मुद्रितरूपेण च। तर्कसंग्रहोऽपि तर्कभाषाया एव संग्रह इति बहुषु स्थलेषु उभयोरपि ग्रन्थयोः पङ्क्तिसाम्यस्य दर्शनादुन्नीयते।

तर्कभाषाया अष्टात्रिंशद्व्याख्यानेषु गणेशदीक्षितविरचिता तत्त्वप्रबोधिनी अन्यतमा। इतः प्रागमुद्रितामिमां व्याख्यां हुतालकोशनिरीक्षणपूर्वकं पाठभेदादिप्रदर्शनेन सम्पाद्य डा. परमेश्वरनारायणशास्त्री अधुना प्रकाशयति इति महतः प्रमोदस्य स्थानम्। ग्रन्थ - ग्रन्थकार - विषयादिविवेचनपूर्वकं विलिखितः विस्तृतः उपोद्धातः विदुषां चेत आवर्जयेत् इत्यत्र न संदेहः।

न्यायशास्त्रे समुचितव्युत्पत्तिसम्पन्नः ग्रन्थस्यास्य प्रकाशकोऽयं परमेश्वरनारायणशास्त्रिमहोदयः आयुरारोग्यादिसम्पन्नः ज्ञानतः पदतश्च वर्धतामभिवर्धतामित्याशासे।

28-12-95 एन्. एस्. रामानुजताताचार्यः

पाण्डिचेरी तिरुपतिसंस्कृतविद्यापीठस्य कुलपतिचरः

कृतज्ञता:

- राष्ट्रियसंस्कृतसंस्थानस्य निदेशकमहोदयेभ्यः ।
- परमादरणीयेभ्यः एन्. एस्. रामानुजताताचार्यमहोदयेभ्यः ।
- ग्रन्थप्रकाशनप्रोत्साहकेभ्यः डा. किशोरनाथ झा महोदयेभ्यः ।
- प्रत्यक्षं परोक्षं सहकृतवद्भ्यः मित्रगणेभ्यः ।
- कलाकारेभ्यः पाटील्महोदयेभ्यः ।
- मुद्रकेभ्यः सूर्या प्रिण्टर्स - अभिजनेभ्यः
  कृतज्ञताः समर्प्यन्ते ।

मन्मतेरपाटवात्, मुद्रकदोषाद् वा यानि यान्यत्र स्खलितानि तानि सहृदयाः संशोध्य मामनुग्रहीष्यन्तीति मे विश्वासः ।

विदुषामनुचरः
प. ना. शास्त्री

तत्त्वप्रबोधिनीव्याख्यायाः विषयानुक्रमणिका

	विषयः	पृष्ठसंख्या
१.	मङ्गलाचरणम्	७७
२.	उपोद्घातः	७७-७८
३.	विषयप्रयोजननिरूपणम्	७८-८०
४.	न्यायशास्त्रस्य प्रयोजनम्	८०-८४
५.	त्रिविधा शास्त्रप्रवृतिः	८५
६.	उद्देश-लक्षण-परीक्षानिरूपणम	८५-८६
७.	प्रमाणनिरूपणम्	८६-८७
८.	प्रमाशब्दनिर्वचनम्	८७-८९
९.	कारणलक्षणम्	८९
१०.	कारणलक्षणम्	९०-९२
११.	कारणत्व-कार्यत्व-निर्वचनम्	९२-९३
१२.	व्यतिरेकघटितकारणलक्षणनिरूपणम	९३-९४
१३.	कारणप्रकारनिरूपणम्	९४-९५
१४.	अयुतसिद्धनिरूणम्	९५-९६
१५.	समवायिकारणलक्षणम्	९६-९८
१६.	द्रव्य-लक्षणम्	९८-१००
१७.	असमवायिकारणनिरूपणम्	१००-१०१
१८.	निमित्तकारणनिरूपणम्	१०१-१०३
१९.	प्रत्यक्षनिरूपणम्	१०३-१०५
२०.	इन्द्रियसंनिकर्षनिरूपणम्	१०५-१०८
२१.	अनुमाननिरूपणम्	१०८-१०९
२२.	लिङ्गपरामर्शस्य व्याप्तेः च निरूपणम्	१०९-११५

२३.	त्रिविधलिङ्गज्ञानम्	११५–११८
२४.	स्वार्थानुमान–परर्थानुमान निरूपणम्	११८–१२६
२५.	पक्ष–सपक्ष–विपक्षणां लक्षणमुदहरणं च	१२६–१२७
२६.	हेत्वाभासनिरूपणम्	१२७–१२९
२७.	असिद्धनिरूपणम्	१३०–१३१
२८.	आश्रयासिद्धनिरूपणम्	१३१–१३२
२९.	स्वरूपसिद्ध-व्याप्यत्वासिद्धनिरूपणम्	१३२–१३३
३०.	विरूद्धनिरूपणम्	१३३–१३४
३१.	अनैकान्तिकनिरूपणम्	१३५–१४१
३२.	प्रकरणसमनिरूपणम्	१४१–१४२
३३.	कालात्ययापदिष्टनिरूपणम्	१४२–१४७
३४.	उपमाननिरूपणम्	१४८–१५०
३५.	शब्दनिरूपणम्	१५०–१५६
३६.	अर्थापत्तिनिरूपणम्	१५७
३७.	अभावस्य पृथक्प्रामाण्यनिरूपणम्	१५७
३८.	अभावस्य इन्द्रियग्राह्यत्वे आक्षेपपरिहारौ.	१५८–१५९
३९.	प्रामाण्यनिरूपणम्	१५९–१६४
४०.	प्रमेयनिरूपणम्–प्रमेयभेदकथनम्	१६४–१६६
४१.	आत्मनिरूपणम्	१६६–१६९
४२.	शरीरलक्षणम्	१६९–१७१
४३.	इन्द्रियनिरूपणम्	१७१–१७२
४४.	अर्थनिरूपणम्	१७२–१७३
४५.	पृथ्वी-निरूपणम्	१७३–१७४
४६.	जलनिरूपणम्	१७४
४७.	तेजो-निरूपणम्	१७४–१७६
४८.	वायुनिरूपणम्	१७६–१७९

४९.	आकाशनिरूपणम्	१७९-१८१
५०.	कालनिरूपणम्	१८१-१८२
५१.	दिङ - निरूपणम्	१८२-१८५
५२.	आत्मनिरूपणम्	१८५
५३.	मनोनिरूपणम्	१८५-१८८
५४.	गुणनिरूपणम्	१८८-२२१
५५.	कर्मनिरूपणम्	२२१-२२५
५६.	सामान्यनिरूपणम्	२२५-२२८
५७.	विशेषनिरूपणम्	२२८-२२९
५८.	समवायनिरूपणम्	२२९-२४६
५९.	मोक्ष-तत्साधननिरूपणम्	२४६-२५५

संशोधनस्य उद्देश्यम्

न्यायवैशेषिकदर्शनप्रतिपाद्यविषयाणां निरूपकेषु प्रकरणग्रन्थेषु 'केशवमिश्रस्य' 'तर्कभाषा' श्रेष्ठः ग्रन्थः। तदनन्तर कालिकैः न्यायवैशेषिकतत्वनिष्णातैः अनेकाः तर्कभषाव्याख्याः विरचिताः। तर्कभाषायाः उपरि लिखितानां व्याख्यानानां परिगगनेनैव अस्य ग्रन्थस्य महत्वं ज्ञायते। समानन्त्रस्य न्याय वैशेषिकसम्प्रदायस्य समग्रपरिचयः तर्कभाषाध्ययनेन सिध्यति। अतः अयं ग्रन्थः अनेकविद्यालयेषु पठयग्रन्थरुपेण परिगणितः।

व्युत्पिपित्सूणां भिन्नरुचीनां बालानां कृते विविधाः व्याख्याः मूलग्रन्थस्याधिगमार्थं सहकुर्वन्ति। अतः गणेश (र) दीक्षित विरचितायाः मातृकारूपिण्याः तर्कभाषाव्याख्यायाः पाठसमीक्षात्मकसम्पादने उत्साहः समजनि।

सत्स्वपि अनेकेषु व्याख्यानेषु तत्वप्रबोधिन्याः महत्त्वमस्ति। संस्कृतप्रपञ्चे तत्रापि दर्शनक्षेत्रे प्रत्येकोऽपि समर्थः व्याख्याकारः स्वकीयं वैशिष्ट्यम्, अनितरसाधारणं निरूपणकौशलं प्रकटयति। एवं पूर्वकालिकैः व्याख्यातृभिः कृतव्याख्याविशेषाणामुपरि, समर्थेन व्याख्यात्रा समीक्षापूर्वकं खण्डन - मण्डनादिकं प्रदर्श्यते। एतद्विज्ञाय गणेशदीक्षितविरचितायाः तर्कभाषाव्याख्यायाः तत्वप्रबोधिन्याः पाठसमीक्षात्मक - सम्पादनरुप - संशोदधनकार्ये संलग्नं मे मनः। विशिष्य पठ्यग्रन्थभूतस्य प्रकरणग्रन्थस्यास्य 'तत्वप्रबोधिनी' व्याख्या न्यायवैशेषिक - दर्शनप्रविविक्षूणां कृते महदुपकारकम् इति प्रधानमुद्देश्यं प्रेरकं जातम्।

समादृता रीतिः

मैसूरस्थ – प्राच्य–विद्यासंशोधनालये द्वे मातृके (तेलगुलिप्यां) मद्रासस्थ अडयार ग्रन्थालये द्वे मातृके (तेलगुलिप्यां) मद्रास् – विश्वविद्यालयीय – मातृकाग्रन्थालये एका (ग्रन्थलिप्यां) इति आहत्य पञ्च सम्पूर्णमातृकाः उपलभ्यन्ते । तत्र तेलुगुलिपिमातृकाणां मध्ये नाधिकः पाठभेदः । प्रथमतः मैसूरस्थ–प्राच्य विद्यासंशोधनालये सुस्थितायाः मातृकायाः प्रतिलिपिः कृता । तत्रैव यत्र यत्र लुप्तः पाठः तत्र तत्र मातृकान्तरं परिशील्य सम्पूरिता प्रतिलिपिः । सममेव द्वयोः मातृकयोः परस्परं पाठभेदोऽपि परिशीलितः । ततः ग्रन्थलिप्यां स्थितया मद्रनगरीस्थ – मातृकाग्रन्थालयस्थया मातृकयां सह तुलनात्मकरूपेण पाठभेदः उल्लिखितः । पुनश्च तञ्जानगरीस्थे सरस्वतीमहल्–ग्रन्थालये देवनागरीलिप्यां स्थितया अपूर्णयाऽपि मातृकया सह तुलनात्मकरूपेण पाठभेदः सम्पादितः । चिन्नंभट्ट–विरचितया तर्कभाषाप्रकाशिका – व्याख्यया सह अस्याः तुलना 'स्थालीपुलाकन्यायेन' प्रदर्शिता । यद्यपि उपलभ्यमानाभिः सर्वाभिः व्याख्याभिः तत्वप्रबोधिन्याः तुलना कार्या इति मम मनीषा आसीत् किन्तु चिरकाल – बहुप्रयत्नसाध्यत्वात् सेयं मनीषा अत्र न पूरिता । अत्र विषयानुगुणं परिच्छेदविभागः, शीर्षकप्रदानं च यथोचितं सम्पादितम् । एवं व्याख्यायाम् उध्धृत वाक्यानां परिशोधनं उधृत ग्रन्थावलोकनपुरस्सरं यथाशक्ति सम्पादितम् ।

तर्कभाषा – चिन्नंभट्टविरचितया तर्कभाषाप्रकाशिकाव्याख्यया सहिता ।
Second Edition POONA B. O. R. I. 1979

दर्शनस्य सामान्यनिरूपणम्

किं नाम दर्शनम् ? "दृश्यते अनेन इति दर्शनम्" इति व्युत्पत्या यद्द्वारा बाह्येन्द्रियागम्यं परमतत्त्वम् आधिगम्यते तद् दर्शनम् इति ।

परमतत्त्वाधिगमार्थं मार्गप्रदर्शनं प्राधान्येन भारतीयदर्शनानां उद्देश्यम् । संक्षेपतः सुखप्राप्तिः दुःखनिवृत्तिः च दर्शनस्य प्रयोजनम् । तथाहि मनुस्मृतिः –

सम्यग्दर्शनसम्पन्नः
कर्मभिः न निबध्यते ।
दर्शनेन विहीनस्तु
संसारं प्रतिपद्यते ।। इति

भारतीयदर्शनेषु वेदप्रामाण्यं पुरस्कृत्य प्रवृत्तानि-दर्शनानि आस्तिकदर्शनानि तद्भिन्नानि नास्तिकदर्शनानीति भेदः प्रदर्शितः । तत्र आस्तिकदर्शनेषु न्यायवैशेषिकदर्शनं प्रधानं स्थानं भजते । विना न्यायवैशेषिकदर्शनज्ञानं दर्शनान्तरस्य तत्त्वाधिगमः कष्टसाध्य इति वर्ततेऽस्य महत्प्रयोजनम् ।

1. मनुस्मृतिः षष्ठोऽध्यायः श्लोकः 74

न्यायवैशेषिकदर्शननिरूपणम्

"प्रमाणैरर्थपरीक्षणं न्यायः"[1]

इति वात्स्यायनः।

मानवविचाराणां परिशोधनं संरक्षणं च न्यायदर्शनेन सिध्यति। यस्मिन् कस्मिन्नपि विषये तत्त्वं सयुक्तिकं प्रतिपादयितुं सिद्धान्तं स्थापयितुं च न्यायदर्शनपरिचयः विचारशीलं मानवम् उपकरोति। न्यायशास्त्रस्य सामान्यज्ञानं विना शास्त्रान्तरे प्रौढग्रन्थस्य अध्ययनं दुष्करमिति विदितचरम्। अत एवोच्यते-

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इति

न्यायशास्त्रं, न्यायविद्या, आन्वीक्षिकी इति न्यायदर्शनस्य नामान्तराणि। प्रत्यक्षदृष्टस्य श्रुतस्य च विषयस्य प्रमाणबलेन वैज्ञानिकरीत्या निष्कर्षः अत्र भवति। तथाहि - भाष्यकारो वात्स्यायनः विवृणोति - यथा

"प्रत्यक्षागमाभ्यां ईक्षितस्य अन्वीक्षणम् - अन्वीक्षा तया प्रवर्तत इति - आन्वीक्षिकी - न्यायविद्या न्यायशास्त्रम्"[2] इति

हेतुभिः पर्यवेक्षणात् हेतुविद्या हेतुशास्त्रम् इति वा, चर्चाप्रधानत्वात् वादविद्या तर्कशास्त्रम् इति वा नामानि श्रूयन्ते परन्तु अद्यत्वे प्रामाणिकहेतुबलात् वस्तुवीक्षणपरम् इदं दर्शनं न्यायशास्त्रम् इति नाम्ना प्रथते।

---

1. न्यायभाष्यम् - सूत्रम् - 9
2. न्यायभाष्यम् - 1 - 1 - 1.

न्यायशास्त्रास्य उल्लेखः

कौटिल्यस्य अर्थशास्त्रे आन्वीक्षिक्या उल्लेख एवं कृतोऽस्ति-

प्रदीपः सर्वविद्यानाम्
उपायः सर्वकर्मणाम् ।
चाश्रयः सर्वधर्माणाम्
शश्वदान्वीक्षिकी मता ।।

महाभारते काश्यपमहर्षेः आश्रमवर्णनावसरे न्यायाचार्याणाम् उल्लेखः कृतः –

"न्यायतत्त्वात्मविज्ञानसम्पन्नैः वेदपारगैः,
नानावाक्यसमाहारसमवायविशारदैः ।
विशेषकार्यविद्भिश्च मोक्षधर्मपरायणैः
स्थापनाक्षेपसिध्दान्तपरमार्थज्ञतां गतैः ।।"

काश्यपाश्रमे मिलिताः महर्षयः स्थापनाक्षेपसिध्दान्त–पारंगताः बभूवुः ।

तत्रैव सभापर्वणि 'नारदः' न्यायविदासीत् इत्युल्लेखः वर्तते ।

न्यायवित् धर्मतत्त्वज्ञः षडङ्गविदनुत्तमः
ऐक्य–संयोग–नानात्वसमवाय–विशारदः

---

1. कौटिल्यस्य अर्थशास्त्रम् – प्रथमाधिकरणम् प्रथमोऽध्यायः – अन्तिमः श्लोकः ।
2. महाभारते आदिपर्वणि ५० तमेऽध्याये ।

वक्ता प्रगल्भी मेधावी स्मृतिमान्नयवित् कविः
परापरविभागज्ञः प्रमाणकृतनिश्चयः
पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित्"

किन्तु नारदेन रचितः नकोऽपि ग्रन्थः उपलभ्यते। न्यायमञ्जरीकारः जयन्तभट्टः नारदवाक्यं समुध्दरति – यदाह नारदः –

सारस्तु व्यवहाराणाम्
प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादः
नरं स्वामुतरो भवेत्॥

न्यायसूत्रम् – न्यायशास्त्रप्रवर्तकः गोतमः–

न्यायसूत्रम् – व्यवस्थितरूपेण न्यायशास्त्रतत्त्वनिरूपकः समग्रः आदिमग्रन्थः, अक्षपादः गोतमो वा अस्य प्रणेता इति ज्ञायते। तथाहि –

"योऽक्षपादमृषिं न्यायः
प्रत्यभाद्वदतां वरम्।
तस्य वात्स्यायन इदम्
भाष्यजातमवर्णयत्॥"

एवं न्यायवार्तिकेऽपि –

---

1. माहाभारतम् – सभापर्वे – पञ्चमोऽध्यायः।
2. न्यायञ्जरी – परिच्छेदः – 12.
3. न्यायभाष्यस्य प्रारम्भः।

"यदक्षपादः प्रवरो मुनीनाम्
शमाय शास्त्रं जगतो जगाद ।
कुतार्किकज्ञाननिवृत्तिहेतोः
करिष्यते तत्र मया निबन्धः" ॥

एवं स्कन्दपुराणे –

कणादेन तु सम्प्रोक्तम्
शास्त्रं वैशेषिकं मतम् ।
गोतमेन तथा न्यायं
सांख्यं तु कपिलेन वै" ॥

तथैवं न्यायमञ्जर्याम् –

"अक्षपादप्रणीतो हि
विततो न्यायपादपः ।
सान्द्रामृतरसस्यन्द –
फलसन्दर्भनिर्भरः" ॥

इत्यादीनि वचांसि उपलभ्यन्ते । किमेको गोतमः अनेको वा ? मेधातिथिः गोतमः च एक एव अथवा भिन्नौ ? इत्यादयः प्रश्नाः अद्यापि अलब्धोत्तराः सन्ति । अत्र न्यायमञ्जरीकारः जयन्तभट्टः स्वाशयम् अभिव्यनक्ति यथा –

"आदिसर्गात् प्रभृति वेदवत् इमाः विद्याः प्रवृत्ताः संक्षेपविस्तारविवक्षयातु तान् तान् तत्र कर्तॄन् आचक्षते" इति ।

---

1. न्यायवार्तिकस्य प्रारम्भः ।
2. स्कान्दपुराणम् –
3, न्यायमञ्जरी – प्रथमपरिच्छेदः ।

वैशेषिकसूत्रप्रणेता कणादमहर्षिः

वैशेषिकदर्शनं न्यायदर्शनादपि प्राचीनमिति अभिप्रयन्ति। कणभुक्, कणभक्षः, औलूक्यः इत्यपि कणादस्य नामानि श्रूयन्ते। 'उलूक'रूपेण प्रत्यक्षीभूतस्य ईश्वरस्य प्रसादेन बोधितपदार्थानां निरूपणमत्र कणादेन कृतमिति "औलूक्यदर्शनम्" इति प्रथा प्रचलति। विशेषाख्यस्य विलक्षणपदार्थस्य अङ्गीकारेण वैशेषिकदर्शनमिति प्रख्यातिरिति वदन्ति विपश्चितः।

न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वम्

यद्यपि न्याय – वैशेषिकदर्शनयोः उद्भवविकासौ स्वातन्त्र्येण सम्पन्नौ तथापि द्वयोः परस्परं घनिष्ठः सम्बन्धः दृश्यतेतराम्। न्यायसूत्रेषु वैशेषिकसूत्रेषु कानिचित्सूत्राणि समानानि दृश्यन्ते। अतः "न्यायवैशेषिकम्" इति समानतन्त्रेण प्रतीतिः।

अत्र सतीशचन्द्रविद्याभूषणाः एवमभिप्रयन्ति –

1. न्यायमञ्जरी.

"The Vaisesika Philosophy rendered considerable help to the development of Nyaya and many of the Sutras of the Nyaya philosophy presuppose those of the Vaisesika. In fact the Vaisesika and Nyaya philosophies of the Anacient and Medieval periods supplemented each other in respect of their Subjects and styles. Hence the two philosophies were called Samana Tantra or alied systems. At last the Vaisesika and Nyaya philosophies actually coalesced. Six or Seven categories of the Vaisesika were entirely absorbed in the treatise on Nyaya philosophy and the Nyaya categories of pramana in its developed form were actually absorbed in the treatises on Vaisesika philosophy."

वस्तुतत्त्वविश्लेषके न्यायवैशेषिकदर्शने, निर्जीवजगतः आत्मनश्च वस्तुसत्तां मन्वाते। पृथिव्यादिपदार्थानां परमाणुरूपं कार्यरूपं च अङ्गीकुरुतः। द्व्यणुकादिक्रमेण कार्यद्रव्याणाम् उत्पत्ति विनाशं च विवृणुतः। धर्म - धर्मिणोः भेदे, असत्कार्यवादे, शरीरादिभिन्नस्य आत्मनः परममहत्परिमाणवत्त्वे एवमनेकविषयेषु सहमते स्तः।

परस्परं भेदा अपि सन्ति

वैशेषिकदर्शनानुसारं मुक्तिः द्रव्यादिपदार्थानां साधर्म्य-वैधर्म्यतत्त्वज्ञानात्

---

1. A History of Indian logic Ede. 1971 part. III Section - I chapter II, Page No. 373.

1. वैशेषिकसूत्रम् - धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसवायानां पदार्थानां साधर्म्य - वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ।

न्याये तु प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षः। प्रत्यक्षमनुमानञ्च प्रमाणद्वयमिति वैशेषिकाः; नैयायिकास्तु उपमानं शब्दश्चेति प्रमाणचतुष्टयमङ्गीकुर्वन्ति। वैशेषिकदर्शने समवायस्य अनुमानेन ग्रहणं चेत्; न्यायदर्शने प्रत्यक्षेण तद्ग्रहणम्। पाकजोत्पत्तौ वैशेषिकाः पीलुपाकवादिनः; नैयायिकास्तु पिठरपाकवादिनः। वैशेषिकानां मते त्रिरूपस्यैव लिङ्गस्य साध्यगमकतौपायिकत्वं; नैयायिकानां सिध्दान्ते पञ्चरूपोपपन्नं लिङ्गमेव साध्यगमकतौपयिकम् इति अभ्युपगम्यते।

एवं सत्स्वपि भेदेषु मूलभूतसिद्धान्तसाम्येन समानतन्त्रेण व्यवहारः। 'न्यायदर्शनबिन्दौ' श्लोकरूपेणास्य संग्रहः कृतः। यथा –

"वैशेषिकन्यायनयौ प्रसिद्धौ
तौ भूरिसाम्येन समानतन्त्रे।
बहुत्र वैषम्यवशात् तयोश्च
सिध्दा पृथग् दर्शनता समाजे"।

---

2. न्यायसूत्रम् – प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।
3. कारिकावल्याम् – "शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते। अनुमानगतार्थत्वादिति वैशेषिकं मतम्॥"
4. न्यायसूत्रम् – "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"।
5. मुक्तावली – "वैशेषिकमते तु समवायो न प्रत्यक्षः"।
6, कारिकावली – "प्रत्यक्षं समवायस्य विशेषणतया भवेत्"।
7. त्रिरूपाणि – "पक्षसत्त्वं, सपक्षसत्त्वं विपक्षासत्त्वम्"।
8. पञ्चरूपाणि – "पक्षसत्त्व – सपक्षसत्त्व – विपक्षासत्त्व – अबाधितत्त्व – असत्प्रतिपक्षितत्त्वानि"।
9. वाराणसीयसंस्कृतविश्वविद्यालयेन प्रकाशितः उपन्यासंग्रहात्मकः ग्रन्थः।

प्रकरणग्रन्था: तत्र 'तर्कभाषाया:' स्थानम्

एकादशशताब्दे बहुसंख्याकाः विद्वांसः टीकापरम्परां विहाय स्वतन्त्रग्रन्थरचनायां समुद्यताः, अतस्तदनन्तरं प्रकरण-ग्रन्थानां रचनाः प्राचुर्येण दृश्यन्ते । शास्त्रीयप्रकरणग्रन्थेषु शास्त्र-प्रतिपाद्यानां कतिपयविषयाणां व्यवस्थितरूपेण सरलया शैल्या विवरणं बहुमन्यते । तत्स्वरूपं एवमाचक्षते विचक्षणाः –

"शास्त्रैकदेशसम्बद्धम्,
शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम,
ग्रन्थभेदं विपश्चितः" ।।

न्यायशास्त्रे अनेके प्रकरणग्रन्थाः विरचिताः । तत्र कतिपयप्रक-रणग्रन्थेषु प्रधानरूपेण प्रमाणपदार्थस्य, प्रमेयादीनां गौणरूपेण निरूपणं वर्तते ।

उदा – 'भासर्वज्ञ'स्य "न्यायसारः" ।

कतिपयप्रकरणग्रन्थेषु न्यायदर्शनप्रतिपादित–षोडशपदार्थेषु, वैशेषिकदर्शनप्रतिपादितपदार्थानाम् अन्तर्भावः दृश्यते –

उदा – वरदराजस्य "तार्किकरक्षा" "केशवमिश्रस्य" "तर्कभाषा"

केषुचित् प्रकरणग्रन्थेषु न्यायदर्शनप्रतिपादितपदार्थानां वैशेषिकदर्शनप्रतिपादितपदार्थेषु अन्तर्भावः विद्यते । उदा – वल्लभाचार्यस्य "न्यायलीलावती"

अन्नंभट्टस्य "तर्कसंग्रहः" विश्वनाथन्यायपञ्चाननस्य "कारिकावली" जगदीशतर्कालङ्कारस्य "तर्कामृतम्" लौगाक्षिभास्करस्य "तर्ककौमुदी"

कतिपयप्रकरणग्रन्थेषु न्यायदर्शनस्य वैशेषिकदर्शनस्य च कतिपयविषयाणां तत्तद्दर्शनानुसारं पृथक् पृथक् निरूपणं समाद्रियते ।

उदा – जयन्तभट्टस्य, न्यायमञ्जरी" माधवाचार्यस्य 'सर्वदर्शनसंग्रहः'

केशवमिश्रस्य तर्कभाषा

न्याय – वैशेषिकसम्प्रदायस्य तत्त्वनिरूपणपरेऽस्मिन् प्रकरणग्रन्थे न्यायदर्शनानुसारं पदार्थविभागं पुरस्कृत्य वैशेषिकाङ्गीकृतपदार्थानां प्रमेये तत्रापि 'अर्थे' अन्तर्भावपरतया निरूपणं क्रियते । अत्र प्रधानतया न्यायसम्प्रदायानुसारेण षोडशपदार्थानां निरूपणं कृतं तथापि वैशेषिकसम्प्रदायानुसारं द्रव्यादिसप्तपदार्थानां, पृथिव्यादिनवद्रव्याणां, रूपादिचतुर्विंशतिगुणानां च सविशदं

निरूपणं कृतं वर्तते, एवमेव वैशेषिकसम्प्रदायस्य या द्वित्वोत्पत्तिप्रक्रिया, पाकजोत्पत्तिः, विभागजविभागः एतेषामपि निरूपणं वर्तते। तर्कभाषायां प्रशस्तपादोक्तरीत्या द्व्यणुकादेः उत्पत्तिविनाशक्रमः प्रदर्शितः। आत्मादीनां विवेचनम् अनेकवारं कृतम्। एतादृशपुनरुक्तिविषये परिहारोऽपि ग्रन्थकारेणैव ग्रन्थस्यान्ते प्रदर्शितः यथा – "इह अत्यन्तमुपयुक्तानां भूयोभूयः प्रतिपादनम्। यदनतिप्रयोजनं तदलक्षणमदोषाय। एतावतैव बालव्युत्पत्तिसिद्धेः"।

अत्र दर्शनान्तराणां समीक्षापि सम्पादिता। सान्दर्भिकरूपेण मीमांसा - वेदान्त – बौद्धादिमतानां निराकरणपूर्वकं तुलनात्मकरूपेण स्वमतप्रतिपादनं कृतम्। तर्कभाषाया उपरि रचिता व्याख्याः अस्य ग्रन्थस्य प्रसिद्धिम् उद्घोषयन्ति।

केशवमिश्रस्य काल - देशौ

तर्कभाषाप्रकाशनामकव्याख्यायां गोवर्धनमिश्रः स्वगुरुं स्मरति। "विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः। तर्कानुभाषां तनुते विविच्य गुरुनिर्मिताम्"।

किरणावलीप्रकाशनामकव्याख्याकारः पद्मनाभमिश्रः केशवमिश्रस्य भ्राता, यः वर्धमानोपाध्यायस्य न्यूनाधिकं समकालीनः

थस्य वर्धमानोपाध्यायस्य कालः 1250 A. D. इति निश्चितः। अतः केशवमिश्रस्य कालः न्यूनाधिकं 1275 A. D. इति अभिप्रयन्ति। अयं मिथिलाभिजनः इति ज्ञायते।

"उपदिष्टा गुरुचरणैः अस्पष्टा वर्धमानेन।
किरणावल्यामर्थाः तन्यन्ते पद्मनाभेन" ॥

एवं गोवर्धनमिश्रस्य मङ्गलश्लोकानुसारं आचार्य-विश्वेश्वराणाम् आशयं परिशीलयद्भिः डा. श्रीनिवासशास्त्रिभिः बलभद्रः गोवर्धनमिश्रस्य पिता। पद्मनाभमिश्रः गोवर्धनस्य भ्राता आसीत् इति सूचितम्।

"श्रीविश्वनाथानुज पद्मनाभानुजो
गरीयान् बलभद्रशर्मा।
तनोति तर्कानधिगम्य सर्वान्
श्रीपद्मनाभाद् विदुषो विनोदम्" ॥

पुष्पिका – "इति श्री जगद्गुरुमिश्रबलभद्रात्मज–विजय-श्रीगर्भसम्भवविश्वनाथानुजपद्मनाभानुजमिश्रगोवर्धनविरचित भावप्रकाशः समाप्तः"

अन्यैश्च प्रमाणैः केशवमिश्रस्य कालः एकादश – चतुर्दश शतकयोः मध्ये स्यादिति अभिप्रयन्ति।

---

1. पद्मनाभमिश्रस्य किरणावलीप्रकाशव्याख्या [काशीसंस्कृतग्रन्थमाला – तर्कभाषा 1982 – p 61.]
2. तर्कभाषाभूमिका – साहित्यभण्डार – मेरठ – p 29.

तर्कभाषाव्याख्याः, तत्र तत्त्वप्रबोधिन्याः स्थानम्

व्याख्यानाम	कर्तृनाम
१. तर्कभाषाप्रकाशिका	मेघनाथाचार्यशिष्यः ।
२. " "	अखण्डानन्द यतिः ।
३. " "	कौण्डिण्यः ।
४. " "	चिन्नंभट्टः (चिन्नुभट्टः) (मुद्रिता)
1 (तर्कभाषाभावः	रेपल्ले वेंकटः)
५. " "	बलभद्रमिश्रः ।
६. तर्कभाषाप्रकाशः	गोवर्धनमिश्रः (मुद्रितः) ।
७. " "	रङ्गनाथः ।
८. " "	रामभद्रतीर्थः ।
९. " "	वर्धमानः ।
१०. तर्कभाषातत्त्वबोधिनी	गङ्गाधरभट्टः ।
११. " "	विश्वनाथभट्टारकः ।
१२. तर्कभाषातात्पर्यम्	श्रीरामः ।
१३. तर्कभाषाभावप्रकाशिका (उज्वला)	गोपिनाथठक्कुरः ।
१४. तर्कभाषासारमञ्जरी	माधवभट्टः ।
१५. तर्कभाषाटीका	मुरारिभट्टः ।
१६. तर्कभाषाटीका	चिन्नंभट्टः ।
१७. तर्कभाषाप्रदीपः	विश्वकर्मन् (मुद्रितः)
९८. तर्कभाषाप्रसादिनी	वागीशभट्टः ।

1. चिन्नंभट्टस्य तर्कभाषाप्रकाशिकायाः उपव्याख्या ।

१९. तर्कभाषान्यायसंग्रहः	रामलिङ्गः ।
२०. तर्कभाषावादरत्नावली	रामाशास्त्री ।
२१. तर्कभाषावादकौस्तुभः	रामः ।
२२. तर्कभाषापरिभाषादर्पणः	भास्करभट्टः ।
२३. तर्कभाषायुक्तिमुक्तावली	नागेशः ।
२४. तर्कभाषातत्त्वप्रबोधिनी	गणेशदीक्षितः ।
1 (न्यायविलासः	विश्वनाथभट्टः)
२५. तर्कभाषावार्तिकः	कर्ता न ज्ञायते ।
२६. तर्कभाषाविद्यानुशासनम्	” ”
२७. तर्कभाषा–उपन्यासः	” ”
२८. तर्कभाषामाधवी	” ”
२९. तर्कभाषापदकृत्यम्	” ”
३०. तर्कभाषाभाष्यम्	” ”
३१. तर्ककौमुदी	दिनकरभट्टः ।
३२. तर्कदीपिका	केशवभट्टः ।
३३. नृसिंहराजीयम्	नृसिंहराजः ।
३४. तर्करहस्यदीपिका (हिन्दीव्याख्या)	आचार्य विश्वेश्वरः । (मुद्रिता)
३५. हिन्दीव्याख्या	बदरीनाथ शुक्लः । (मुद्रिता)
३६. भाषानुवादः (हिन्दीव्याख्या)	डा. श्रीनिवास शास्त्री । (मुद्रितः)
३७. तत्त्वालोकः (हिन्दी – संस्कृतं च)	रुद्रधर झा ।
३८. आंग्लानुवादः	डा. गंगानाथ झा

1. तत्त्वप्रबोधिन्या उपरि उपव्याख्या ।

३९. तमिळनुवादः शिवप्रकाशः ।
४०. तर्कभाषाभावार्थदीपिका गौरीकान्तः ।

एवमज्ञातः अन्या अपि व्याख्या भवितुमर्हन्ति । अत्र व्याख्यासु 'चिन्नंभट्टस्य' तर्कभाषाप्रकाशिकाया 'तर्कभाषाभाव' नाम्नी उपव्याख्या तथा गणेशदीक्षितस्य 'तर्कभाषातत्त्वप्रबोधिन्याः 'न्यायविलास'नाम्नी उपव्याख्या रचिते । अतः अनयोर्व्याख्यानयोः महत्त्वम् उपव्याख्यारचनया ज्ञातुं शक्यते । चिन्नंभट्ट – गणेशदीक्षितयोर्मध्ये चिन्नंभट्टः प्राचीनः, चिन्नंभट्टस्य तर्कभाषाप्रकाशिकाव्याख्या भाण्डार्करप्राच्यविद्यासंशोधनमन्दिर-द्वारा प्रकाशिता । "व्याख्यानस्य शैली" निरूपणावसरे उत्तरत्र मया अनयोः द्वयोः व्याख्यानयोः तुलनापि स्थालीपुलाकन्यायेन-प्रदर्शिता । एवं च बहुभिः कारणैः व्याख्यानस्य प्रयोजन-दृष्ट्या च तत्त्वप्रबोधिन्याः स्थानं महत्त्वपूर्णं वर्तते ।

व्याख्याकारस्य परिचयः

तर्कभाषातत्त्वप्रबोधिनीव्याख्याकारः – गणेशदीक्षितः ।

पूर्वेतिहासः –

"त्रिनामाद्यन्तनामानौ महीक्षिद्दीक्षितावुभौ ।
शस्त्रे शास्त्रे च कुशलौ आहवेषु हवेषु च" ॥

गणेशदीक्षितस्य पितृपादं प्रसिध्दनामानं रघुनाथस्य मन्त्रिवरेण्यं गोविन्ददीक्षितमधिकृत्य प्रथतेऽयं श्लोकः। गोविन्दमरवी– नागमाम्बा (उमा) दम्पत्योः पञ्चमः पुत्रः श्रीगणेशदीक्षितः इति आधारः उपलभ्यते। तत्त्वप्रबोधिन्याः प्रारम्भे गणेशदीक्षितः स्वपितृपादं गोविन्ददीक्षितं स्मरति – यथा–

"गोविन्ददीक्षितं तातम्
उमां नत्वा च मातरम्।
क्रियते तर्कभाषायाः
टीका तत्त्वप्रबोधिनी" ॥

तञ्जावूरप्रदेशे मराठाप्रभूणां नायकानां शासनावसरे गोविन्ददीक्षितः सचिवस्थानं समलञ्चकार इति इतिहासेन ज्ञायते। श्रीमद्भिः गुरुगण्टि सीतारामय्याभिधैः सम्पादितायां 'भारती' नाम्न्यां तेलुगुभाषापत्रिकायां गणेशदीक्षितस्य पितृपादानां गोविन्ददीक्षितानां परिचयः सविशदं निरूपितः। गोविन्ददीक्षितस्य वंशपरम्परापि प्रदर्शिता।

---

1. JOURNAL OF THE ANDHRA HISTORICAL RESEARCH SOCIETY – Vol. II, PART 3-4 PAGE No, 250.
2. तत्त्वप्रबोधिनी – मङ्गलश्लोकः।
3. TAYLER'S ORIENTAL HISTORIC MANUSCRIPTS–II P.N. 149
4. 'भारती' a journal in TELUGU गोविन्ददीक्षितुडु – 2·68 GURUGANTI SEETARAMAYYA.

गोविन्ददीक्षितस्य वंशपरम्परा

गोविन्दमखी **नागमाम्बा (उमा)**

1	2	3	4	5	6
यज्ञनारयण मखी (पञ्चाशत् वर्षेभ्यः पूर्वं मृतः)	वेङ्कटमखी	लिङ्गाध्वरी	राजदृष्टिः (जातमृतः)	गणेशदीक्षितः	कुमार्ता

कुमारिका

कुमारः

प्रथमवाञ्छेश्वरयज्वा
(कुहिगतिः)

माधवार्यः

नरसिंहशास्त्री

द्वितीयवाञ्छेश्वरयज्वा

स्वामिशास्त्री नरसिंहशास्त्री कामाक्षी

महामहोपाध्यायवेङ्कटसुब्बाशास्त्री

वेङ्कटरामाशास्त्री
(Adyar Library)

"कृतवासो विमलमतिः कोशनिः (कोसलः) कर्णाटकसुधीः धीमान्"

रघुनाथनायकस्य आस्थानसभावर्णनम्–

"चिरन्तनैरागमवृद्धवर्गैः
अन्यैश्च धन्यैः विनयावनम्रैः ।
षड्दर्शनीसागरपारगैश्च
महीसुरैः भूषितपार्श्वभागः ॥

कविप्रवीणैरपि कालिदास-
मयूरसामिल्लमुरारिदेश्यैः ।
कर्णाटकान्ध्रद्रविडप्रबन्धनिर्माण-
विद्यानिपुणैश्च कैश्चित् ॥

वाग्गेयकारप्रमुखैरनेकैः
विचित्रगीतादिकलाप्रवीणैः ।
तथैव वीणादिषु वाद्यविद्या-
विचक्षणैः क्वापि निषेव्यमाणः ॥

नानाविधाशानरपालवर्ग-
सन्देशकृद्भिः समुपास्यमानः ।
आस्ते हि भद्राननमच्युतेन्द्र-
तनूभवः श्रीरघुनाथभूपः ॥

1. "The Manuscripts described here are results perhaps of 300 years collections, firstly by the Nayakas of Tanjore Secondly after about A.D. 1975. Maratha Princes".

---

1. Dr. BURNELL'S INTRODUCTION TO THE CLASSIFIED INDEX SAN MSS. IN THE TANJORE LIB.

2. "The earliest beginnings of the library must have been about the end of the 16th Century when Tanjore was under the rule of Nayakas who collected Skt. Mss. wrtitten in Telugu character."

3. "The 16th and 17th centuries in the history of South India witnessed on large number of Sanskrit Poets and Philosophers. That period to say that the least, was the golden age of Sanskrit revival in recent times. Most of the important writers of South India flourished during this period. The names of अप्पय्यदीक्षितः, । नीलकण्ठदीक्षितः, गोविन्ददीक्षितः, यज्ञनारायणदीक्षितः, वेङ्कटेश्वरदीक्षितः, श्रीनिवासदीक्षितः and राजचूडामणिदीक्षितः are a few among the most famous.

मराठानायकानां राज्यशासनकाले गोविन्ददीक्षितस्य प्रभावः शासनविषये, धार्मिकक्षेत्रे, सामाजिकाभिवृध्दिकार्येषु अपि अप्रतिहतः आसीत् । गोविन्ददीक्षितः अच्युतनायकस्य शासनकाले विशिष्य रघुनाथनायकस्य प्रभुत्त्वे सचिवस्थानम् अलञ्चकार । विना गोविन्ददीक्षितं तञ्जावूर् नायकप्रभूणां शासनं परिपूर्णं नाभविष्यत् । शासनविषये दीक्षितेन भृशं प्रभावः स्थापितः ।

'त्रेताग्निधूमाकुलवीथिकाङ्गणैः,
गृहे गृहे यत्र वसन्ति सूरयः ।
अधीतसर्वश्रुतयः कथान्तरे,
विनिर्जितप्रत्यनुमानवेदिनः' ॥

2. PROP. P.P.S SASTRI'S ESSAY BEFORE III ORIENTRL CONFERENCE MADRAS.
3. INTRODUCTION TO RUKMINI PARINAYAM.

1. Neither the rule of the Tanjore Nayakas in general, nor the regin of Raghunatha Nayaka in perticular, would be complete and full without a reference being made to Govinda Dikshita the illustrious Brahmin Minister of the Kingdom. Govinda Dikshita was minister to both Achyutappa Nayaka and his son Raghunath. The Dikshita played a very prominent part in the good administration of the country.

गोविन्ददीक्षितः वासिष्ठगोत्रोत्पन्नः आश्वलायनसूत्री कर्णाटकब्राह्मणः आसीत्। षोडशे क्रिस्तशतके 'चोल' साम्राज्यं प्रत्यागतः इति साम्प्रदायिकाः अभिप्रयन्ति।

2. "Tradition has it that Govinda Dikshita was a Kannada Brhmin belonging to the वासिष्ठगोत्रम् and आश्वलायन सूत्रम् and that he migrated to the Chola Country about the middle of the 16th century."

गोविन्ददीक्षितः महिशूराभिजनः कर्णाटकब्राह्मणः तञ्जावूरनायकस्य 'शेवप्पस्य' अवसानकाले राजसभां प्रत्यागतः, वैदुष्यकारणात् राजमर्यादापूर्वकं राज्ञः आस्थानं भूषयामास। कालक्रमेण स्वसामर्थ्यवशात् सर्वतोमुखज्ञानकारणात् सचिवपदवीम् अलञ्चकार इति ज्ञायते।

---

1. JOURNAL OF THE ANNAMALAI UNIVERSITY VOL-X-2, PAGE No. 201. Chap - VII. DEC. 1940.
2. JOURNAL OF THE ANNAMALAI UNIVERSITY. VOL-X-P-202

1. From the foregoing account it is evident the Govinda Dikshita, Kannad Brahmin hailing from the Mysore Country made his way to the court of the Tanjore Nayaka during the last years of Sevappa the first ruler, and he was well received and respectfully treated on account of his profound scholorship deep learning. Soon Dikshita made his mark there and role to the royal purohita, than to that of a tutor to the prince and lastly to the high office of minister Solely by dint of merit.

गोविन्ददीक्षितः सम्प्रदायनिष्ठः ब्राह्मणः राजपुरोहितः च आसीत् । तेन अनेकानि धार्मिककार्याणि यागादीनि समाचरितानीति ज्ञायते ।

1. Govinda Dikshita was an orthodox Brahmin and he is Said to have Performed numerous Sacrifices."

गोविन्ददीक्षितः समर्थः सचिवः राजकार्यकुशलः च आसीत् । न केवलं राजकार्यकुशलः अपितु श्रेष्ठः पण्डितः लेखकः च आसीत् । 'जैमिनिसूत्रव्याख्यानम् कुमारिलदर्शनव्याख्यानम्' सङ्गीतसुधा (सङ्गीतसुधानिधिः) इत्यादिग्रन्थानां रचयिता इति ज्ञायते । अद्वैतविद्याचार्यः, षड्दर्शनविशारदः इति अस्य ख्यातिरासीत् ।

वस्तुतः नायकाः वैष्णवमतावलम्बिन आसन् । गोविन्ददीक्षितस्य प्रभावेण शैवमतेऽपि नायकानामासक्तिः समुद्बोधिता।

---

1. JOURNAL OF ANNAMALAI UNIVERSITY-Vol-X-P. 207.
2. JOURNAL OF ANNAMALAI UNIVERSITY-Vol-X-208.

राजकार्ये गोविन्ददीक्षितस्य प्रभावेण धार्मिकक्षेत्रेऽपि मराठा-नायकशासकानां दृष्टिः परिवर्तितेति ज्ञायते।

1. In addition to being a good administrator, Govinda Diskhita also a renowned author. He is said to have written commentaries on the जैमिनिसूत्राणि, कुमारिल-दर्शनम्, besides the सङ्गीतसुधा (सङ्गीतसुधानिधिः) He is called अद्वैतविद्याचार्यः, षड्दर्शनविशारदः।

Govinda Dikshita's association with the administration of the Nayakas, is also taken as the cause for the latter's patronage of Saivism. Since the Nayakas were all Vaishnavas by their religious persuasion, it is said that their petronage of Saivism was made possible only by the powerful influence of Govinda Dikshita, the great Advaita Scholar of the times."

रघुनाथविलासाख्यनाटकस्य भूमिकायां श्रीमन्तः वेङ्कट-सुब्रह्मण्यशास्त्रिणः एवं निरूपयन्ति–

" गोविन्दमखीन्द्रा मन्त्रिणः पुरोहिताश्चाभूवन्नच्युत-नायकस्येति, तदानीं श्री तञ्जानगरी नायकराजधानी अभूदिति च साहित्यरत्नाकरमहाकाव्यादवगम्यते। इमे किल गोविन्द-मखीन्द्राः अच्युतभूपालेन प्रार्थिता रघुनाथभूपालस्यापि मन्त्रिणः पुरोहिताश्चाभूवन् तस्य पट्टबन्धनं कृत्वा। तद्यथा–

1. JOURNAL OF ANNAMALAI UNIVERSITY. Vol–X–209–212

साहित्यरत्नाकरे दशमे सर्गे श्लोकः – 76

'कुशली रघुनाथभूमिपालः,
कुलकूटस्यपुरोहितत्वयायम् ।
अधुनाहमिवात्तराजनीतिः,
प्रभवेत् भूपरिपालने मखीन्द्रे' ।। इति

इमे किल कौमारिलदर्शनव्याख्यातारः सङ्गीतसुधादि-ब्रहुग्रन्थनिर्मातारः षड्दर्शिनीपारदृश्वानो गोविन्दमखीन्द्राः, कर्णाट-भाषायां स्वयं व्यवहरमाणाः वसिष्ठवंशोद्भवाः, किञ्च मखी-न्द्रशब्देन प्रसिद्धिमुपगताः । हरिवंशसारचरितमहाकाव्यप्रणेतारश्च गोविन्दमन्त्रिणः तद्व्याख्यातृभिः अप्पय्यदीक्षितेन्द्रैः "षड्दर्शिनी दर्शिनम्" इति वर्णिताः । इत्यादि ।

अच्युतनायकस्य प्रार्थनानुसारं गोविन्ददीक्षिताः रघुनाथ-नायकस्य शासनकालेऽपि मन्त्रिपदं समलञ्चक्रुः । रघुनाथनायकः गोविन्ददीक्षितपुत्रैः सह शिक्षितः सन् स्वयं शास्त्रज्ञः कविरपि बभूव । अतः अस्य शासनकाले समर्थसचिवानां मार्गदर्शनेन राज्यं सर्वतोमुखाभिवृद्धिं प्राप ।

अच्युतनायकस्य विषये रघुनाथनायकस्य विषये च साहि-त्यिकविवरणं लभ्यते । गोविन्ददीक्षितस्य पुत्रा अपि स्वयं विद्वांसः यायजूकाश्च बभूवुः तैः अच्युतनायकस्य, रघुनाथनायकस्य च शासनमधिकृत्य ग्रन्थाः विरचिताः । वेङ्कटमखिना स्वीये "रघुनाथा भ्युदयमहाकाव्ये" वर्णनं कृतमस्ति । 'साहित्यरत्नाकरः' 'पारि-जातापहरणम्' रघुनाथनायकस्य कृती इत्यवगम्यते ।

गणेशदीक्षितः

तर्कभाषातत्त्वप्रबोधिनीकारः गणेशदीक्षितः गोविन्ददीक्षितस्य पुत्रेषु पञ्चमः। स्वपितृसकाशात् सङ्गीतवेदमधीत्य सम्प्रदायनिष्ठः यायजूक आसीदिति ज्ञायते। तत्रापि अयं श्रेष्ठः नैयायिकः आसीत्। बहूनां न्यायग्रन्थानामुपरि अनेन व्याख्यानानि रचितानि। परन्तु तर्कभाषाव्याख्यां तत्त्वप्रबोधिनीं विहाय अन्याः कृतयः नोपलभ्यन्ते। तत्त्वप्रबोधिन्यां गणेशदीक्षितः स्वरचितकृतीः स्वयमुल्लिखति।

यथा–

'मत्कृतकिरणावलीटीकायाम्'

'अनुमानखण्डटीकायाम्'

'द्रव्योपायटिप्पण्याम्'

इत्यादीनि।

गणेशदीक्षितः षड्शास्त्रेषु पारङ्गतः, विशिष्य न्यायवेदान्तदर्शनयोः अस्य गतिरासीदित्यधिगम्यते। यद्यपि गणेशदीक्षितविरचिताः अन्याः कृतयः नोपलभ्यन्ते तथापि दर्शनेषु प्रावीण्यमधिगन्तुं तत्त्वप्रबोधिनीव्याख्या एव अलम्। अत्र व्याख्यायां दर्शनान्तरस्य मतविशेषः सान्दर्भिकरूपेण समुचितावसरे समुद्धृतः समीक्षितः च। यथा–

"काव्यं यशसेऽर्थकृते"

"प्राक् दिशोः विभक्तिः"

"राजसूयं ब्राह्मणेन कर्तव्यं
स्वर्गसाधनत्वात् ज्योतिष्टोमवत्"
"सौगतमतम्

"नाभुक्तम् स्मृतिः"

इत्यादीनि ।

देशकालौ

गणेशदीक्षितस्य पितृपादाः गोविन्ददीक्षिताः नायकमन्त्रिणः बभूवुरिति पूर्वं निरूपितम् । क्रिस्ताब्दस्य षोडशे शतके गोविन्ददीक्षिताः नायकशासनकाले तञ्जानगरीं प्रापुः । अतः कर्णाटकब्राह्मणस्य गोविन्ददीक्षितपुत्रस्य गणेशदीक्षितस्य कालः क्रिस्ताब्दस्य सप्तदशशतकस्य पूर्वार्धः इति, सः तञ्जानटरीस्थः कर्णाटकब्राह्मणः इति च इतिहासविदः ।

व्याख्यानस्य शैली

अस्य व्याख्यानस्य शैली ललितगम्भीरा वर्तते। कठिणविषयाणामपि विवरणं सरलया सुन्दरया शैल्या कृतम्। नातिविस्तरसंक्षेपेण औचित्यपूर्वकं विषयनिरूपणं अत्र दृश्यते। तत्तद्दार्शनिकानां मतं यथावदनूद्य स्वमतप्रतिपादनमत्र विशिष्यते। व्याख्यानस्य शैलीं तुलनामकदृष्ट्या परिशीलयितुं चिन्नंभट्टस्य तर्कभाषाप्रकाशिकातः तत्त्वप्रबोधिनीव्याख्यातश्च केचन भागाः अत्र उद्ध्रियन्ते।

● ○ ● ○ ●

चिन्नंभट्टस्य तर्कभाषाप्रकाशिका

मङ्गलश्लोकस्य व्याख्यानानन्तरं न्यायसूत्रस्य अवतरण-सन्दर्भे "अस्य ग्रन्थस्य प्रकरणत्वात् शास्त्रस्य ये विषयप्रयोजने ते एवास्यापीति द्रष्टव्यम्। एतत्प्रकरणप्रवर्तके अवान्तरे विषयप्रयोजने तु आद्यपद्येन निर्दिष्टे। प्रकाश्यमाना तर्कभाषाविषयः, बालं प्रति तत्प्रतिबोधनं प्रयोजनम्। ननु शास्त्रस्यापि के विषयप्रयोजने येन तद्विषयादिना अस्यापि विषयादिमत्त्वं सिध्येत् इत्याशङ्क्य तद्विषयप्रयोजनप्रतिपादनपरं शास्त्रस्य आदिमं सूत्रं पठति- 'प्रमाणेति'।

---

1. TARKA - BHASA OF KESAVA MISRA WITH THE COMMENTARY TARKABHASAPRAKASIKA OF CINNAMBHATTA Ed. by DR. BHANDARKAR II Ed. 1979. BHANDARKAR ORIENTAL RESEARCH INSTITUTE, POONA. P. No. 99. Line-6.

गणेशदीक्षितविरचिता तत्त्वप्रबोधिनी

"अत्र ग्रन्थस्य यिषयप्रयोजने निर्दशिते प्रकाश्यतर्कभाषा-विषयः, न्यायनये प्रवेशः प्रयोजनमिति। तथापि सुखदुःखाभा-वेतरत्त्वे न तावत् प्रेक्षावत्प्रवृत्तिरिति शास्त्रस्य ये प्रमाणादिर्निः-श्रेयसरूपविषयप्रयोजने त एवास्य प्रकरणस्यति कथनार्थं तत्प्र-तिपादनपरं न्यायस्यादिमं सूत्रं पठति- 'प्रमाणेति'।"

"प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तिः भवतीति" इति मूलस्य व्याख्यानम्।

तर्कभाषाप्रकाशिका

"प्रतिज्ञातार्थमाह – प्रमाणादीति। अनारोपितरूपत्त्वापर-पर्यायं सम्यक्त्वं तत्त्वशब्दार्थः। अत एवोत्तरग्रन्थे वक्ष्यति तत्त्वज्ञानं सम्यग्ज्ञानमिति। 'रूढिर्योगमपहरतीति' न्यायेन अवयवार्थानुस्यूतेः अविवक्षितत्त्वात् नोक्तविकल्पावकाशः। निश्चितं श्रेयो निःश्रेयसं

1. पृष्ठम् 5, पङ्क्तिः 3.
2. पृष्ठम् – 99. पङ्क्तिः 6.

मोक्षः। तस्यैव श्रेयस्त्वेन निश्चितत्वात् इतरेषां श्रेयसां सातिशयत्वेन क्षयिष्णुत्वेन च तदाभासत्वात् । निःश्रेयसशब्दस्य अकारान्तत्वम् 'अचतुर'– (पा. 5. 4. 77.) इत्यादिसूत्रे निपातनात् सिध्दम्। अधिगमः प्राप्तिः न ज्ञानम्। अतो नोक्तदोषप्रसङ्गः।"

卐 ○ 卐

तत्त्वप्रबोधिनी

1. "तथाच प्रमाणादीति प्रमाणादिपदार्थतत्वं ज्ञायते अनेनेति व्युत्पत्त्या शास्त्रमेव अभिधीयते........................निश्श्रेयसस्य

मोक्ष एवरूढिः अधिगमशब्देन प्राप्तेरुक्तत्त्वात् । तत्वम् अनारोपितं रूपम्, अतो नोक्तदोषः"

2. "सामान्यस्यापि वस्तुभूतत्वात्" इत्यत्र बौध्दमतनिराकरणम्।

---

1. पृष्ठम् – 6 पङ्क्तिः – 11
2. पृष्ठम् – 12 पङ्क्तिः – 14

1 तत्त्वप्रकाशिका

"अयमाशयः। विमतं सविकल्पकं ज्ञानं प्रत्यक्षम्। अबाधितत्वे सति अपरोक्षावभासितत्वात्। निर्विकल्पकवत्। नच अबाधितत्वमसिध्दं शुक्तिकायामिदं रजतम् इत्यादिवत्। अत्र बाधकस्य अनुपलम्भात्। ननु सामान्यविषयं सविकल्पकं सामान्यं च कृत्स्नैकदेशवृत्तिविकल्पपराहतम्। अतः तद्विषयस्य प्रत्यक्षत्वकल्पना कथमत्र कल्प्यते इति चेत् तथागततथागतिं वितथां मा कृथाः। समवायलक्षणया वृत्या सर्वासु व्यक्तिषु सामान्यं च वर्तते इत्युक्ते कृत्स्नैकदेशविकल्पस्य अनवकाशपराहतत्वात्। व्यावृत्तासु व्यक्तिषु अनुगतसामान्यानभ्युपगमे एकाकारप्रत्ययप्रयोगयोः निरालम्बनतापत्तेश्च"। इत्यादिकम्।

2 तत्त्वप्रबोधिनी

"अयमाशयः अर्थक्रियाकारित्वं सामान्यस्यापि अस्ति यदि सामान्यं नाङ्गीक्रियते................तथाच विमतं सामान्यं परमार्थसत् अर्थक्रियाकारित्वात् स्वलक्षणवत्। एवं घटोऽयमिति सविकल्पकं प्रत्यक्षम् अर्थजन्यत्वात् निर्विकल्पकवत् इत्यास्तां विस्तरः"।

एवं अनुमाननिरूपणे, उपाधिनिरूपणे, प्रामाण्यवादे, आत्मनिरूपणे, अपवर्गनिरूपणे परस्परं वैशिष्ट्यं लक्ष्यते। तत्वप्रबोधिन्याः शैली औचित्यपूर्णा सुलभा गम्भीरा च चकास्ति।

1. पृष्ठम् – 128 पङ्क्तिः – 13

2. पृष्ठम् – 49-50

मातृकाविवरणम्

It is based upon a collection of the following Manuscripts.

क- ORIENTAL RESEARCH INSTITUTE,
I - P' 389. MYSORE.
BEARING No - 1456-7976
SCRIPT - TELUGU

ख- ORIENTAL RESEARCH INSTITUTE,
I - P. 389. MYSORE.
BEARING No - 2250-9587
SCRIPT - TELUGU

ग- GOVT. ORIENTAL MANUSCRIPTS LIBRARY,
MADRAS.
SCRIPT - GRANTHA
BEARING Nos - 4119 D. C. SAN. MSS-
PAGE No - 3073.

घ- TANJORE MAHARAJA SERFOJI'S
SARASWATI MAHAL LIBRARY, TANJORE.
No. 6309. BURNELL'S GATALOGUE
No. 222. PAGE - III
SCRIPT - DEVANAGARI

The following Manuscripts also were consulted.

1. SARASWATI MAHAL LIBRARY
TANJORE 6310, BURNELL'S
CATALOGUE No. 2219 PAGE 118
SCRIPT- DEVANAGARI

2. 6311 – BURNELL'S CATALOGUE
No. 10907 – PAGE – 118
SCRIPT - DEVANAGARI

3. GOVERNMENT MANUSCRIPTS LIBRARY
MADRAS.
A DESCRIPTIVE CATALOUGE OF THE SANSKRIT MANUSCRIPTS
PAGE No.3073 No. 4120 GRANTHA SCRIPT

4. THE ADYAR LIBRARY AND
RESEARCH CENTRE, MADRAS.
DESCRIPTIVE CATALOGUE OF
SANSKRIT MANUSCRIPTS Vol - VIII
PAGE No. 202 Sl. No. 1118 Acc. No. 68
TELUGU SCRIPT.

॥ श्रीः ॥

अथ श्रीकेशवमिश्रविरचिता
तर्कभाषा

बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।
संक्षिप्य युक्त्यन्वितितर्कभाषा विरच्यते तस्य कृते मयैषा ॥ १ ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः-श्रेयसाधिगम इति न्यायस्यादिमं सूत्रम् । अस्यार्थः— प्रमाणादिषो-डशपदार्थतत्वज्ञानान्मोक्षप्राप्तिर्भवतीति। न च प्रमाणादीनां तत्वज्ञानं सम्यग् ज्ञानं तावद्भवति यावदेषामुद्देशलक्षणपरीक्षा न क्रियन्ते । यदाह भाष्यकारः– 'त्रिविधास्य शास्त्रस्य प्रवृत्तिः । उद्देशो लक्षणं परीक्षा चेति ।' तत्रोद्देशस्तु नाममात्रेण संकीर्तनम् । तच्चास्मिन्नेव सूत्रे कृतम् । लक्षणं त्वसाधारणधर्मवचनम्। यथा गोः सास्नादि-मत्वम् । लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा । तेनैते लक्षणपरीक्षे प्रमाणादीनां तत्वज्ञानार्थं कर्तव्ये ।

तत्रापि प्रथममुद्दिष्टस्य प्रमाणस्य तावल्लक्षणमुच्यते । प्रमाकरणं प्रमाणम् । तत्र च प्रमाणं लक्ष्यं प्रमाकरणं लक्षणम्। ननु प्रमायाः करणं चेत् प्रमाणं तर्हि तस्य फलं वक्तव्यं करणस्य फल-वत्त्वनियमात् । सत्यम् । प्रमैव फलं साध्यमित्यर्थः । यथा छिदाक-रणस्य परशोश्छिदैव फलम् । का पुनः प्रमा यस्याः करणं प्रमाणम्। उच्यते। यथार्थानुभवः प्रमा । यथार्थ इत्ययथार्थानां संशयविपर्य-यतर्कज्ञानानां निरासः । अनुभव इति स्मृतेर्निरासः । अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम् । किं पुनः करणम् । साधकतमं करणम् ।

अतिशयेन साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः। ननु साधकं कारणमिति पर्यायस्तदेव न ज्ञायते किं तत् कारणमिति। उच्यते। यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणम्। यथा तन्तुवेमादिकं पटस्य। यद्यपि पटोत्पत्तौ रसाभादेर्दैवादागतस्य पूर्वभावो विद्यते तथापि नासौ नियतः। तन्तुरूपस्य तु नियतः पूर्वभावोऽस्त्येव किं त्वन्यथासिद्धः पटरूपजननोपक्षीणत्वात्। पटं प्रत्यपि कारणत्वे कल्पनागौरवात्। तेनान्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्। अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वम्। यत्तु कश्चिदाह–कार्यानुकृतान्वयव्यतिरेकि कारणमिति। तदयुक्तम्। नित्यविभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासंभवेनाकारणत्वप्रसङ्गात्। तच्च कारणं त्रिविधम्। समवाय्यसमावायिनिमित्तभेदात्। तत्र यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्। तन्तुष्वेव पटः समवेतो जायते न तुर्यादिषु। ननु तन्तुसंबन्ध इव। तुर्यादिसंबन्धोऽपि पटस्य विद्यते तत् कथं तन्तुष्वेव पटः समवेतो जायते न तुर्यादिषु। सत्यम्। द्विविधः संबन्धः संयोगः समवायश्च। तत्रायुतसिद्धयोः संबन्धः समवायः। अन्ययोस्तु संयोग समवायश्च। तत्रायुतद्धियोः सबन्धः समवायः। अन्ययोस्तु संयोग एव। कौ पुनरयुतसिद्धौ। ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। तदुक्तम्–

> 'तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः
> अनश्यदेकमपराश्रितमेवावतिष्ठते ।।'

यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अवयव्यादयो हि यथाक्रममवयवाद्याश्रिता एवावतिष्ठन्तेऽविनश्यन्तः ; विनश्यदवस्थास्त्वनाश्रिता एवावतिष्ठन्तेऽवयव्यादयः यथा तन्तुनाशे सति पटः। यथा वाश्रयनाशे सति गुणः। विनश्यत्ता तु विनाशकारणसामग्रीसांनिध्यम्। तन्तुपटावव्यवय-

वाषयविनौ, तेन तयोः संबन्धः समवायः। अयुतसिद्धत्वात्। पटतुर्योस्तु न समवायोऽयुतसिद्धत्वाभावात्। न हि तुरी पटाश्रितैवावतिष्ठते नापि पटस्तुर्याश्रितोऽतस्तयोः संबन्धः संयोग एव। तदेतं तन्तुसमवेतः पटः। (यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्।) अतस्तन्तव एव पटस्य समवायिकारणं न तु तुर्यादि। पटश्च स्वगतरूपादेः। एवं मृत्पिण्डोऽपि घटस्य समवायिकारणं घटश्च स्वगतरूपादेः समवायिकारणम्। ननु यदैव घटादयो जायन्ते तदैव तद्गतरूपादयोऽपि। अतः समानकालीनत्वाद् गुणगुणिनोः सव्येतरविषाणवत् कार्यकारणभावो नास्ति पौर्वापर्याभावात्। अतो न समवायिकारणं घटादयस्तद्गतरूपादीनां कारणविशेषत्वात् समवायिकारणस्य। अत्रोच्यते। न गुणगुणिनोः समानकालीनं जन्म किं तु द्रव्यं निर्गुणमेव प्रथममुत्पद्यते पश्चात् तत्समवेता गुणा उत्पद्यन्ते। समानकालोत्पत्तौ गुणगुणिनोः समानसामग्रीकत्वात् भेदो न स्यात् कारणभेदनियतत्वात् कार्यभेदस्य। तस्मात् प्रथमे क्षणे निर्गुण एव घटो गुणेभ्यः पूर्वभावी भवति गुणानां कारणम्। तदा कारणभेदोऽप्यस्ति घटो हि घटं प्रति न कारणमेकस्यैव पौर्वापर्याभावात्। न हि स एव तमेव प्रति पूर्वभावी पश्चाद्भावी चेति स्वगुणान् प्रति पूर्वभावित्वाद्भवति गुणानां कारणम्। नन्वेवं सति प्रथमेक्षणे घटोऽचाक्षुषः स्यादरूपिद्रव्यत्वाद्। वायुवत्। तदेव हि द्रव्यं चाक्षुषं यन्महत्त्वे सत्युद्भूतरूपवत्, अद्रव्यं च स्याद् गुणाश्रयाभावाद् गुणाश्रयो द्रव्यमिति द्रव्यलक्षणयोगात्। सत्यम् प्रथमे क्षणे परमसूक्ष्मो यदि घटश्चक्षुषा न गृह्यते तदा का नो हानिः। न हि सगुणोत्पत्तिपक्षेऽपि निमेषावसरे घटो गृह्यते। तेन व्यवस्थितमेतान्निर्गुण एव घटः प्रथममुत्पद्यते द्वितीयादिक्षणेषु चक्षुषा गृह्यते। न च प्रथमे क्षणे अद्रव्यत्वापत्तिः। समवायिकारणं द्रव्यमिति द्रव्यलक्षणयोगात्। योग्यतया गुणाश्रयत्वाच्च। गुणाश्रयत्वं तु

गुणात्यन्ताभावानधिकरणत्वम्। असमवायिकारणं तदुच्यते यत् समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्यासमवायिकारणं तन्तुसंयोगस्य गुणस्य पटसमवायिकारणेषु तन्तुषु गुणिषु समवेतत्वेन समवायिकारणप्रत्यासन्नत्वादनन्यथासिद्धनियतपूर्वभावित्वेन पटं प्रति कारणत्वाच्च। एवं तन्तुरूपं पटगतरूपस्यासमवायिकारणम्। ननु पटगतरूपस्य पटः समवायिकारणमतस्तद्गतस्यैव कस्यचिद्धर्मस्य पटरूपं प्रत्यसमवायिकारणत्वमुचितम्। समावायिकारणप्रत्यासन्नत्वात्। न तु तन्तुरूपस्य। तस्य समवायिकारणप्रत्यासन्नत्वाभावात्। मैवम्। समवायिकारणसमवायिकारणप्रत्यासन्नस्यापि परंपरया समवायिकारणप्रत्यासन्नत्वात्। निमित्तकारणं तदुच्यते यन्न समवायिकारणं नाप्यसमवायिकरणमथ च कारणम्। यथा वेमादिकं पटस्य निमित्तकारणम्। तदेतद्द्रव्याणामेव त्रिविधं कारणमिष्यते। अभावस्य तु निमित्तकारणमात्रं तस्य क्वचिदप्यसमवायात् समवायस्य भावद्वयनिमित्तत्वात्। तदेतस्य त्रिविधस्य मध्ये यदेव कथमपि सातिशयं तदेव करणम्। तेन व्यवस्थितमेवं प्रमाकरणं प्रमाणमिति। यत्त्वनधिगतार्थगन्तृ प्रमाणमिति लक्षणम्। तन्न। एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति (इदानीं केतकीगन्ध इत्यत्रातीन्द्रियस्यापि कालस्य ग्रहणान्नित्यमिति) धारावाहिकज्ञानानां गृहीतग्राहिणामप्रामाण्यप्रसङ्गात्। न चान्यान्यलक्षणलवविशिष्टविषयीकरणादनधिगतार्थगन्तृता। प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात् भेदग्रहे हि क्रियादिसंयोगान्तानां चतुर्णां यौगपद्याभिमानो न स्यात्। (क्रिया क्रियातो विभागो विभागात् पूर्वसंयोगनाशस्ततश्चोत्तरसंयोगोत्पत्तिरिति) ननु प्रमायाः कारणानि बहूनि सन्ति प्रमातृप्रमेयादीनि तान्यपि किं कारणानि उत नेति। उच्यते। सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः इन्द्रियसंयोगादौ [तु]

सत्यविलम्बेन प्रमोत्पत्तेरत इन्द्रियसंयोगादिरेव कारणम्। प्रमायाः साधकत्वाविशेषेऽप्यनेनैवोत्कर्षेणास्य प्रमात्रादिभ्योऽतिशयिततत्वादतिशयितं साधकं साधकतमं तदेव करणमित्युक्तम्। अत इन्द्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणं न प्रमात्रादि। तानि प्रमाणानि चत्वारि। तथा च न्यायसूत्रम्'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति।

किं पुनः प्रत्यक्षम्। साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। साक्षात्कारिणी। च प्रमा सैवोच्यते येन्द्रियजा। सा च द्विधा सविकल्पकनिर्विकल्पकभेदात्। तस्याः करणं त्रिविधम्। कदाचिदिन्द्रियं कदचिदिन्द्रियार्थसंनिकर्षः कदाचिद् ज्ञानम्। कदा पुनरिन्द्रियं करणम्। यदा निर्विकल्पकरूपा प्रमा फलं तदेन्द्रियं करणम्। तथाह्यात्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रयमर्थेन इन्द्रियाणां वस्तुप्राप्यकारित्वनियमात्। ततोऽर्थसंनिकृष्टेनेन्द्रियेण निर्विकल्पकं नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किंचिदिदमिति ज्ञानं जायते। तस्य ज्ञानस्येन्द्रियं करणं छिदाया इव परशुः। इन्द्रियार्थसंनिकर्षोऽवान्तरव्यापारः छिदाकरणस्य परशोरिव दारुसंयोगः।निर्विकल्पकं ज्ञानं फलं परशोरिव छिदा। कदा पुनरिन्द्रियार्थसंनिकर्षः करणम्। यदा निर्विकल्पकज्ञानान्तरं सविकल्पकं ज्ञानं नामजात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति विशेषणविशेष्यावगाहि ज्ञानमुत्पद्यते तदा इन्द्रियार्थसंनिकर्षः करणम्। निर्विकल्पकमेवावान्तरव्यापारः। सविकल्पकं ज्ञानं फलम्। कदा पुनर्ज्ञानं करणम्। यथोक्तसविकल्पकज्ञानानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा निर्विकल्पकं ज्ञानं करणम्। सविकल्पकज्ञानमवान्तरव्यापारः। हानादिबुद्धयः फलम्। (तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः। यथा कुठारजन्यः कुठारदारुसंयोगः कुठारजन्यच्छिदाजनकः। अत्र) कश्चिदाह – सविकल्पकादीनामपीन्द्रियमेव करणं यावन्ति

त्वान्तरालिकानि संनिकर्षादीनि तानि सर्वाण्यवान्तरव्यापरः। इन्द्रियार्थयोस्तु यः साक्षात्कारिप्रमाहेतुः स संनिकर्षः षड्विध एव। तद् यथा-संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो विशेषणविशेष्यभावश्चेति। तत्र यदा चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिन्द्रियं घटोऽर्थः। अनयोः संनिकर्षः संयोग एवायुतसिध्द्यभावात्। एवं मनसान्तरेणेन्द्रियेण यदात्मविषयं ज्ञानं जन्यतेऽहमिति तदा मन इन्द्रियमात्मार्थः। अनयोः संनिकर्षः संयोग एव। कदा पुनः संयुक्तसमवायः संनिकर्षः। यदा चक्षुषा घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति तदा चक्षुरिन्द्रियं घटरूपमर्थः। अनयोः संनिकर्षः संयुक्तसमवाय एव। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। एवं मनसात्मसमवेते सुखादौ गृह्यमाणे अयमेव संनिकर्षः। घटगतपरिमणादिग्रहे चतुष्टयसंनिकर्षोऽप्यधिकं कारणमिष्यते, सत्यपि संयुक्तसमवाये तदभावे दूरे परिमाणाद्यग्रहात्। चतुष्टयसंनिकर्षो यथा। इन्द्रियावयवैरर्थावयवानाम्, इन्द्रियावयवैरर्थावयविनः, इन्द्रियावयविनार्थावयविनः, अर्थावयवैरिन्द्रियावयाविनः संनिकर्ष इति। यदा पुनश्चक्षुषा घटसमवेते रूपादौ रूपत्वादिसामान्यं तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यमर्थः, अनयोः संनिकर्षः संयुक्तसमवेतसमवाय एव। यतश्चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्। कदा पुनः समवायः संनिकर्षः। यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रमिन्द्रियं शब्दोऽर्थः। अनयोः संनिकर्षः समवाय एव। श्रोत्रस्य चाकशात्मकत्वाच्छद्बस्य चाकाशगुणत्वाद् गुणगुणिनोश्च समवायत्। कदा पुनः समवेतसमवायः संनिकर्षः। यदा पुनः शब्दसमवेतं शब्दत्वसामान्यं श्रोत्रेन्द्रियेण गृह्यते तदा श्रोत्रमिन्द्रियं शब्दत्वादिसामान्यमर्थः। अनयोः संनिकर्षः समवेतसमवाय एव। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। कदा पुनर्विशेषणविशेष्यभावश्चेन्द्रियार्थसंनिकर्षो भवति।

यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते इह भूतले घटो नास्तीति (तदा विशेषणविशेष्यभावः संबन्धः।) तदा चक्षुःसंयुक्तस्य भूतलस्य घटाभावो विशेषणं भूतलं विशेष्यम्। यदा मनःसंयक्ते आत्मनि सुखाद्यभावो गृह्यतेऽहं सुखादिरहित इति तदा मनःसंयुक्तस्यात्मनः सुखाद्यभावो विशेषणम्। यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभावो विशेषणम्। तदेवं संक्षेपतः पञ्चविधसंबन्धान्यतमसंबद्धविशेषणविशेष्यभावलक्षणेनेन्द्रियार्थसंनिकर्षेणाभाव इन्द्रियेण गृह्यते। एवं समवायोऽपि। चक्षुःसंबद्धस्य तन्तोर्विशेष्यभूतः पटसमवायो गृह्यते। इह तन्तुषु पटसमवाय इति। तदेवं षोढा संनिकर्षो वर्णितः। संग्रहश्च।

अक्षजा प्रमितिर्द्वेधा सविल्कपाविकल्पजा।
करणं त्रिविधं तस्याः संनिकर्षस्तु षड्विधः॥
घटतन्नीलनीलत्वशब्दशब्दत्वजातयः।
अभावसमवायौ च ग्राह्याः संबन्धषट्कतः॥

ननु निर्बिकल्पकं परमार्थसत्स्वलक्षणविषयाभावाद् भवतु प्रत्यक्षं सविकल्पकं तु शब्दलिङ्गवदनुगताकारावगाहित्वात् सामान्यविषयं कथं प्रत्यक्षमर्थजस्यैव प्रत्यक्षत्वात्। अर्थस्य च परमार्थतः सत एव तज्जनकत्वात्। स्वलक्षणं तु परमार्थसत् न तु सामान्यं तस्य प्रमाणनिरस्तविधिभावस्यान्यव्यावृत्त्यात्मनस्तुच्छत्वात्। नैवम्। सामान्यस्यापि वस्तुभूतत्वात्। तदेवं व्याख्यातं प्रत्यक्षम्॥

लिङ्गपरामर्शोऽनुमानम्। येन ह्यनुमीयते तदनुमानम्। लिङ्गपरामर्शेन चानुमीयतेऽतो लिङ्गपरामर्शोनुमानम्। तच्च धूमादिज्ञानम्। अनुमितिं प्रति करणत्वात्। अग्न्यादिज्ञानमनुमितिः। तत्करणं धूमदिज्ञानम्। किं पुनर्लिङ्गं कश्च तस्य परामर्शः। उच्यते।

व्याप्तिबलेनार्थगमकं लिङ्गम् । यथा धूमोऽग्नेर्लिङ्गम् । तथाहि यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः । तस्यां गृहीतायामेव धूमोऽग्निं गमयत्यतो व्याप्तिबलेना [न्य?] नुमापकत्वाद् धूमोऽग्नेर्लिङ्गम्। तस्य तृतीयं ज्ञानं लिङ्गपरामर्शः। तथाहि प्रथमं तावन्महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविकं संबन्धमवधारयति यत्र धूमस्तत्राग्निरिति । यद्यपि यत्र यत्र मैत्रीतनयत्वं तत्र तत्र श्यामत्वमिति भूयोदर्शनं समानं तथापि मैत्रीतनयत्वश्यामत्वयोर्न स्वाभाविकः संबन्धः, किंत्वौपाधिक एव, शाकाद्यन्नपरिणामस्योपाधेर्विद्यमानत्वात् । तथाहि श्यामत्वे मैत्रीतनयत्वं न प्रयोजकं किं च शाकाद्यन्नपरिणातिभेद एव प्रयोजकः । प्रयोजयश्चोपाधिरित्युच्यते । न च धूमाग्न्योः संबन्धे कश्चिदुपाधिरस्ति । अस्ति चेद् योग्यो वाऽयोग्यो वा। अयोग्यस्य शङ्कितुमशक्यत्वात् योग्यस्य चानुपलभ्यमानत्वाद् यत्रोपाधिरस्ति तत्रोपलभ्यते । यथाग्नेर्धूमसंबन्ध आर्द्रेन्धनसंयोगः । यथा हिंसात्वस्याधर्मसाधनत्वेन संबन्धे निषिद्धत्वमुपाधिः । मैत्रीतनयत्वस्य श्यामत्वेन संबन्धे शाकाद्यन्नपरिणतिभेद उपाधिः । न चेह धूमस्याग्निसाहचर्ये कश्चिदुपाधिरस्ति । यद्यभविष्यत् तदाऽद्रक्ष्यत् । ततो दर्शनाभावान्नास्तीति तर्कसहकारिणाऽनुपलम्भसनाथेन प्रत्यक्षेणैवोपाध्याभावोऽवधार्यते । तथा चोपाध्यभावग्रहणजनितसंस्कारसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव धूमाग्न्योर्व्याप्तिरवधार्यते । तेन धूमाग्न्योः स्वाभाविक एव संबन्धो न त्वौपाधिकः । स्वाभाविकश्च संबन्धो व्याप्तिरुच्यते । तदनेन न्यायेन धूमाग्न्योर्व्याप्तौ पूर्वं गृह्यमाणायां महानसे यद्धूमज्ञानं तत् प्रथमम् । पूर्वतादौ पक्षे यद्धूमज्ञानं तद् द्वितीयम् । ततः पूर्वगृहीतां धूमाग्न्योर्व्याप्तिं स्मृत्वा तत्र पर्वते पुनर्धूमं परामृशति अस्त्यत्र पर्वतेऽग्निनाव्याप्यो धूम इति तदिदं धूमज्ञानं तृतीयम । तश्चावश्यमभ्युपेतव्यमन्यथा

यत्र यत्र धूमस्तत्र तत्राग्निरित्येव स्यादिह तु कथमग्निना भवितव्यं तस्मादिहापि धूमोऽस्तीति ज्ञानमन्वेषितव्यम् । अयमेव लिङ्गपरामर्शोऽनुमितिं प्रति करणत्वाच्चानुमानम्। तस्मादस्त्यत्र पर्वतेऽग्निरित्यनुमितिज्ञानमुत्पद्यते । ननु प्रथमं यन्महानसे धूमज्ञानं तत्कथं नाग्न्यनुमापकम् । सत्यम् । व्याप्तेरगृहीतत्वात् । गृहीतायामेव व्याप्तावनुमित्युदयात् । अथ व्याप्तिनिश्चयोत्तरकालं महानस एवाग्निरनुमीयताम् । मैवम् । अग्नेर्दृष्टत्वेन संदेहाभावात् । संदिग्धश्चार्थोऽनुमीयते । यथोक्तं भाष्यकृता– 'नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्ततेऽपि तु संदिग्धेऽर्थे'। अथ पर्वतगतयात्रस्य पुंसो यद्धूमज्ञानं तत्कथं नाग्नेरनुमापकम् । अस्ति चात्राग्निसंदेहः साधकबाधकप्रमाणाभावेन संशयस्य न्यायप्राप्तत्वात् । सत्यम् । अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसोऽनुमानोदयेन व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात् । धूमदर्शनाच्च व्याप्तिं स्मरति यो यो धूमवान् स सोऽग्निमान् यथा महानस इति । तेन धूमदर्शने जाते व्याप्तिस्मृतौ भूतायां यद्धूमज्ञानं तत्तृतीयम् । धूमवांश्चायमिति । तदेवाग्निमनुमापयति नान्यम् । तदेव लिङ्गपरामर्शः । तेन व्यवस्थितमेतल्लक्षणं लिङ्गपरामर्शोऽनुमानमिति ॥

तच्चानुमानं द्विविधं स्वार्थं परार्थं चेति । स्वार्थं स्वप्रतिपत्तिहेतुः । तथाहि स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वतवर्तिनीमविच्छिन्नमूलामभ्रंलिहां धूमलेखां पश्यन्धूमदर्शनोद्भूतसंस्कारो व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति । ततोऽत्रापि धूमोऽस्तीति प्रतिपद्यते तस्मादत्र पर्वतेऽग्निरस्तीति स्वयमेवं प्रतिपद्यते तत्स्वार्थानुमानम् । यत्तु कश्चिद् धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवं वाक्यं प्रयुङ्क्ते तत् परार्थानुमानम् । तद्

यथा । पर्वतोऽयमग्निमान् । धूमवत्त्वात् । यो धूमवान् सोऽग्निमान्। यथा महानसः । तथा चायं तस्मात्तथेति । अनेन वाक्येन प्रतिपादितात् पञ्चावयवोपपन्नाल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते । तेनैतत् परार्थानुमानम् । अत्र पर्वतेऽग्निमत्त्वं साध्यम् । धूमवत्त्वं हेतुः । स चान्वयव्यतिरेकी । अन्वयेन व्यतिरेकेण च व्याप्तेः । तथाहि यत्र धूमवत्त्वं तत्राग्निमत्त्वं यथा महानस इत्यन्वयव्याप्तिः। महानसे धूमाग्न्योरन्वयसद्भावदर्शनात् । एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकेण व्याप्तिः । महाह्रदेऽग्निधूमव्यतिरेकस्य सद्भावदर्शनात् । व्यतिरेकव्याप्तेरयं क्रमः । अन्वयव्याप्तौ यद् व्याप्यं तदभावोऽत्र व्यापकोऽन्वयव्याप्तौ यच्च व्यापकं तदभावोऽत्र व्याप्य इति । तदुक्तम्—

'व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ।।
अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते ।
साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनान्वयः ।।'
व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम् ।
एवं स्फुटीकृता व्याप्तिः स्फुटीभवति तत्त्वतः ।।

तदेवं धूमवत्त्वे हेतावन्वयेन व्यातिरेकेण च व्याप्तिरस्ति। यत्तु वाक्ये केवलान्वयव्याप्तिरेव प्रदर्श्यते तदेकेनापि चरितार्थत्वात् । अत्राप्यन्वयस्यावक्रत्वात् प्रदर्शनम् । ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण साधनायोगात्। न तु व्यतिरेकव्याप्तेरभावात्। तदेवं धूमवत्त्वं हेतुरन्वयव्यतिरेकी। एवमन्येऽप्यनित्यत्वादौ साध्ये कृतकत्वादयो हेतवोऽन्वयव्यतिरेकिणो द्रष्टव्याः। कश्चिद् हेतुः केवलव्यतिरेकी । तद् यथासात्मकत्वे साध्ये प्राणादिमत्त्वं हेतुः । यथा जीवच्छरीरं सात्मकम् । प्राणादिमत्त्वात् । यत् सात्मकं न भवति

तत् प्राणादिभिन्न भवति यथा घटः। नेदं जीवच्छरीरं तथा, तस्मान्न तथेति। अत्र हि जीवच्छरीरस्य सात्मकं साध्यं प्राणादिमत्त्वं हेतुः। स च केवलव्यतिरेकी। अन्वयव्याप्तेरभावात्। तथाहि – यत् प्राणादिमत् तत् सात्मकं यथामुक इति दृष्टान्तो नास्ति। जीवच्छरीरं सर्वं पक्ष एव। लक्षणमपि केवलव्यतिरेकी हेतुः। यथा पृथिवीलक्षणं गन्धवत्त्वम्। विवादपदं पृथिवीति व्यवहर्तव्यं गन्धवत्त्वाद्। यन्न पृथिवीति व्यवह्रियते तन्न गन्धवद्। यथा आपः। प्रमाणलक्षणं वा यथा प्रमाकरणत्वम्। तथाहि-प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यं प्रमाकरणत्वात्। यत् प्रमाणमिति न व्यवह्रियते न तत् प्रमाकरणं यथा प्रत्यक्षाभासादि। न पुनरत्र यत् प्रमाकरणं तत् प्रमाणमिति व्यवहर्तव्यं यथामुक इत्यन्वयदृष्टान्तोऽस्ति प्रमाणमात्रस्य पक्षीकृतत्वात्। अत्र व्यवहारः साध्यो न तु प्रमाणत्वं तस्य प्रमाकरणत्वाद् हेतोरभेदेन साध्याभेददोषप्रसङ्गात्। तदेवं केवलव्यातिरेकिणो दर्शिताः।

कश्चिदन्यो हेतुः केवलान्वयी। यथा – विशेषोऽभिधेयः। प्रमेयत्वात्। यत् प्रमेयं तदभिधेयम्। यथा घटः। तथा चायं तस्मात् तथेति। अत्र विशेषस्याभिधेयत्वं। साध्यं प्रमेयत्वं हेतुः। स च केलवान्वय्येव। यदभिधेयं न भवति तत् प्रमेयमपि न भवति यथामुक इति व्यतिरेकदृष्टान्ताभावात्। सर्वत्र हि प्रामाणिक एवार्थो दृष्टान्तः स च सर्वोऽपि प्रमेयत्वाभिधेयश्चेति। एतेषां चान्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिहेतूनां त्रयाणां मध्ये यो हेतुरन्वयव्यतिरेकी स पञ्चरूपोपपन्न एव स्वसाध्यं साधयितुं क्षमते न केनापि रूपेण हीनः। तानि पञ्च रूपाणि पक्षधर्मत्वम्, सपक्षे सत्त्वम्, विपक्षाद् व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेति। एतानि पञ्च रूपाणि धूमवत्त्वादन्वयव्यतिरेकिणि हेतौ

विद्यन्ते। तथा हि–धूमवत्वं पक्षस्य पर्वतस्य धर्मः। पर्वते तस्य विद्यमानत्वात्। एवं सपक्षे सत्त्वं सपक्षे महानसे विद्यत इत्यर्थः। विपक्षान्महाह्रदाद् व्यावृत्तिस्तत्र नास्तीत्यर्थः। एवमबाधितविषयं धूमवत्वम्। तथा हि–धूमवत्वस्य हेतोर्विषयः साध्यो धर्मस्त-च्चाग्निमत्त्वं केनापि प्रमाणेन न बाधितं न खण्डितमित्यर्थः। एवमसन् प्रतिपक्षो यस्येत्यसत्प्रतिपक्षं धूमवत्त्वम्। तथा हि-साध्य-विपरीतसाधकं हेत्वन्त्तरं प्रतिपक्ष इत्युच्यते स च धूमवत्त्वे हेतौ नास्त्येवानुपलम्भात्। तदेवं पञ्चैव रूपाणि धूमवत्त्वे हेतौ विद्यन्ते। तदेवं धूमवत्त्वमग्निमत्त्वस्य गमकम्। तेनैवं धूमवत्त्वमग्निमत्त्वस्य साधकम्। अग्नेः पक्षधर्मत्वं हेतोः पक्षधर्मताबलात् सिद्ध्यति। यथाहि–अनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता चेति। तत्र व्याप्त्या साध्यसामान्यस्य सिद्धिः। पक्षधर्मताबलात् साध्यस्य पक्षसंबन्धित्वं विशेषः सिद्ध्यति। पक्षधर्मेण धूमवत्त्वेन वह्निरपि पर्वतसंबद्ध एवानुमीयते। अन्यथा साध्यसामान्यस्य व्याप्तिग्रा-हकादेव सिद्धेः कृतमनुमानेन। यस्त्वन्योऽप्यन्वयव्यतिरेकी हेतुः स सर्वः पञ्चरूपोपपन्न एव सन् हेतुः। अन्यथा हेत्वाभासः, अहेतु-रिति यावत्। केवलान्वयी चतूरूपोपपन्न एव स्वसाध्यं साधयति। तस्य हि विपक्षाद्व्यावृत्तिर्नास्ति विपक्षाभावात्। केवलव्यतिरेकी चतूरूपोपयुक्तः। तस्य सपक्षे सत्वं नास्ति सपक्षाभावात्। के पुनः पक्षसपक्षविपक्षाः। उच्यन्ते। संदिग्धसाध्यधर्मा धर्मी पक्षः। यथा धूमानुमाने पर्वतः पक्षः। निश्चितसाध्यधर्म धर्मी सपक्षः। यथा तत्रैव धूमानुमाने महानसः। विपक्षस्तु निश्चितसाध्याभा-ववान् धर्मी। यथा तत्रैव महाह्रद इति। तदेवमन्वयव्यतिरेकिके-वलान्वयिकेवलव्यतिरेकीणस्त्रयोपि दर्शिताः। अतोऽन्ये हेत्वाभासाः।

ते चासिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमभेदात् पञ्चैव। तत्रासिद्धस्त्रिविधः–आश्रयासिद्धः स्वरूपासिद्धो व्याप्य-

त्वासिद्धश्च। आश्रयासिद्धो यथा—गगनारविन्दं सुरभ्यरविन्दत्वात् सरोजारविन्दवत्। अत्र हि गगनारविन्दमाश्रयः स तु नास्त्येव। स्वरूपासिद्धो यथा—शब्दोऽनित्यश्चाक्षुषत्वाद् घटवत्। अत्र चाक्षुषत्वं हेतुः। स च शब्दे नास्त्येव श्रावणत्वात्। व्याप्यत्वासिद्धस्तु द्विधा। एको व्याप्तिग्राहकप्रमाणाभावमात्रात्। अपर उपाधिसद्भावात्। तत्र प्रथमो यथा—तत्र यत् सत् तत् क्षणिकम्। यथा घनः। संश्च शब्दादिः। सोपाधिकतया सत्वस्य व्याप्यत्वासिद्धावुच्यमानायां क्षणिकत्वमित्यभ्युपगतं स्यात्। द्वितीयो यथा—क्रत्वन्तर्वर्तिनी हिंसा अधर्मसाधनं हिंसात्वात्। क्रतुबाह्यहिंसावत्। तत्र ह्यधर्मत्वे हिंसात्वं न प्रयोजकं किं तु निषिद्धत्वमेव। प्रयोजकमुपाधिरिति यावत्। तथाहि—साध्यव्यापकत्वे सति साधनाव्यापक उपाधिरित्युपाधिलक्षणम्। तच्चास्ति निषिद्धत्वे। निषिद्धत्वं हि साध्यस्याधर्मत्वस्य व्यापकम्। यतो यत्र यत्राधर्मत्वं तत्र तत्रावश्यं निषिद्धत्वमपि। एवं साधनं हिंसात्वं न व्याप्नोति निषिद्धत्वम्। न हि यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वम्। यागीयपशुहिंसायां निषिद्धत्वाभावात्। तदेवं निषिद्धत्वस्योपाधेः सद्भावात् अन्यप्रयुक्तं व्याप्त्युपजीवि हिंसात्वं व्याप्यत्वासिद्धमेव। साध्यविपर्ययव्याप्तेस्तु विरुद्धः। स यथा—शब्दो नित्यः कृतकत्वादाकाशवत्। कृतकत्वं हि साध्यनित्यत्वविपरीत नित्यत्वेन व्याप्तम्। यतो यत् कृतकं तदनित्यमेव। न नित्यमित्यतो विरुद्धं कृतकत्वम्। सव्यभिचारोऽनैकान्तिकः। स द्विविधः। साधारणोऽसाधारणश्चेति। तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः। स यथा। नित्यः शब्दः प्रमेयत्वाद् व्योमवत्। अत्र हि प्रमेयत्वं हेतुः। स तु नित्यानित्यवृत्तिः। सपक्षाद् विपक्षाद् व्यावृत्तो यः सपक्ष एव वर्तते सोऽसाधारणनैकान्तिकः। स यथाभूर्नित्या गन्धवत्वात्। गन्धवत्वं हि सपक्षान्नित्याद् विपक्षादनित्याच्च व्यावृत्तं किं

भूमात्रवृत्ति। प्रकरणसमः स एव यस्य हेतोः साध्यविपरीतसाध-कान्नरं विद्यते। यथा शब्दोऽनित्यो नित्यधर्मरहितत्वात् शब्दो नित्योऽनित्यधर्मरहितत्वात्। अयमेव नामान्तरेण सत्प्रतिपक्ष इति चोच्यते। पक्षे प्रमाणान्तरावधृतसाध्याभावो हेतुर्बाधितविषयः का-लात्ययापदिष्ट इति चोच्यते यथाग्निरनुष्णः कृतकत्वाज्जलवत्। अत्र हि कृतकत्वस्य हेतोः साध्यमनुष्णत्वं तदभावः प्रत्यक्षेणैवा-वधारितः। स्पार्शनप्रत्यक्षेणोपलम्भात्। इति हेत्वाभासाः। व्या-ख्यातमनुमानम्।

अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमु-पमानम्। तथा हि गवयमजानन्नपि नागरिको यथा गौस्तथा गवय इति वाक्यं कुतश्चिदारण्यकपुरुषाच्छुत्वा वनं गतो वाक्यार्थं स्मरन् यदा गोसादृश्यविशिष्टं पिण्ड पश्यति तदा तद्वाक्यार्थस्मर-णसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमुपमानमुपमितिकरणत्वात्। गोसादृश्यविशिष्टपिलडज्ञानानन्तरमयमसौ गवयशब्दवाच्यः पिण्ड इति संज्ञासंज्ञिसंबन्धप्रतीतिरुपमितिः। सैव फलम्। इदं तु प्रत्य-क्षानुमानासाध्यप्रमासाधकत्वात् प्रमाणान्तरमुपमानमस्ति। इति व्याख्यातमुपमानम्॥

आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। वाक्यं त्वकाङ्क्षायोग्यतासंनिधिमतां पदानां समूहः। अतो गौरश्वः पुरुषोहस्तीति पदानि न वाक्यम्। परस्पराकाङ्क्षाविरहात्। [अग्नि-नासिञ्चेदित्यपि न वाक्यं योग्यतविरहात्।] न ह्यग्निसेकयोः पर-स्परान्वययोग्यतास्ति। तथाहि अग्निनेति तृतीया। सेकरूपं कार्यं प्रति करणत्वमग्नेः प्रतिपादितम्। न चाग्निः सेके करणीभवितुं योग्यः। तेन कार्यकरणभावलक्षणसंबन्धेऽग्निसेकयोरयोग्यत्वादतोऽ-ग्निना सिञ्चेदिति न वाक्यम्। एवमेकैकशः प्रहरे प्रहरेऽसहोच्च-

रितानि गामानयेत्यादिपदानि न वाक्यम्। सत्यामपि परस्परा-काङ्क्षायां सत्यामपि परस्परान्वययोग्यतायां परस्परसांनिध्याभा-वात्। यानि तु साकाङ्क्षाणि योग्यतावान्ति संनिहितानि पदानि तान्येव वाक्यम्। यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि। यथा च नदीतीरे पञ्च फलानि सन्तीति यथा च तान्येव गामान-येत्यादिपदान्यविलम्बितोच्चरितानि। नन्वत्रापि न पदानि साका-ङ्क्षाणि किं त्वर्थाः फलादीनामाधेयानां तीराद्याधाराकाङ्क्षितत्वात्। न च विचार्यमाणेऽर्था अपि साकाङ्क्षाः। आकाङ्क्षाया इच्छा-त्मकत्वेन चेतनधर्मत्वात्। सत्यम्। अर्थास्तावत् स्वपदश्रोतर्यन्यो-न्यविषयाकाङ्क्षाजनकत्वेन साकाङ्क्षा इत्युच्यते। तद्द्वारेण तत्प्र-तिपादकानि पदान्यपि साकाङ्क्षाणीत्युपचर्यन्ते। यद्वा पदान्येवा-र्थान् प्रतिपाद्यार्थान्तरविषयाकाङ्क्षाजनकानीत्युपचारात् साका-ङ्क्षाणि। एवमर्थाः साकाङ्क्षाः परस्परान्वययोग्यास्तद्द्वारेण पदा-न्यपि परस्परान्वययोग्यानीत्युच्यन्ते। संनिहितत्वं तु पदानामेकेनैव पुंसाविलिलम्बेनोच्चरितत्त्वम्। तच्च साक्षादेव पदेषु संभवति नार्थ-द्वारा। तेनायमर्थः संपन्नः। अर्थप्रतिपादानद्वारा श्रोतुः पदान्त-रविषयामर्थान्तरविषयां वाकाङ्क्षां जनयतां प्रतीयमानपरस्परा-न्वययोग्यार्थप्रतिपादकानां संनिहितानां पदानां समूहो वाक्यम्। पदं च वर्णसमूहः। समूहश्चात्रैकज्ञानविषयीभावः। एवं च वर्णानां क्रमवतामाशुतरविनाशित्वेनैकदानेकवर्णानुभवासंभवात् पूर्वपूर्ववर्णा-ननुभूयान्त्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेना-न्त्यवर्णसंबन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेणैकदैव सद-सदनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते सहकारिदार्ढ्यात् प्रत्यभि-ज्ञानवत्। प्रत्यभिज्ञानप्रत्यक्षे ह्यतीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनान्त्यपदविषयेण श्रोत्रेन्द्रि-येण पदार्थप्रत्ययानुगृहीतेनानेकपदावगाहिनी वाक्यप्रतीतिः क्रियते।

तदिदं वाक्यमाप्तपुरुषेण प्रयुक्तं सच्छन्दनामकं प्रमाणम् । फलं त्वस्य वाक्यार्थज्ञानम् । तच्चैतच्छब्दलक्षणं प्रमाणं लोके वेदे च समानम् । लोके त्वयं विशेषो यः कश्चिदेवाप्तो भवति न सर्वः । अतः किंचिदेव लौकिकं वाक्यं प्रमाणं यदाप्तवक्तृकम् । वेदे तु परमाप्तश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणं सर्वस्यैवाप्तवाक्यत्वात् ।। वर्णितानि चत्वारि प्रमाणानि । एतेभ्योऽन्यन्न प्रमाणम् । प्रमाणस्य सतोऽत्रैवान्तर्भावात् ।।

नन्वर्थापत्तिरपि पृथक् प्रमाणमस्ति । अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनमर्थापत्तिः । तथाहि पीनो देवदत्तो दिवा न भुङ्क्ते इति दृष्टे श्रुते वा रात्रिभोजनं कल्प्यते दिवाऽभुञ्जानस्य पीनत्वं रात्रिभोजनमन्तरेण नोपपद्यते, अतः पीनत्वान्यथानुपपत्तिप्रसूतार्थापत्तिरेव रात्रिभोजने प्रमाणम् । तच्च प्रत्यक्षादिभ्यो भिन्नं रात्रिभोजनस्य प्रत्यक्षाद्यविषयत्वात् । नैतत् । रात्रिभोजनस्यानुमानविषयत्वात् । तथा ह्ययं देवदत्तो रात्रौ भुङ्क्ते दिवाऽभुञ्जानत्वे सति पीनत्वात्, यस्तु न रात्रौ भुङ्क्ते नासौ दिवाभुञ्जानत्वे सति पीनो यथा दिवारात्रावभुञ्जानोऽपीनो न चायं तथा तस्मान्न तथेति केवलव्यतिरेकानुमानेनैव रात्रिभोजनस्य प्रतीयमानत्वात् किमर्थमर्थापत्तिः कल्पनीया ।।

नन्वभावाख्यमपि पृथक् प्रमाणमस्ति । तच्चाभावग्रहणायाङ्गीकरणीयम् । तथाहि घटाद्यनुपलब्ध्या घटाद्यभावो निश्चीयते अनुपलब्धिश्चोपलब्धेरभाव इत्यभावप्रमाणेन घटाद्यभावो गृह्यते । नैतत् । यद्यत्र घटोभविष्यत् तर्हि भूतलमिवाद्रक्ष्यदित्यादितर्कसहकारिणानुपलम्भसनाथेन प्रत्यक्षेणैवाभावग्रहणात् । नन्विन्द्रियाणि संबद्धार्थग्राहकाणि तथाहि – इन्द्रियाणि वस्तु प्राप्य प्रकाशकारीणि ज्ञानकारणत्वादालोकवत् । यद्वा चक्षुःश्रोत्रे वस्तु प्राप्य प्रकाशकारीणि

बहिरिन्द्रियत्वात्त्वगादिवत्। त्वगादीनां तु प्राप्यकारित्वमुभयवादिसिद्धमेव। न चेन्द्रियाभावयोः संबन्धोऽस्ति। संयोगसमवायौ हि संबन्धौ न च तौ तयोः स्तः। द्रव्ययोरेव संयोग इति नियमादभावस्य च द्रव्यत्वाभावात्। अयुतसिध्दत्वाभावान्न समवायोऽपि। विशेषणविशेष्यभावश्च संबन्ध एव न संभवति भिन्नोभयाश्रितैकत्वाभावात्। संबन्धो हि संबन्धिभ्यां भिन्नो भवत्युभयसंबन्ध्याश्रितश्चैकश्च यथा भेरीदण्डयोः संयोगः। सहि भेरीदण्डाभ्यां भिन्नस्तदुभयाश्रितश्चैकश्च न च विशेषणाविशेष्यभावस्तथा। तथाहि दण्डपुरुषयोर्विशेषणविशेष्यभावो न ताभ्यां भिद्यते। न हि दण्डस्य विशेषणत्वमर्थान्तरं नापि पुरुषस्य विशेष्यत्वमर्थान्तरमपि तु स्वरूपमेव। अभावस्यापि विशेषणत्वाद् विशेष्यत्वाच्च। न चात्र कस्यचित् पदार्थस्य द्रव्याद्यन्यतमस्य संभवः। तस्मादभावस्य स्वोपरक्तबुद्धिजनकत्वं यत् स्वरूपं तदेव विशेषणत्वं न तु तदर्थान्तरम्। एवं व्यापकत्वकारणत्वादयोऽप्यूह्याः। स्वप्रतिबद्धबुद्धिजनकत्वं स्वरूपमेव हि व्यापकत्वमग्न्यादीनाम्। कारणत्वमपि कार्यानुकृतान्वयव्यतिरेकि स्वरूपमेव हि तत्वादीनां न त्वर्थान्तरमभावस्यापि व्यापकत्वात् कारणत्वाद्वा। न ह्यभावे सामान्यादिसंभवः। तदेवं वशेषणविशेष्यभावो न विशेषणविशेष्यरूपाभ्यां भिन्नो नाप्युभयाश्रितो विशेषणे विशेष्यणभावमात्रस्य सत्वाद् विशेषभावस्याभावाद् विशेष्ये च विशेष्यभावमात्रस्य सद्भावाद् विशेषणभावयास्भावात्। नाप्येको विशेषणं च विशेष्यं च तयोर्भाव इति द्वन्द्वात् परः श्रूयमाणो भावशब्दः प्रत्येकमभिसंबन्ध्द्यते। तथा च विशेषणभावो विशेष्यभावश्चेत्यापन्नं द्वावेतावेकश्च सबन्धः। तस्माद्विशेषणविशेष्यभावो न संबन्धः। एवं व्याप्यव्यापकभावादयोऽपि। संबन्धशब्दप्रयोगस्तूभयनिरूपणीयत्वसाधर्म्येणोपचारात्। तथा चासंबद्धस्याभावस्येन्द्रियेण ग्रहणं न संभवति। सत्यम्। भावावच्छि-

न्नत्वाद् व्याप्त्यभावेऽर्थं प्रकाशयदिन्द्रियं प्राप्तमेव प्रकाशयति न स्वभावम्। अभावं प्रकाशयदिन्द्रियं विशेषणविशेष्यभावमुखेनैवेति सिद्धान्तः। असंबद्धाभावग्रहेऽतिप्रसङ्गदोषस्तु विशेषणतयैव निरस्तः समश्च परमते।

यत्रोभयोः समो दोषः परिहारोऽपि वा समः।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥

इदमिदानीं निरूप्यते। जलादिज्ञाने जाते तस्य प्रामाण्यमवधार्य कश्चिज्जलादौ प्रवर्तते। कश्चित्तु संदेहादेव प्रवृत्तः प्रवृत्त्युत्तरकालं जलादिप्रतिलम्भे सति प्रामाण्यमवधारयतीति वस्तुगतिः। अत्र कश्चिदाह– प्रागेव प्रामाण्यमवधार्य पुरुषः प्रवर्तते स्वत एव प्रामाण्यावधारणात्। अस्यार्थः - येनैव ज्ञानं गृह्यते तद्गतं प्रामाण्यमपि न तु ज्ञानग्राहकादन्यद् ज्ञानधर्मस्य प्रामाण्यस्य ग्राहकम्। तेन ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य ज्ञानं च प्रवृत्तेः पूर्वमेव गृहीतं कथमन्यथा। प्रामाण्याप्रामाण्यसंदेहोऽपि स्यात्। अनवगते धर्मिणि संदेहानुदयात्। तस्मात् प्रवृत्तेः पूर्वमेव ज्ञाततान्यथानुपपत्तिप्रसूतयार्थापत्त्या ज्ञाने गृहीते पुरुषेण ज्ञानगतं प्रामाण्यमप्यर्थापत्त्यैव गृह्यते ततः पुरुषः प्रवर्तते। ननु (तु?) प्रथमं ज्ञानमात्रं गृह्यते ततः प्रवृत्त्युत्तरकालं फलदर्शनेन ज्ञानस्य प्रामाण्यमवधार्यत इति। तत्रोच्यते – ज्ञाततान्यथानुपपत्तिप्रसूतयार्थापत्त्या ज्ञानं गृह्यत इत्युक्तं तदेव वयं न मृष्यामहे। तया प्रामाण्यग्रहस्तु दूरत एव। तथाहि – इदं किल परस्याभिमतम्। घटादिविषये ज्ञाने जाते मया ज्ञातोऽयं घट इति गटस्य ज्ञान (त?) त्वं प्रतिसंधीयते। तेन ज्ञाने जाते सति ज्ञातता नाम कश्चिद्धर्मो जात इत्यनुमीयते। तस्य च ज्ञानात् पूर्वमजातत्वात् ज्ञाने जाते च

ज्ञातत्वादन्वयव्यतिरेकाभ्यां ज्ञानेन जन्यत इत्यवधार्यते। एवं च ज्ञानजन्योऽसौ ज्ञातता नाम धर्मो ज्ञानमन्तरेण नोपपद्यते कारणाभावे कार्यानुदयात्। तेनार्थापत्त्या स्वकारणं ज्ञानं ज्ञाततयाक्षिप्यत इति। न चैतद् युक्तम्। ज्ञानविषयत्वातिरिक्तयोर्ज्ञाततायाअभावात्। ननु ज्ञानजनितज्ञातताधारत्वमेव हि घटादेर्ज्ञानविषयत्वम्। तथाहि – न तावत् तादात्म्येन विषयता घटज्ञानयोस्तादात्म्यानभ्युपगमात्। तदुत्पत्त्या तु विषयत्व इन्द्रियादेरपि विषयत्वापत्तिरिन्द्रियादेरपि तस्य ज्ञानस्योत्पत्तेः। तेनैतदनुमीयते ज्ञानेन घटे किंचिज्जन्यते येन घट एव तस्य ज्ञानस्य विषयो नान्यदिति ततो विषयत्वान्यथानुपपत्त्यैव ज्ञाततासिद्धिर्न प्रत्यक्षमात्रेण। मैवम्। स्वभावादेव विषयविषयितोपपत्तेः। अर्थज्ञानयोरेतादृश एव स्वाभाविको विशेषः येनानयोर्विषयविषयिभावः। इतरथातीतानागातयोर्विषयत्वं न स्यात्। ज्ञानेन तत्र ज्ञातताजननासंभवात्। असति धर्मिणि धर्मजननायोगात्। किं च ज्ञाततायाअपि ज्ञानविषयत्वात् तत्रापि ज्ञततापसङ्गः। तथा चानवस्था। अथ ज्ञाततान्तरमन्तरेणापि स्वभावादेव विषयत्वं ज्ञाततायाः, एवं चेद् घटादावपि किं ज्ञाततयेति। अस्तु वा ज्ञातता तथापि तन्मात्रेण ज्ञानं गम्यतें ज्ञतताविशेषेण प्रमाणज्ञानाव्यभिचारिणा ज्ञानप्रामाण्यमिति कुत एव ज्ञानग्राहकग्राह्यता प्रामाण्यस्य। अथ केनचिज्ज्ञातताविशेषेण प्रमाणज्ञानाव्यभिचारिणा ज्ञानप्रामाण्ये सहैव गृह्यते। एवं चेदप्रामाण्येऽपि शक्यमिदं वक्तं केनचिज्ज्ञातताविशेषेणाप्रमाणज्ञानाव्यभिचारिणा ज्ञानाप्रामाण्ये सहैव गृह्योते इत्यप्रामाण्यमपि स्वत एव गृह्यते। अथैवमप्रामाण्यं परतस्तथा प्रामाण्यमपि परत एव गृह्यताम्। ज्ञानग्राकादन्यत इत्यथः। ज्ञानं हि मानसप्रत्यक्षेण गृह्यतें प्रामाण्यं पुनरनुमानेन। तथा हि जलज्ञानानन्तरं जलार्थिनः प्रवृत्तिः। सापि द्विधा। फलवत्यफला च। तत्र

फलबती या प्रवृत्तिः सा समर्था तथा ज्ञानस्य प्रामाण्यमनुमीयते। प्रयोगश्च। विवादाध्यासितं जलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वाद् यत्तु न प्रमाणं न तत् समर्थां प्रवृत्तिं जनयति यथा प्रमाणाभास इति केवलव्यतिरेकी। अत्र च फलवत्प्रवृत्तिजनकं यज्जलज्ञानं तत् पक्षः। तस्य प्रामाण्यं साध्यम्। यथार्थत्वमित्यर्थः। न तु प्रमा [कर ?] णत्वं स्मृत्यां व्यभिचारापत्तेः। हेतुस्तु समर्थप्रवृत्तिजनकत्वं फलवत्प्रवृत्तिजनकत्वमिति यावत्। अनेन तु केवलव्यतिरेकानुमानेनाभ्यासदशापन्नस्य प्रामाण्येवबोधिते तद्दृष्टान्तेन प्रवृत्तेः पूर्वमपि तज्जातीयत्वेन लिङ्गेनान्वयव्यतिरेकानुमानेनान्यज्ञानस्यानभ्यासदशापन्नस्य प्रामाण्यमनुमीयत इति। तस्मात् परत एव प्रामाण्यं न ज्ञानग्राहकेणैव गृह्यत इति।

चत्वार्येव प्रमाणानि युक्तिलेशोक्तिपूर्वकम्।
केशवो बालबोधाय यथाशास्त्रमवर्णयत्॥

इति प्रामाणपदार्थः समाप्तः॥

इति प्रमाणान्युक्तानि प्रमेयाण्युच्यन्ते। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः प्रमेयमिति सूत्रम्। तत्रात्मत्वसामान्यवानात्मा। स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभुश्च। स च मानसप्रत्यक्षः। विप्रतिपत्तौ बुध्यादिगुणलिङ्गकः। तथाहि बुध्यादयस्तावद्गुणाः। अनित्यत्वे सत्येकेन्द्रियमात्रग्राह्यत्वाद् रूपवत्। गुणश्च गुण्याश्रित एव। तत्र बुध्यादयो गुणा न भूतानां मानसप्रत्यक्षत्वात्। ये हि भूतानां गुणास्ते मनसा न गृह्यन्ते यथा रूपादयः। नापि दिक्कालमनसां गुणा विशेषगुणत्वात्। ये हि दिगादिगुणाः संख्यादयो न ते विशेषगुणास्ते हि सर्वद्रव्यसाधारणगुणा एव। बुध्यादयस्तु विशेषगुणाः। गुणत्वे सत्यकेन्द्रियग्राह्यत्वात् रूपवदतो न

दिगादिगुणाः। तस्मादेभ्योऽष्टभ्योऽतिरिक्तो बुद्ध्यादीनां गुणी एषितव्यः स एवात्मा। प्रयोगश्च। बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यो हि न पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः स पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणो न भवति यथा रूपादिः। इति केवलव्यतिरेकी। अन्वयव्यतिरेकी वा। यथा हि बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यो यदनाश्रितो गुणः स तदतिरिक्ताश्रितो भवति। यथा पृथिव्याद्यनाश्रितः शब्दः पृथिव्याद्यतिरिक्ताकाशाश्रय इति। तथाहि शब्दादयः पृथिव्याद्यष्टद्रव्यातिरिक्तकाशाद्याक्षिता इति। तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तं नवमं द्रव्यमात्मा सिद्धः। स च सर्वकार्योपलम्भाद्विभुः। परममहत्परिमाणवानित्यर्थः। विभुत्वाच्च नित्योऽसौ व्योमवत्। सुखादीनां वैचित्र्यात् प्रतिशरीरं भिन्नः।

तस्य भोगायतनं शरीरम्। सुखदुःखान्यतरानुभवो भोगः। स च यदवच्छिन्न आत्मनि जायते तद्भोगायतनम्। तदेव शरीरम्। चेष्टाश्रयो वा शरीरम्। चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रिया न तु स्पन्दनामात्रम्।

शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियम्। अतीन्द्रियमित्युच्यमाने कालादेरिन्द्रियत्वप्रसङ्गोऽत उक्तं ज्ञानकरणमिति। तथापि ज्ञानकरणमतीन्द्रियमिन्द्रियमित्युच्यमाने इन्द्रियार्थसंनिकर्षे प्रसङ्गः, अत उक्तं शरीरसंयुक्तमिति। शरीरसंयुक्तं ज्ञानकरणमित्युच्यमाने आलोकादेरपीन्द्रियत्वप्रसङ्गोऽत उक्तमतीन्द्रिमिति। तानि चेन्द्रियाणि षट्। घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि। तत्र गन्धोपलब्धिसाधनमिन्द्रियं घ्राणम्। नासाग्रवर्ति। तच्च पार्थिवं गन्धवत्त्वात्। गन्धवत्त्वं च गन्धग्राहकं घ्राणम्। अतो गन्धवद्

यदिन्द्रियं रूपादिषु पञ्चसु मध्ये यं गुणं गृह्णाति तदिन्द्रियं तद्गुणसंयुक्तम्। यथा चक्षूरूपग्राहकं रूपवत्। रसोपलब्धिसाधनमिन्द्रियं रसनम्। जिह्वाग्रवर्ति। तच्चाप्यं रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वाल्लालावत्। रूपोपलब्धिसाधनमिन्द्रियं चक्षुः। कृष्णताराग्रवर्ति। तच्च तैजसं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् प्रदीपवत्। स्पर्शोपलब्धिसाधममिन्द्रियं त्वक्। सर्वशरीरव्यापि। त्वक्स्थम्। तच्च वायवीयं रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वादङ्गसङ्गिसलिलशैत्याभिव्यञ्जकत्वाद् व्यजनवातवत्। शब्दोपलब्धिसाधनमिन्द्रियं श्रोत्रम्। तच्च कर्णशष्कुल्यवच्छिन्नमाकाशमेव न द्रव्यान्तरं शब्दगुणत्वात्।तदपि शब्दस्यैव ग्राहकत्वात् शब्दवत्। यदिन्द्रियं रूपादिषु पञ्चसु मध्ये यद्गुणग्राहकं तत् तद्गुणयुक्तमेव भवति यथा चक्षू रूपग्राहकं रूपवत्। शब्दग्राहकं च श्रोत्रमतः शब्दगुणकम्। सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्चाणुपरिमाणम्। ननु चक्षुरादीन्द्रियसद्भावे किं प्रमाणम्। उच्यते। अनुमानमेव। तथाहि रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात्। छिदावत्।

अर्थाः षट् पदार्थाः। ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाः। प्रमाणादयो यद्यप्यत्रैवान्तर्भवन्ति तथापि प्रयोजनवशाद्भेदेन कीर्तिताः। तत्र समवायिकारणं द्रव्यं गुणाश्रयो वा। तानि च द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। तत्र पृथिवीत्वसामान्यवती पृथिवी। काठिन्यकोमलत्वादिना [ना?] वयवसंयोगविशेषयुक्ता घ्राणशरीरमृत्पाषाणवृक्षादिरूपा। गन्धरूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। सा नित्या चानित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। द्विविधायाः पृथिव्या रूपरसगन्धस्पर्शा अनित्याः

पाकजाश्च। पाकस्तु तेजःसंयोगः। तेन पृथिव्याः पूर्वरूपादयो नश्यन्त्यन्ये जन्यन्त इति पाकजाः।

अप्त्वसामान्ययुक्ता आपः। रसनेन्द्रियशरीरं (र?) सरित्समुद्रहिमकरकादिरूपाः। गन्धवर्जं स्नेहयुक्तपूर्वोक्तगुणवत्यः। नित्या अनित्याश्च। नित्यानां हि रूपादयो नित्या एव। अनित्यानां रूपादयोऽनित्या एव।

तेजस्त्वसामान्यवत् तेजः। चक्षुःशरीरसुवर्णसवितृवह्निविद्युदादिप्रभेदम्। दिव्यं भौममुदर्यमाकरं (रजं?) चेति। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्। तेजो नित्यमनित्यं च पूर्ववत्। तच्चतुर्विधम्। उद्भूतरूपस्पर्शमनुद्भूतरूपस्पर्शमनुद्भूतरूपोद्भूतस्पर्शमुद्भूतरूपमनुद्भूतस्पर्शं चेति। तत्रोद्भूतरूपस्पर्शं यथा – पिण्डितं तेजो वह्न्यादिकम्। सुवर्णं तूद्भूताभिभूतरूपस्पर्शं नानुद्भूतरूपस्पर्शम्। अनुद्भूतरूपत्वेऽचाक्षुषं स्यादनुद्भूतस्पर्शत्वे न त्वचा गृह्येत। अभिभवस्तु बलवत्सजातीयेन पार्थिवरूपेण स्पर्शेन च कृतः। अनुद्भूतरूपस्पर्शं तेजो यथा – चक्षुरिन्द्रियम्। अनुद्भूतरूपोद्भूतस्पर्शं यथा – तप्तवारिस्थं तेजः। उद्भूतरूपमनुद्भूतस्पर्शं यथा – प्रदिपप्रभामण्डलम्।

वायुत्वाभिसंबन्धवान् वायुः। त्वगिन्द्रियशरीरवातप्राणादिभेदभिन्नः स्पर्शसंख्यापरिमाणपृथक्संयोगविभागपरत्वावेगवान्। स च स्पर्शानुमेयः। तथाहि – योऽयं वायौ वात्यनुष्णाशीतः स्पर्श उपलभ्यते सगुणत्वाद् गुणिनमन्तरेणानुपपद्यमानो गुणिनमनुमापयति। गुणी च वायुरेव। पृथिव्याद्यनुपलब्धेः। पृथिवीवायुव्यतिरेकेणानुष्णशीतस्पर्शाभावात्। स च द्विविधो नित्यानित्यभेदात्। नित्यः परमाणुरूपोऽनित्यः कार्यरूपः।

तत्र पृथिव्यादीनां चतुर्णां कार्याणामुत्पत्तिविनाशप्रकारः कथ्यते। द्वयोः परमाण्वोः क्रियया संयोगे सति द्व्यणुकमुत्पद्यते। तस्य परमाणू समवायिकारणम्। तत्संयोगोऽसमवायिकारणम्। अदृष्टादि निमित्तकारणम्। तत्र त्रयाणां द्व्यणुकानां क्रियया संयोगे सति त्र्यणुकमुत्पद्यते। तस्य द्व्यणुकानि समवायिकारणम्। शेषं पूर्ववत्। एवं चतुरणुकं त्र्यणुकैश्चतुर्भिः चतुरणुकैश्चापरं स्थूलतरम् तैरपरं स्थूलतमम्। एवं क्रमेण महती पृथिवी महत्यश्चापो महत् तेजो महांश्च वायुरुत्पद्यते। कार्यगता रूपादयः स्वाश्रयसमवायिकारणगतेभ्यो रूपादिभ्यो जायन्ते कारणगुणा हि कार्यगुणानारभन्त इति न्यायादित्येवमुत्पत्तिः। ततो रूपादिमतः कार्यद्रव्यस्य घटादेरवयवे कपालादौ नोदनादभिघाताद्वा क्रिया तया विभागस्तेनावयव्यारम्भकस्यासमवायिकारणीभूतस्य संयोगस्य नाशः क्रियते। ततः कार्यद्रव्यस्यावयविनो घटादेर्नाशः। एतेनासमवायिकारणनाशे द्रव्यनाशो दर्शितः। क्वचित् समवायिकारणनाशे द्रव्यनाशः। तथा पूर्वोक्तपृथिव्यादेः संहारे संजिहीर्षोर्महेश्वरस्य संजिहीर्षा जायते ततोऽणुषु क्रिया तया विभागस्तस्मात् संयोगनाशे द्व्यणुकेषु नष्टेष्वाश्रयनाशात् त्र्यणुकादिनाशक्रमेण पृथिव्यादिनाशः। तथा च तन्तुनाशे पटनाशः। तद्गतानां च रूपादीनामाश्रयनाशेनैव नाशः। अन्यत्र तु सत्येवाश्रये विरोधिगुणप्रादुर्भावेन (ण?) विनाशः। यथा वा पाकेन घटादे रूपादिनाश इति।

किं पुनः परमाणुसद्भावे प्रमाणम्। उच्यते। यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं रज उपलभ्यते तत् स्वल्पपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वाद् घटवत्। तच्च द्रव्यं कार्यमेव महद्रव्यारम्भकस्य कार्यत्वनियमात्। तदेवं द्व्यणुकाख्यं द्रव्यान्तरं

सिद्धम् । तदापि स्वल्पपरिमाणसमवायिकारणा [र?]ब्धं कार्य-द्रव्यत्वाद् घटवत्। एवं यस्तु व्यणुकाम्भकः स एव परमाणुः स चानारब्ध एवेति । ननु कार्यद्रव्यारम्भकस्य कार्यत्वाव्यभिचारात् कथमनारब्धत्वम्। उच्यते। न। अनन्तकार्यपरंपरादोषप्रसङ्गात्। तथा च सत्यनन्तद्रव्यारब्धत्वाविशेषेण सुमेरुसर्षपयोरपि तुल्यपरि-माणत्वप्रसङ्गात्। तस्मादनारब्ध एव परमाणुः। व्यणुकं तु द्वाभ्यामेव परमाणुभ्यामारभ्यते एकस्यानारम्भकत्वात्। त्र्यादि-कल्पनायां प्रमाणाभावात्। व्यणुकारब्धं द्रव्यं त्रिभिरेव व्यणु-कैरारभ्यते एकस्यानारम्भकत्वात्। द्वाभ्यामारम्भे कार्यगतमह-त्त्वानुपपत्तिप्रसङ्गात्। कार्ये हि महत्त्वं कारणमहत्त्वात्कारणबहु-त्वाद्वा। तत्र प्रथमस्यासंभवाच्चरममेषितव्यम्। न च चतुरादि-कल्पनायां प्रमाणमस्ति त्रिभिरेव महत्त्वारम्भोपपत्तिरिति ।

शब्दगुणमाकाशम् । संख्यापरिमाणपृथक्त्वसंयोगविभागवदेकं विभु नित्यं शब्दलिङ्गकं च। शब्दलिङ्गत्वमस्य कथम् । पारिशेष्यात्। तथाहि – शब्दस्तावद् विशेषगुणः। सामान्यवत्त्वे सत्यस्मदादिबा-ह्यैकेन्द्रियग्राह्यक (?) त्वाद् रूपादिवत्। गुणश्च गुण्याश्रित एव। न चास्य पृथिव्यादिचतुष्टयमात्मा वा गुणी भवितुमर्हति श्रोत्र-ग्राह्यत्वाच्छब्दस्य। ये पृथिव्यादिगुणा न ते श्रोत्रेण गृह्यन्ते यथा रूपादयः। शब्दस्तु श्रोत्रेण गृह्यते अतो न तेषां गुणः। दिक्का-लमनसां च न गुणो विशेषगुणत्वात्। एभ्योऽतिरिक्तः शब्दस्य गुणी अनुमीयते। स एवाकाश इति। स चैको भेदे प्रमाणाभा-वादेकस्योपपत्तेः। एकत्वेन चाकाशत्वं नाम सामान्यमाकाशे न विद्यते सामान्यस्यानेकवृत्तित्वात्। विभु चाकाशम्। परममहत्प-रिमाणवदित्यर्थः। सर्वत्र तत्कार्योपलब्धेः। अत एव एव विभु-त्वान्नित्यमिति ।

कालोऽपि दिग्विपरीतपरत्वापरत्वानुमेयः। संख्यापरिमाणपृथक्त्वसंयोगविभागवान्। एको नित्यो विभुश्च। कथमस्य दिग्विपरीतपरत्वापरत्वानुमेयत्वम्। उच्यते। संनिहिते वृद्धे संनिधानादपरत्वार्हे विपरीतं परत्वं प्रतीयते। व्यवहिते यूनि व्यवधानात् परत्वार्हे विपरीतमपरत्वं प्रतीयते। तदिदं दिग्विपरीतं परत्वमपरत्वं च कार्यं तत्कारणस्य दिगादेरसंभवात् कालमेव कारणमनुमापयति। स चैकोऽपि वर्तमानातीतभविष्यत्क्रियोपाधिवशात् वर्तमानादिव्यपदेशं लभते पुरुष इव। यथाहि पच्यादिक्रियोपाधिवशात् पाचकयाचकादिव्यपदेशं लभते। नित्यविभुत्वे चास्य पूर्ववत्।

कालविपरीतपरत्वापरत्वानुमेया दिगेका नित्या विभ्वी च। संख्यापरिमाणपृथक्त्वसंयोगविभागगुणवती पूर्वादिप्रत्ययैरनुमेया तेषामन्यनिमित्तसंभवात्। पूर्वस्मिन् पश्चमे वा वस्तुनस्तादवस्थ्यात्। सा चैका विभुः (भ्वी?) सवितुः [?] स्तत्तद्देशसंयोगोपाधिवशात् प्राच्यादिसंज्ञां लभते।

आत्मात्वाभिसंबन्धकानात्मा। सुखदुःखादिवैचित्र्यान्नानाभूत एव। स चोक्त एव। तस्य गुणाः संख्यादयः पञ्च। बुद्ध्यादयो नव। नित्यविभुत्वे चास्य पूर्ववत्।

मनस्त्वाभिसंबन्धवन्मनः अणुसंयोगिमनोऽन्तरिन्द्रियम्। सुखाद्युपलम्भकरणम्। नित्यं च संख्याद्यष्टगुणवत्। यत्संयोगेनं बाह्येन्द्रियमर्थग्राहकम्। अत एव सर्वोपलब्धिसाधनम्। तच्चाप्रत्यक्षमपि त्वनुमानगम्यम्। तथाहि – सुखाद्युपलब्धयश्चक्षुराद्यतिरिक्तकरणसाध्याः। अत(स?)त्स्वपि चक्षुरादिषु जायमानत्वात्। छिदावत्। यच्च करणं तन्मनः। तच्चाणुपरिमाणम्।

द्रव्याण्युक्तानि। गुणा उच्यन्ते।। सामान्यवानसमवायिकार-

णमस्पन्दात्मा गुणः। स च द्रव्याश्रितः। रूपरसगन्धस्पर्शसंख्या-परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिरेव।

तत्र रूपं चक्षुरिन्द्रियमात्रग्राह्यो विशेषगुणः। पृथिव्यादित्रयवृत्ति। तत्र शुक्लाद्यनेकप्रकारं पाकजं पृथिव्याम्। तच्चानित्यं पृथिवीमात्रगतम्। आप्यं तैजसं परमाण्वोर्नित्यं कार्येष्वनित्यम्। शुक्लभास्वरमपाकजं तेजसि। तदेवाभास्वरमप्सु।

रसो रसनेन्द्रियग्राह्यो विशेषगुणः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां मधुरादिषट्प्रकारः पाकजश्च। अप्सु मधुरोऽपाकजः। स द्विविधो नित्यानित्यात्मा। नित्यः परमाणुभूताप्सु। कार्यास्वप्स्वनित्य इति।

गन्धो घ्राणग्राह्यगुणः। पृथिवीमात्रवृत्तिः। सुरभिरसुरभिश्च। जलादौ तु गन्धप्रतिभानं संयुक्तसमवायेन द्रष्टव्यम्।

स्पर्शस्त्वगिन्द्रियग्राह्यगुणः। पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। शीतः पयसि। उष्णस्तेजसि। अनुष्णाशीतः पृथ्वीवाय्वोः। पृथिव्यां पाकजः। स एवापाकजो वायौ। पृथिवीमात्रे ह्यनित्यः। आप्यतैजसवायवीयपरमाणुषु नित्यः। आप्यादिकार्येष्वनित्यः। एते रूपादयश्चत्वारो महत्त्वैकार्थसमवेतत्वे सत्युद्भूतरूपा एव प्रत्यक्षाः।

संख्या एकत्वादिव्यवहारहेतुः सामान्यगुणः। एकत्वादिपरार्धपर्यन्ता। तत्रैकत्वं द्विविधं नित्यानित्यभेदात्। नित्यगतं तु नित्यं कार्यगतं त्वनित्यम्। स्वाश्रयसमवायिकारणैकत्वजन्यं च। द्वित्वाद्या(द्य?) नित्यमेव। तच्च द्वयोः पिण्डयोरिदमेकमिदमेक-

मित्यपेक्षाबुद्ध्या जन्यते । तत्र पिण्डौ समवायिकारणे पिण्डयोरेकत्वे असमवायिकारणम् । अपेक्षाबुद्धिर्निमित्तम् । अपेक्षाबुद्धिविनाशादेव द्वित्वविनाशः । एवं त्रित्वाद्युत्पत्तिः ।

परिमाणं मानव्यवहारकारणम् । तच्चतुर्विधम् । अणु महद् दीर्घं ह्रस्वं चेति । तत्र कार्यगतं परिमाणं संख्यापरिमाणप्रचय-योनि । तद् यथा । द्व्यणुकपरिमाणमीश्वरापेक्षाबुद्धिजन्यपरमाणुद्वि-त्वजनितत्वात् संख्यायोनि संख्याकारकमित्यर्थः । त्र्यणुकपरिमाणं च स्वाश्रयसमवायिकारणगतबहुत्वसंख्यायोनि । चतुरणुकादीनां तु स्वाश्रयसमवायिकारणपरिमाणजन्यम् । तूलपिण्डपरिमाणं तु स्वा-श्रयसमवायिकारणावयवानां प्रशिथिलसंयोगजम् । परमाणुपरिमाणं परममहत्परिमाणं चाकाशादिगतं नित्यमेव ।

पृथक्त्वं पृथग्व्यवहारहेतुः । तच्च द्विविधम् । एकपृथक्त्वं द्विपृथक्त्वं च । तत्राद्यं नित्याश्रितं नित्यमनित्याश्रितमनित्यम् । द्विपृथक्त्वादिकमनित्यमेव ।

संयोगः संयुक्तव्यवहारहेतुः । स द्व्याश्रयो व्याप्यवृत्तिश्च । स त्रिविधः । अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति । तत्रान्यतर-कर्मजो यथा क्रियावता श्येनेन सह निष्क्रियस्य स्थाणोः संयोगः । विभूनां मूर्तैश्च संयोगः । उभयकर्मजो यथा – सक्रिययोर्मल्लयोः संयोगः संयोगजसंयोगो यथा – कारणाकारणसंयोगात् । कार्याकार्य-संयोगः । यथा हस्ततन्तुसंयोगेन कार्यतन्तुसंयोगः ।

विभागो विभक्तप्रत्ययहेतुः । संयोगपूर्वको द्व्याश्रयः स च त्रिविधः– अन्यतरकर्मज उभयकर्मजो विभागजश्चेति । तत्र प्रथमो यथा – श्येनक्रियया शैलश्येनविभागः । द्वितीयो यथा – मल्लयो-र्विभागः । तृतीयो यथा – हस्ततरुविभागात् कार्यतरुविभागः ।

परत्वापरत्वे परापरव्यवहारकारणे। ते तु द्विविधे दिक्कृते कालकृते च। तत्र दिक्कृतयोरुत्पत्तिः कथ्यते। एकस्यां दिश्यवस्थितयोः पिण्डयोरिदमस्मात् संनिकृष्टमिति भुद्धयानुगृहीतेन दिक्पिण्डसंयोगेनापरत्वं संनिकृष्टे जन्यते। विप्रकृष्टबुद्धया तु परत्वं विप्रकृष्टे जन्यते। संनिकर्षस्तु पिण्डस्य द्रष्टुः शरीरापेक्षया संयुक्तसंयोगाल्पीयस्त्वम्। विप्रकर्षस्तु संयोगभूयस्त्वम्। कालकृतयोस्तु परत्वापरत्वयोरुत्पत्तिः कथ्यते। अनियतदिग्व्यवस्थितयोर्युवस्थविरपिण्डयोरयमस्मादल्पतरकालेन संबद्ध इत्यपेक्षाबुद्ध्यानुगृहीतेन कालपिण्डसंयोगेन यून्यपरत्वम्। अयमस्मात् प्रचुरकालेन संबद्ध इति धिया स्थविरे परत्वम्।

गुरुत्वमाद्यपतनासमवायि कारणम्। अदृष्टत्वे सति पृथिवीजलवृत्ति। यथोक्तम्— 'संयोगवेगप्रयत्नाभावे सति गुरुत्वात् पतनम्' इति।

द्रवत्वमाद्यस्यन्दनासमवायिकारणम्। भूतेजोजलवृत्ति। भूतेजसोर्घृतादिसुवर्णयोरग्निसंयोगेन द्रवत्वात्। तयोर्नैमित्तिकं द्रवत्वम्। जले नैसर्गिकम्।

स्नेहश्चिक्कणता। जलमात्रवृत्तिः। कारणगुणपूर्वको गुरुत्वादिवद्। यावद्द्रव्यभावी।

शब्दः श्रोत्रग्राह्य आकाशस्य विशेषगुणः। ननु कथमस्य श्रोत्रेण ग्रहणम्। यतो भेर्यादिदेशे शब्दो जायते श्रोत्रं तु पुरुषदेशेऽस्ति। भेरीदेशे जातः शब्दो वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा संनिहितं शब्दान्तरमारभते। स च शब्दः शब्दान्तरमिति क्रमेण श्रोत्रदेशे जातोऽन्यः (न्त्यः?) शब्दः श्रोत्रेण गृह्यते न त्वाद्यो नापि मध्यमः। एवं वंशे पाट्यमाने दलद्व-

यविभागदेशे जातः शब्दः शब्दान्तरारम्भक्रमेण श्रोत्रदेशेऽन्यं शब्दं जनयति सोऽन्त्यः शब्दः श्रोत्रेण गृह्यते नाद्यमध्यमौ। भेरीशब्दो मया श्रुत इति धीर्भ्रान्तैव। भेरीशब्दोत्पत्तौ भेर्याकाशसंयोगोऽसमवायिकारणम्। भेरीदण्डसंयोगो निमित्तम्। वंशपाटनाच्चटचटाशब्दोत्पत्तौ वंशदलाकाशविभागोऽसमवायिकारणम्। दलद्वयविभागो निमित्तम्। तेनाद्यः शब्दः संयोगजो विभागजो वा अन्त्यमध्यमशब्दास्तु शब्दासमवायिकारणका अनुकूलवात्। [निमित्त] काः। तथा चोक्तम्—'संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः' इति। आद्यादीनां सर्वंशब्दानामाकाशमेवैकं समवायिकारणम्। कर्मबुद्धिवत्‌क्षणमात्रावस्थायित्वं च। तत्राद्यमध्यशब्दाः कार्यशब्दनाश्याः। अन्त्यस्तूपान्त्ये (न्ते) न उपान्तस्त्वन्तेन सुन्दोपसुन्दन्यायेन विनश्येते। इदं चायुक्तम्। उपान्ते (न्त्ये?) द्वित्रिक्षणस्थायिनान्त्यस्य द्वितीयक्षणानुगामिना तृतीयक्षणे चासतान्त्यनाशजननासंभवात्। तस्मादुपान्त्यनाशादेवान्त्यनाश इति। विनाशित्वं च शब्दस्यानुमानात्। तथाहि – शब्दोऽनित्यः सामान्यवत्त्वे च सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वाद् घटवत्। शब्दस्यानित्यत्वं साध्यमनित्यत्वं च विनाशावच्छिन्नस्वरूपवत्त्वम्। न तु विनाशावच्छिन्नसत्तायोगः प्रागभावे सत्ताहीनेऽनित्यत्वाभावप्रसङ्गात्। सामात्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वं हेतुः। प्रत्यक्षत्वादित्युच्यमान आत्मनि व्यभिचारः स्यादित्यत उक्तं बाह्येन्द्रियेति। एवमपि योगिबाह्येन्द्रियग्राह्ये [परमाण्वादौ] व्यभिचारः स्यादतो योगिनिरासार्थमस्मदादीति। किं पुनर्योगिसद्भावे प्रमाणम्। उच्यते। परमाणवः कस्यचित् प्रत्यक्षाः प्रमेयत्वात् घटवत्। तथापि सामान्यादिना व्यभिचारः स्यादिति। अत उक्तं सामान्यवत्त्वे सति। सामान्यादित्रयं तु निःसामान्यम्।

अर्थप्रकाशो बुद्धिः।

प्रीतिः सुखम्। तच्च सर्वात्मनानुकूलवेदनीयम्।

पीडा दुःखम्। तच्च सर्वात्मना प्रतिकूलवेदनीयम्।

राग इच्छा।

क्रोधो द्वेषः।

उत्साहः प्रयत्नः।

बुद्ध्यादयः षड् मानसप्रत्यक्षाः।

धर्माधर्मौ तौ चाप्रत्यक्षावनुमानगम्यौ चानुमीयेते। देवदत्तस्य शरीरादिकं देवदत्तविशेषगुणजन्यं कार्यत्वे सति देवदत्तस्य भोग-हेतुत्वात्। देवदत्तप्रयत्नजन्यवस्तुवदिति। यश्च शरीरादिजनक आत्मविशेषगुणः स एव धर्मोऽधर्मश्च। प्रयत्नादीनां शरीराद्यज-नकत्वादिति।

संस्कारस्त्रिविधो वेगो भावना स्थितस्थापकश्च। तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः क्रियाहेतुः। भावनाख्यस्तु संस्कार आत्ममात्रवृत्तिरनुभवजन्यः स्मृतिहेतुः। स चोद्बुद्ध एव स्मृतिं जनयति उद्बोधकश्च सहकारिलाभः। सहकारिणश्च संस्कारस्य सदृशदर्शनादयः। यथोक्तम्– 'सदृशादृष्टचिन्तायाः (द्याः?) स्मृतिबीजस्य बोधकाः' इति।

स्थितस्थापकस्तु स्पर्शवद्विशेषवृत्तिः। अन्यथाभूतस्य स्वाश्रयस्य धनुरादेः पुनस्तथैव स्थापकः। एते बुद्ध्यादयोऽधर्मान्ता भावना चात्मविशेषगुणाः॥

गुणा उक्ताः। कर्मोच्यते।

चलनात्मकं कर्म। गुण इव द्रव्यमात्रवृत्ति। अविभुद्रव्यप-रिमाणेन मूर्तित्वापरनाम्ना सहैकार्थसमवेतं विभागद्वारा पूर्वसं-

योगनाशे सत्युत्तरदेशसंयोगहेतुश्च। तच्चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चधा। भ्रामणादयस्तु गमनग्रहणेन गृह्यन्ते।

अनुवृत्तिप्रत्ययहेतुः सामान्यम् द्रव्यादित्रयवृत्ति नित्यमेकमनेकानुगतं च। तच्च द्विविधं परमपरं च। परं सत्ता बहुविषयत्वात्। सा चानुवृत्तिमात्रहेतुत्वात् सामान्यमात्रम्। अपरं द्रव्यादि। अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यमिति विशेषः। अत्र कश्चिदाह — व्यक्तिव्यतिरिक्तं सामान्यं नास्ति। अत्र ब्रूमः — किमालम्बना तर्हि भिन्नेषु विलक्षणेषु पिण्डेष्वेकाकारा बुद्धिर्विना सर्वानुगतमेकं किंचिन्नदेव सामान्यमिति। ननु तस्य व्यावृत्तिकृतैकाकारा बुद्धिरस्ति। तथाहि सर्वेष्वपि गोपिडेष्वगोभ्योऽश्वादिभ्यो व्यावृत्तिरस्ति। तेनागोव्यावृत्तिविषय एवायमेकाकारप्रत्ययोऽनेकेषु गोपिण्डेषु न तु विविधरूपगोत्वसामान्यविषयः। मैवम्। विधिमुखेनैवैकाकारप्रत्ययस्फुरणात्। विशेषो नित्यो नित्यद्रव्यवृत्ति [:] व्यावृत्तिबुद्धिमात्रहेतुः। नित्यद्रव्याण्याकाशादीति पञ्च पृथिव्यादयश्चत्वारः परमाणुरूपाः।

अयुतसिद्धयोः संबधः समवायः। स चोक्तः। नन्ववयवावयविनौ अयुतसिद्धौ तेन तयोः संबन्धः समवाय इति। न चैतद् युक्तमवयवव्यतिरिक्तस्यावयविनोऽभावात्। परमाणवो हि यथा तथा संनिकृष्टा बहवो घटोऽयं घटोऽयमिति गृह्यन्ते। अत्रोच्यते- अस्त्येकः स्थूलो घट इति प्रत्यक्षा बुद्धिः। न च सा परमाणुष्वनेकेष्वस्थूलेष्वतीन्द्रियेषु भवितुमर्हति। भ्रान्तेयं बुद्धिरिति चेत्। न। बाधकाभावात्॥

तदेवं षट् पदार्था द्रयादयो वर्णिताः। एते च विधिमुखप्रत्ययवेद्यत्वाद् भावरूपा एव॥

इदानीं निषेधमुखप्रमाणगम्योऽभावगभ्यः (रूपः?) सप्तमः पदार्थः प्रतिपाद्यते। स चाभावः संक्षेपतो द्विविधः। संसर्गाभावोऽन्योन्याभावश्च। संसर्गाभावस्त्रिविधः। प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्च।

उत्पत्तेः प्राक् कारणे कार्यस्याभावः प्रागभावः। यथा तन्तुषु पटाभावः। स चानादिरुत्पत्तेरभावात्। विनाशी च कार्यस्य तद्विनाशरूपत्वात्।

उत्पन्नस्य कारणेऽभावः प्रध्वंसाभावः। विनाशः इतियावत्। यथा भग्ने घटे कपालमालायां घटाभावः। स च मुद्गप्रहारादिजन्यः। स चोत्पत्तिमानप्यविनाशी घटस्य पुनरनिवृत्तेः। कार्यस्य त्रैकालिकोऽप्यभावोऽत्यन्ताभावः। यथा वायौ रूपाभावः।

अन्योन्याभावस्तु तादात्म्यप्रतियोगिकोऽभावः। घटः पटो न भवतीति। तदेवमर्था व्याख्याताः॥

ननु ज्ञानाद् ब्रह्मणो व्यातिरिक्ता अर्था न सन्ति। मैवम्। अर्थानामपि प्रत्यक्षसिद्धत्वेनाशक्यापलापत्वात्।

बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्यदभिधीयते सा बुद्धिः। अर्थप्रकाशो बुद्धिः। सा च स्वरूपतो द्विविधा। अनुभवः स्मरणं च अनुभवो द्विविधो यथार्थोऽयथार्थश्च।

तत्र यथार्थोऽविसंवादी। प्रत्यक्षादिभिः प्रमाणैर्जन्यते। यथा चक्षुरादिभिरदुष्टैर्घटादिज्ञानम्। धूमादिलिङ्गज्ञानाद् बह्न्यादिज्ञानम्। गोसादृश्यदर्शनाद् गवयशब्दवाच्यताज्ञानम्। अग्निष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्यादग्निष्टोमस्य स्वर्गसाधनताज्ञानम्।

अयथार्थस्त्वर्थव्यभिचार्यप्रमाणजः। स त्रिविधः – संशयस्तर्को

विपर्ययश्च। संशयतर्कौ वक्ष्येते। अतस्मिंस्तद्ग्रहो विपर्ययः। भ्रम इति यावत्। यथा पुरोवर्तिन्यरजते शुक्तिकादौ रजतारोपः इदं रूप्यमिति।

स्मरणमपि यथार्थमयथार्थं चेति द्विविधम्। तदुभयं जागरे। स्वापे तु सर्वमेव ज्ञानं स्मरणमयथार्थं च। दोषवशेनतदितिस्थाने इदमित्युदयात्। सर्वं ज्ञानं निराकारमेव। ननु ज्ञानेऽर्थेन स्वस्याकारो जन्यते। न। साकारवादिनिराकरणात्। अत एवाकारेणार्थानुमानमपि निरस्तम्। प्रत्यक्षसिद्धत्वाद् घटादेः। सर्वं ज्ञानमर्थनिरूप्यमर्थप्रतिबद्धस्यैव तस्य मनसा निरूपणात्। घटज्ञानवानहं न तु ज्ञानवानहमित्येतावन्मात्रं ज्ञायते।

अन्तरिन्द्रियं मनः। तच्चोक्तमेव।

प्रवृत्तिर्धर्माधर्ममयी यागादिक्रिया तस्या जगद्व्यवहारसाधनत्वात्।

दोषा रागद्वेषमोहाः। राग इच्छा। द्वेषो मन्युः। क्रोध इति यावत्। मोहो मिथ्याज्ञानं विपर्यय इति यावत्।

पुनरुत्पत्तिः प्रेत्यभावः। स चात्मनः पूर्वदेहनिवृत्तिरपूर्वदेहसंघातलाभः।

फलं पुनर्भोगः। सुखदुःखानुभवः।

पीडा दुःखम्। तच्चोक्तमेव।

मोक्षोऽपवर्गः। स चैकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः।

एकविंशतिभेदास्तु शरीरं षडिन्द्रियाणि षड् विषयाः षड् बुद्धयः सुखं दुःखं च। गौणमुख्यभेदात्। सुखं तु [दुःखमेव?] दुःखानुषङ्गात्। अनुषङ्गोऽविनाभावः। स चायमुपचारो मधुनि

विषसंयुक्ते मधुनोऽपि विषपक्षनिक्षेपात्। स पुनरपवर्गः कथम्। उच्यते। शास्त्रादिविदितयथार्थसमस्ततत्त्वस्य विषयदोषदर्शनेन विरक्तस्य मुमुक्षोर्ध्यायिनो ध्यानपरिपाकवशात् साक्षात्कृतात्मनः क्लेशहीनस्य काम्यकर्माद्यनुष्ठानादनागतधर्माधर्मावनर्जयतः पूर्वोपात्तं धर्माधर्मप्रचयं योगप्रभावाद् विदित्वा समाहृत्य भुञ्जानस्य पूर्वकर्मनिवृत्तौ वर्तमानशरीराधिगमे पूर्वशरीराभावादेकविंशतिदुःखसंबन्धो न भवति कारणाभावात्। योऽयमेकविंशतिदुःखहानिर्मोक्षः सोपवर्गः।

इदानीं संशयमेवाह एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः। स च त्रिविधः। एको विशेषादर्शने समानधर्मदर्शनजः। यथा स्थाणुर्वा पुरुषो वेति। एकस्मिन्नेव हि पुरोवर्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकं च शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्ध्वतालक्षणं पश्यतः पुरुषस्य भवति संशयः किमयं स्थाणुर्वा पुरुषो वेति। द्वितीयस्तु संशयो विशेषादर्शने सति विप्रतिपत्तिजः। स यथा–शब्दो नित्य उतानित्य इति। तथा ह्येको ब्रूते शब्दोऽनित्योऽपरो नित्य इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुंसो विशेषमपश्यतो भवति संशयः किमयं शब्दो नित्य उतानित्य इति। असाधारणधर्मजस्तु संशयो यथा – नित्यादनित्याच्च व्यावृत्तेन भूमात्रासाधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यत्वानित्यत्वसंशयः। तथाहि सकलनित्यव्यावृत्तेन गन्धवत्त्वेन योगाद् भूः किमनित्या उत सकलानित्यव्यावृत्तेनापि तेनैव योगान्नित्येति संशयः।

येन प्रयुक्तः पुरुषः प्रवर्तते तत् प्रयोजनम्। तच्च सुखदुःखाप्तिहानी। तदर्था हि प्रवृत्तिः सर्वस्य।

वादिप्रतिवादिनोः संप्रतिपत्तिविषयोऽर्थो दृष्टान्तः। स च द्विविधः। एकः साधर्म्यदृष्टान्तः। धूमवत्त्वहेतोर्महानस इति। वैधर्म्यदृष्टान्तो यथा तस्यैव हेतोर्महाह्लद इति।

प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः। स चतुर्धा सर्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमभेदात्। तत्रसर्वतन्त्रसिद्धान्तो यथा – धर्मिमात्रसद्भावः। द्वितीयो यथा – नैयायिकस्य मते मन इन्द्रियम्। तद्धि समानतन्त्रे वैशेषिके सिद्धम्। तृतीयो यथा – क्षित्यादिकर्तृसिद्धौ कर्तुः सर्वज्ञत्वम्। चतुर्थो यथा – जैमिनीयस्य शब्दनित्यानित्यविचारो भवतु तावच्छब्दो गुण इति।

अनुमानवाक्यैकदेशा अवयवाः। ते च प्रतिज्ञादयः। तथा च न्यायसूत्रम्– 'प्रितज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः'।

तत्र साध्यधर्मविशिष्टधर्मिप्रतिपादकं वचनं प्रतिज्ञा। यथा पर्वतोऽग्निमान्।

पञ्चमान्तं तृतीयान्तं वा लिङ्गप्रतिपादकं वचनं हेतुः। यथा धूमवत्त्वादिति।

सव्याप्तिकं दृष्टान्तवचनमुदाहरणम्। यथा यो यो धूमवान् स सोऽग्निमान् यथा महानस इति।

पक्षे लिङ्गोपसंहार उपनयः। यथा धूमवांश्चायमिति तथा चायमिति वा।

पक्षे साध्योपसंहारो निगमनम्। यथा तस्मादग्निमानेवेति तस्मात् तथेति वा।

एते च प्रतिज्ञादयः पञ्चानुमानवाक्यस्यावयवा इवावयवा न तु समवायिकारणं शब्दस्याकाशसमवेतत्वात्।

तर्क प्रसङ्गः। स च सिद्धव्याप्तिपकयोर्धर्मयोर्व्याप्याङ्गीकारे व्यापकप्रसञ्जनम्। यथा – यद्यत्र घटोऽभविष्यद् भूतलमिवाद्रक्ष्यते(दि?)ति। स चायं तर्कः प्रमाणाना [म?] नुग्राहकः। यथा ह्ययं पर्वतः साग्निरुतानग्निरिति संदेहानन्तरं यदि कश्चिन्मन्यतेऽनग्निरयमिति तदा तं प्रति यद्ययमनग्निरभविष्यदनग्निकत्वादधूमोऽप्यभविष्यदित्यधूमवत्त्वप्रसञ्जनं क्रियते। स एष प्रसङ्गस्तर्क उच्यते। अयं चानुमानस्य विषयसाधकः। अनग्निमत्त्वस्य प्रतिक्षेपात्। अतोऽनुमानस्य भवत्यनुग्राहक इति। अत्र कश्चिदाह– तर्कः संशयेऽन्तर्भवतीति। न। एककोटिविषयत्वात् तर्कस्य।

निर्णयोऽवधारणज्ञानम्। तच्च प्रमाणानां फलम्।

तत्त्वबुभुत्स्वोः कथा वादः। स चाष्टनिग्रहाणामधिकरणम्। तें च न्यूनाधिकापसिद्धान्तहेत्वाभासपञ्चकमित्यष्टौ निग्रहाः।

उभयसाधनवती विजिगीषुकथा जल्पः। स च यथासंभवं परपक्षे दूषिते स्वपक्षस्थापनपर्यवसानश्च।

स्वपक्षस्थापनाहीनो वितण्डा। परपक्षदूषणमात्रावसाना। नास्य वैतण्डिकस्य स्थाप्यः पक्षोऽस्ति। कथा तु नानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः।

उक्तानां पक्षधर्मत्वादिरूपाणां मध्ये एकेनापि रूपेण हीना असद्धेतवः। तेऽपि कतिपयहेतूपयोगाद् हेतुवदाभासमाना हेत्वाभासाः। ते चासिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदात् पञ्चैव। अत्रोदयनेन व्याप्तस्य हेतोः पक्षधर्मताप्रतीतिः सिद्धिस्तदभावोऽसिद्धिरित्यसिद्ध (द्धि?) लक्षणमुक्तम्। तच्च यद्यपि विरुद्धादिष्वपि संभवतीति सांकर्यं प्रतीयते। तथापि यथा न सांकर्यं तथा तदुच्यते। यो हि यत्र साधनेषु पुरतः परिस्फुरति समर्थश्च

दुष्टज्ञप्तौ स एव दुष्टज्ञप्तिकारको दूषणमिति यावत्। नान्ध इति। तेनैव पुरःस्फूर्तिकेन दुष्टज्ञप्तौ क्षापितायां कथापर्यवसाने जाते तदुपजीविनोऽन्यस्यानुपयोगात्। तथा च सति यत्र विरोधिविपर्ययव्याप्त्याख्यो दुष्टज्ञप्तिकारकः स विरुद्धो हेत्वाभासः। एवं यत्र [स?] व्यभिचारादयस्तथाभूतास्तेऽन्येऽनैकान्तिकादयः। ये पुनर्व्याप्तिपक्षधर्मताविशिष्टहेतुस्वरूपज्ञप्त्यभावेन पूर्वोक्ता असिद्धादयो दुष्टज्ञप्तिकारका दूषणानीति यावत्। तथाभूतः सोऽसिद्धस्त्रिविध आश्रयस्वरूपव्याप्यत्वासिद्धभेदात्। तत्र यस्य हेतोराश्रयो नावगम्यते स आश्रयासिद्धः। यथा गगनारविन्दं सुरभि। अरविन्दत्वात्। सरोजारविन्दवत्। अत्र हि गगनारविन्दमाश्रयः। स च नास्त्येव। अयमप्याश्रयासिद्धः। तथा हि – घटोऽनित्यः। कार्यत्वात् पटवत्। नन्वाश्रयस्यसत्वात् कार्यत्वादिति हेतुर्नाश्रयासिद्धः। सिद्धसाधनं तु स्यात्। सिद्धस्यापि घटानित्यत्वस्य साधनात्। नैवम्। न हि स्वरूपेण कश्चिदाश्रयो भवत्यनुमानस्य किं तु संदिग्धत्वेन। नानुपलब्धेऽर्थे न निर्णीतेऽर्थे तर्हि संदिग्धे न्यायः प्रवर्तते। नात्र घटे नित्यत्वसंदेहोऽस्ति। अनित्यत्वस्य निश्चितत्वात्। तेन यद्यपि स्वरूपेण घटो विद्यते तथाप्यनित्यस्य संदेहाभावान्नाश्रय इत्याश्रयासिद्धत्वादहेतुः। स्वरूपासिद्धस्तु स उच्यते यो हेतुराश्रये नावगम्यते। यथा सामान्यमनित्यं कृतकत्वादिति। कृतकत्वं हेतुराश्रये सामान्ये नास्ति। भागासिद्धोऽपि स्वरूपासिद्ध एव। यथा पृथिव्यादयश्चत्वारः परमाणवोऽनित्या गन्धवत्त्वादिति। गन्धवत्त्वं हेतुः पक्षीकृतेषु सर्वेषु नास्ति पृथिवीमात्रवृत्तित्वात्। अत एव भागे स्वरूपासिद्धत्वम्। तथा विशेषणासिद्धविशेष्यासिद्धासमर्थविशेषणासिद्धासमर्थविशेष्यासिद्धादयः स्वरूपासिद्धभेदाः। तत्र विशेषणासिद्धो यथा – शब्दो नित्यो द्रव(व्य?)त्वे सत्यस्पर्शवत्त्वात्। तत्र हि द्रव्यत्वविशिष्टमस्पर्शवत्त्वं हेतुर्नास्पर्शवत्त्वमात्रम्।

शब्दे च द्रव्यत्वं नास्ति गुणत्वादतो विशेषणासिद्धः न चासति विशेषणे द्रव(व्य?)त्वे तद्विशिष्टमस्पर्शवत्त्वमस्ति विशेषणाभावे विशिष्टस्याप्यभावात्। यथा दण्डमात्राभावे न च दण्डविशिष्ट-पुरुषस्याभावस्तेन सत्यप्यस्पर्शवत्त्वे विशिष्टहेतुरपि नास्त्येव विशि-ष्टहेतोरभावात्। तत्स्वरूपासिद्धत्वम्। विशेष्यासिद्धो यथा–शब्दो नित्योऽस्पर्शवत्त्वे सति द्रव्यत्वादिति। अत्रापि विशिष्टो हेतुः। न च विशेष्याभावे विशिष्टस्य स्वरूपमस्ति विशिष्टहेतुरपि ना-स्ति। असमर्थविशेषणो यथा – शब्दो गुणत्वे सत्यकारणत्वाद्। अत्र विशेषणस्य न किंचित् सामर्थ्यमस्ति। विशेष्यस्याकारण-त्वस्यैव नित्यत्वसाधनसामर्थ्याद्धेतोरसमर्थं विशेषणम् स्वरूपासिद्धत्वं तु विशेषणाभावे विशिष्टस्य वाभावः। ननु विशेषणं गुणवत्त्वं शब्देऽस्त्येव। तत् कथं विशेषणाभावः। सत्यमस्त्येव गुणत्वम्। किं तु न तद्विशेषणम्। तदेव हेतोर्विशेषणं भवति यदन्यव्यवच्छेदेन प्रयोजनवत्। गुणत्वं तु निष्प्रयोजनमसमर्थमुक्तमेव। असमर्थवि-शेष्योयथा – तत्रैव व्यत्ययेन प्रयोगः। शब्दो नित्योऽकारणत्वे सति गुणत्वात्। अत्र तु विशेषणमात्रस्यैव नित्यत्वसाधने समर्थत्वाद् विशेष्यमसमर्थम्। स्वरूपासिद्धस्तु विशेष्याभावे विशिष्टाभावाद् विशिष्टस्य हेतुत्वेनोपादानात्। शेषं पूर्ववत्। व्याप्यत्वासिद्धस्तु यत्र व्याप्तिर्नावगम्यते। स द्विविधः। एकः साध्येनासहचरितोऽ-परस्तु सोपाधिकतया साध्यसंबन्धः। तत्र प्रथमो यथा – यत् सत् तत् क्षणिकं यथा घनः। संश्च शब्दादिर्विवादास्पदीभूत इति। अत्र हि शब्दादिः पक्षस्तस्य क्षणिकं साध्यं सत्वं हेतुः। न चास्य हेतोः क्षणिकत्वेन सह व्याप्तौ प्रमाणमस्ति। इदानीमुपाधिस-हितो व्याप्यत्वासिद्धः प्रदर्श्यते। तद् यथा – स श्यामो मैत्री-तनयो मैत्रीतनयत्वात्। परिदृश्यमानमैत्रीतनयवत्। अत्र मैत्रीत-नयत्वेन श्यामत्वं साध्यते। न च मैत्रीतनयत्वं श्यामत्वे प्रयोजकं

किं तु शाकाद्याहार एव [प्रयोजकः]। प्रयोजकश्चोपाधिरुच्यते। अतो मैत्रीतनयत्वस्य श्यामत्वेन संबन्धे शाकाद्याहारपरिणाम उपाधिः। यथा अग्नेर्धूमसंबन्ध आर्द्रेन्धनसंयोगः अतोऽत्रोपाधिसंबन्धाद् व्याप्तिर्नास्ति। व्याप्यत्वासिद्धोऽयं मैत्रीतनयत्वादिहेतुः। तथापरोऽपि व्याप्यत्वासिद्धो यथा क्रत्वन्तर्वर्तिनी हिंसा अधर्मसाधनं हिंसात्वात् क्रतुबाह्यहिंसावत्। अत्र हिंसात्वं नाधर्मप्रयोजकं किं तु निषिद्धत्वमुपाधिरिति पूर्ववदुपाधिसद्भावाद् व्याप्यत्वासिद्धो हिंसात्वं हेतुः। ननु साधनाव्यापकत्वे सति साध्यव्यापको यः स उपाधिरित्युपाधेर्लक्षणम्। तच्च निषिद्धत्वे नास्ति। तत् कथं निषिद्धत्वमुपाधिरिति। नैवम्। निषिद्धत्वेऽप्युपाधिलक्षणस्य विद्यमानत्वात्। तथा हि साध्यस्याधर्मस्य व्यापकं निषिद्धत्वम्। यत्र यत्राधर्मत्वं तत्र तत्र निषिद्धत्वस्य विद्यमानत्वात्। न च यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वं क्रत्वङ्गहिंसायां व्यभिचारात्। अस्ति हि क्रत्वङ्गहिंसायां हिंसात्वं न च तत्र निषिद्धमस्ति साधनादन्यत्र निषिद्धत्वमिति। तदेवं द्विविधो व्याप्यत्वासिद्धो हेतुर्दर्शितः।

संप्रति विरुद्धः कथ्यते। साध्यविपर्ययव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। अत्र हि नित्यत्वं साध्यं तद्विपर्ययेण चानित्यत्वेन कृतकत्वं व्याप्तम्। यद् यद् कृतकं तत्तत् खल्वनित्यमेव। अतः साध्यविपर्ययव्याप्तत्वात् कृतकत्वं हेतुर्विरुद्धः।

साध्यसंशयहेतुरनैकान्तिकः सव्यभिचार इति वा। स द्विविधः। साधारणानैकान्तिकोऽसाधारणानैकान्तिकश्चेति। तत्र प्रथमः पक्षसपक्षविपक्षवृत्तिः। यथा – शब्दो नित्यः प्रमेयत्वादिति। अत्र प्रमेयत्वं हेतुः सपक्षे नित्ये विपक्षे चानित्ये च वर्तते। तस्य प्रमेयत्वादिति। असाधारणानैकान्तिकस्तु स एव यः सपक्षविपक्षव्यावृत्तः

पक्ष एव वर्तमानो यथा भूमिर्नित्या गन्धवत्त्वात्। अत्र हि गन्ध-वत्त्वं हेतुः सपक्षान्नित्याद् व्योमादेर्विपक्षाच्चानित्याज्जलादेर्व्यावृत्तो गन्धवत्त्वस्य पृथिवीमात्रवृत्तित्वादिति। व्यभिचारस्तु लक्ष्यते नियमासंभवात्। संभवत्सपक्षविपक्षवतो हेतोः सपक्षवृत्तित्वे सति विपक्षाद्व्यावृत्तिरेव नियमो गमकत्वात्। तस्यैव साध्यविपरीतव्याप्यस्य तन्नियमाभावो व्यभिचारः। स च द्वेधा संभवति सपक्षविपक्षयोरव्यावृत्तौ ताभ्यां व्यावृत्तौ च।

यस्य प्रतिपक्षभूतं हेत्वन्तरमस्ति स प्रकरणसमः। स एव सत्प्रतिपक्ष उच्यते। तद् यथा – शब्दो नित्योऽनित्यधर्मानुपलब्धेरिति। अत्र हि विपरीतार्थसाधकं समानबलमनुमानान्तरं प्रतिपक्ष इत्युच्यते यः पुनरतुल्यबलं न स तत्प्रतिपक्षः। तथाहि विपरीत-साधकानुमानं त्रिविधं भवति उपजीव्यमुपजीवकमनुभयं च। तत्राद्यं बाधकं बलवत्त्वात्। तत्र यथा – परमाणवोऽनित्याः स्पर्शवत्त्वात् घटवत्। परमाणुसाधनानुमानं नित्यत्वं साधयदपि न प्रतिपक्षः किं तु बाधकमेवोपजीव्यत्वात्। तस्य धर्मिग्राहकत्वात्। न हि प्रमाणेनगृह्यमाणे धर्मिणि परमाण्वादावनित्यत्वानुमानमिह न संभवति। आश्रयासिद्धेः। अनेनानुमानेन परमाणुग्राहकस्य प्रामाण्यमप्यनुज्ञातमन्यथास्योदयासंभवात्। तस्मादुपजीव्यं बाधकमेव। उपजीवकं तु दुर्बलत्वाद् बाध्यम्। यथेदमेवानित्यत्वानुमानम्। तृतीयं तु सत्प्रतिपक्षः समबलत्वात्।

यस्य प्रत्यक्षादिप्रमाणेन पक्षे साध्याभावः परिणतः स कालात्ययापदिष्टः। स एव बाधितविषय इत्युच्यते। यथाग्निरनुष्णः कृतकत्वाद् जलवत्। अत्र कृतकत्वं हेतुः। तस्य च यत् साध्यमनुष्णत्वं तस्याभावः प्रत्यक्षेणैव परिच्छिन्नः। त्वगिन्द्रियेणाग्नेरुष्णत्वपरिच्छेदात्। यथा वा क्षणिकत्वे साध्ये प्रागुक्तं हेतुः

तस्यापि च यत् साध्यं क्षणिकत्वं तस्याभावोऽक्षणिकत्वं प्रत्यभिज्ञालक्षणप्रत्यक्षेण परिच्छिन्नम्। स एवायं घटो यो मया पूर्वं उपलब्ध इति प्रत्यभिज्ञया पूर्वानुभवजनितसंस्कारसहकृतेन्द्रियप्रभवया पूर्वापरकालावलम्बया पूर्वघटस्य स्थायित्वपरिच्छेदादिति।

त एतेऽसिद्धादयः पञ्च हेत्वाभासा यथायथं पक्षधर्मत्वादिरूपहीनत्वादहेतवः स्वसाध्यं न साधयन्तीति।

येऽपि लक्षणकेवलव्यतिरेकिहेतोरव्याप्त्यतिव्याप्त्यसंभवास्तेऽत्रैवान्तर्भवन्ति। न तु पञ्चभ्योऽधिकाः। तथाहि – अतिव्याप्तिर्व्याप्यत्वासिद्धिः। विपक्षमात्राद् व्यावृत्त्यभावात् सोपाधिकत्वाच्च। यथा गोर्लक्षणस्य पशुत्वस्य। गोत्वे हि सास्नादिमत्त्वं प्रयोजकं न पशुत्वम्। तथा अव्याप्तिर्भागासिद्धत्वम्। यथा गोलक्षणस्य शाबलेयत्वस्य। असंभवोऽपि स्वरूपासिद्धः। यथा गोर्लक्षणस्यैकशफत्वस्येति।

अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरमाशङ्क्य दूषणाभिधानं छलम्। यथा नवकम्बलोऽयं देवदत्त इति वाक्ये नूतनाभिप्रायेण प्रयुक्तेऽर्थान्तरमाशङ्क्य कश्चिद् दूषयति – नास्य नव कम्बलाः सन्ति दरिद्रत्वात्। न ह्यस्य द्वित्वमपि संभाव्यते कुतो नवेति। स च वादी छलवादितया ज्ञायते।

असदुत्तरं जातिः। सा चोत्कर्षसमाधिभेदेन बहुविधा विस्तरभयान्नेह कृत्स्नेनोच्यते। तत्र व्याप्तेन दृष्टान्तगतधर्मेण पक्षे व्यापकधर्मस्योपादानमुत्कर्षसमा जातिः। यथा शब्दोऽनित्यः कृतकत्वाद् घटवदित्युक्ते कश्चिदेवमाह – यदि कृतकत्वेन घटवच्छब्दोनित्यः तेनैव हेतुना तद्वदेव शब्दः सावयवः स्यात्। अपकर्षसमा तु दृष्टान्तगतेन धर्मेणाव्याप्तेनाव्यापकस्य धर्माभावस्योपादानम्।

अपकर्षसमा जातिः यथा। पूर्वस्मिन् प्रयोगे कश्चिदेवमाह – यदि कृतकत्वेन हेतुना घटवच्छब्दोऽनित्यः स्यात् तेनैव हेतुवदेव घट-वदेव शब्दोपि श्रावणो न स्यात्। न हि घट श्रावण इति।

पराजयहेतुर्निग्रहस्थानम्। तच्च न्यूनाधिकापसिद्धान्तार्थान्त-राप्रतिभामतानुज्ञाविरोधादिभेदाद् बहुविधमपि विस्तरभयान्नेह कृत्स्नमुच्यते। यत्र विवक्षितार्थे किंचिन्न्यूनं तन्न्यूनम्। विवक्षि-तार्थात् किंचिदधिकं तदधिकम्। सिद्धान्तादपध्वंसोऽपसिद्धान्तः। प्रकृतेनाभिसंबन्धार्थं वचनमर्थान्तरम्। उत्तरापरिस्फूर्तिरप्रतिभा। पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञानं स्वीकारो मतानुज्ञा। इष्टार्थभङ्गो विरोधः।

इहात्यन्तमुपयुक्तानां स्वरूपभेदेन भूयोभूयः प्रतिपादकाना-मनतिप्रयोजनानामल्पलक्षणं न दोषाय। एतावतैव बालव्युत्पत्ति-सिद्धेः ॥

इति श्रीकेशवमिश्रेण विरचिता तर्कभाषा समाप्ता ॥

गणेशदीक्षितप्रणीता तर्कभाषाव्याख्या
तत्त्वप्रबोधिनी

मङ्गलाचरणम्

श्री गुरूभ्यो नमः। श्री गणेशाय[1] नमः। [2]हयग्रीवाय नमः।

[3]केशकेशवरूपैर्यः सृजत्यवति हन्ति च।
तं गणेशमहं वन्दे स्मृतिमात्राघनाशनम् ॥
[4]गोविन्ददीक्षितं तातम् उमां नत्वा च मातरम्।
क्रियते तर्कभाषायाः टीका तत्त्वप्रभोधिनी ॥

उपोद्घातः

धर्मार्थकाममोक्षरूपेषु पुरुषार्थेषु मध्ये मोक्षस्यात्यन्ताभ्यर्हितत्वात् "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासि-[6] तव्यश्च" इति [7]श्रुत्या श्रवणानन्तरभाविमननस्य मोक्षं प्रति कारणत्वावबोधनात् मननस्य [8]आत्मविशेष्यकेतराभिन्न [तरभिन्नत्व] प्रकारकानुमितिरूपत्वात् आत्मानं प्रधानतो निरूपयन्[9]

1. ग – 'णाय' इत्यारम्भः 'नारायणाय' इति भवितुमर्हति।
2. ग – 'हय......नमः 'इति स्थाने 'श्रीमत्सुदर्शन......श्री केशवायनमः इति पाठः
3. क – 'रूपिर्यः' इति पाठः।
4. ग – 'गोविन्द' इति लुप्तः पाठः।
5. ग – 'क्रियते' इत्यारभ्य 'टीकां' पर्यन्तः पाठः लुप्तः।
6. क – 'निदिध्यासितव्यश्चेति' पाठः लुप्तः।
7. ग – 'श्रवण' इति स्थाने 'साक्षात्कार' इति पाठः।
8. ग – 'च' इति अधिकः पाठः
9. ग – 'निरूपयन् तदुपोद्धातत्वेनेतर' इति पाठः लुप्तः।

तदुपोद्घातत्वेन इतरपदार्थनिरूपणं [1] करिष्यमाणः कर्तव्यविघ्नविघातकं शब्दस्तदुपजीविप्रमाणेतरप्रमाणबोधितबलवदनिष्टाननुब-[2]
[3]न्धिइष्टसाधनताविषयकभ्रमरहिताचारत्वेनानुमित – श्रुतिबोधितकर्तव्यताकं मङ्गलं बहिरेव विधाय प्रेक्षावत्प्रवृत्यङ्गे विषयप्रयोजने निर्दिश्य कथयन् चिकीर्षितं प्रतिजानीते– 'बालोऽपी'ति ।

विषय – प्रयोजननिरूपणम्

एषा तर्कभाषा तर्कस्य–भाषा 'व्याप्यारोपेण व्यापकारोपस्तर्कः' तस्य–भाषास्वरूपकथनं [5] मया प्रकाश्यते–क्रियते इत्यर्थः ।

यद्वा – एतदनुग्राह्यप्रमाणविषयप्रमाणादिपदार्थाः लक्षणया[6] तर्कशब्देन उच्यन्ते तेषां भाषा [7] – कथनम् इत्यन्वर्थतया ग्रन्थनाम कथितम् कस्य प्रयोजनायेत्यत आह– 'तस्य कृते' इति तन्निमित्तमित्यर्थः ।'कृते' इत्यन्वयम्- 'काव्यं यशसेऽर्थकृते' इत्यादावयवत्वेन [न ?] व्याख्यानात् । यद्वा क्रियते इति 'कृत् – कृतुभः [कृञः] कर्मणि' निष्पन्नः [8]क्विबन्तः प्रयोजनवाची यत्तदोर्नित्यसाकाङ्क्षत्वात् ।

---

1. घ – 'जात' इति अधिकः पाठः ।
2. ग – 'तत्वादविगीत' इत्यधिकः पाठः ।
3. घ – 'इष्टसाधनताकत्वरहित' इति पाठः ।
4. घ – 'निर्दिश्य' इति नास्ति ।
5. घ – 'इत्यर्थः' इति अधिकः पाठः ।
6. ग – 'लक्षणतया' इति पाठः ।
7. ग – 'भाषा' इति नास्ति ।
8. ग – 'क्विबन्तः' इति पाठः लुप्तः ।

कस्येत्याकाङ्क्षायामाह – 'य' इति । अत्र च [1]विशेष्यमाह 'बाल' इति । विशिष्य प्रमाणाद्यनभिज्ञः तज्जिज्ञासुः इत्यर्थः । ननु जिज्ञासामात्रेण कथं ग्रन्थकारणमित्यत आह - 'न्यायनये' इति । नीयते– ज्ञानं [2]प्राप्यते विवक्षितार्थोऽनेनेति व्युत्पत्त्या न्यायोऽनुमानं नयशब्दः शास्त्रवचनः, तथा च न्यायशास्त्रे यः प्रवेशं वाञ्छति तन्निर्वाहार्थमित्यर्थः । ननु एतादृशवाञ्छावान् शिशुरपि भवति, न तं प्रति ग्रन्थः सार्थक इत्यत आह – [3]'अल्पेन श्रुतेने'ति । [4]अल्पश्रवणेन युक्त इत्यर्थः । इत्थम्भूते तृतीया, (कत्वे ?) अतादृशस्य अभ्यासादेव प्रवेशो भविष्यतीत्यत आह – 'अलस' इति आलस्ययुक्त इत्यर्थः । ननु प्राचीननिबन्धनमेव व्याख्यायतां किमनेनेत्यत आह-'संक्षिप्ते'ति [5]संक्षिप्तत्वात् इतरेषां च अतिविस्तृतत्वात् एतस्मादेव कार्यसिद्धिः इत्यर्थः ।

यद्वा तर्कशास्त्रे [6]प्रविविक्षोः पुरातननिबन्धनमेव व्याख्यायतां किमनेन अपूर्वग्रन्थनिर्माणेनेत्यत आह – 'अलस' इति आलस्ययुक्तो न तत्राधिकारीत्यर्थः । ननु [7]कथं अत्राधिकारीत्यत आह–अल्पेन– श्रुतेने'ति अल्पेन पाठेनात्र कार्यसिद्धिः । तत्र बहुश्रोतव्यमिति भावः । [8]बह्वध्ययनसाध्यस्य कथमनेन निर्वाह इत्यत आह–'युक्-

---

1. क – 'विशेष्यमाह' इति नास्ति ।
2. घ – 'ज्ञाप्यते' इति पाठः ।
3. घ – 'अल्पेन' इति पाठः ।
4. घ – 'अल्प' इति नास्ति ।
5. घ – 'भाष्यस्य' इति अधिकः पाठः ।
6. क – 'विविक्षोः' इति पाठः ।
7. ग – 'वाञ्छन्नपि' इति अधिकः पाठः ।
   घ – 'वाञ्छन्' इति पाठः ।
8. घ – 'तर्हि' इत्यधिकः पाठः ।

त्यन्विते'ति। तत्रोक्तयुक्तीनामत्र संक्षिप्तकथनात् इत्यर्थः।

अत्र[1] ग्रन्थस्य[2] विषयप्रयोजने निर्दशिते,[3] प्रकाश्यतर्कभाषा-विषयःन्यायनये प्रवेशः प्रयोजनमिति। तथापि सुखदुःखाभावेतरत्वे न तावत्प्रेक्षावत्प्रवृत्तिरिति शास्त्रस्य ग्रे प्रमाणादिनिःश्रेय-सरूपविषयप्रयोजने त एवास्य प्रकरणस्य (इति) कथनार्थं [4]तत्प्रतिपादनपरं न्यायस्य आदिमं सूत्रं पठति 'प्रमाणे'ति।

न्यायशास्त्रस्य प्रयोजनम्

अत्र सर्वपदार्थोपधानत्वत् (र्थोपपदत्कवात्) प्रेक्षावतां प्रमाणादि–पदार्थतत्त्वज्ञान – निश्रेयसयोरेव कार्यकारणभावः समायातः, न शास्त्रनिश्रेयसयोः; तथा च शास्त्रे प्रवृत्तिरेव न स्यात्, किञ्च तस्य भावः तत्वं वाच्यम्।

न च प्रकृते तच्छब्दार्थः प्रक्रान्तः प्रक्रान्तस्य (मानोपाये) च अन्यस्मात् तदुपगमः अस्मिन् शास्त्रे एतदर्थप्रतिपादकस्य अन्यस्याभावात्, अत एव न तत्प्रयोजनेन अस्य प्रकरणस्य प्रयोजनवत्वम्। [5]किञ्च निःश्रेयसज्ञानादिकमपि भवति, न च तत्प्रमाणादिज्ञानसाध्यम्। किञ्च अधिगमो ज्ञानमुच्यते, तदर्थं च

1. ग – 'ननु' इति अधिकः पाठः
2. ग – 'अत्र ग्रन्थस्य' इति स्थाने 'यद्यपि आद्यपद्ये इति' पाठः।
3. घ – 'आद्यपद्ये' इति अधिकः पाठः।
   ग – 'नि' इति वर्णः नास्ति।
4. घ – 'प्रतिपादनपरात्,' 'सर्वपदार्थप्रधानो द्वंद्वः' इति अधिकः पाठः।
5. ग – 'किन्तु' इति पाठः।

प्रवृतिर्नोपपद्यते,[1] स्वतः पुरुषार्थत्वादित्यत आह – 'अस्यार्थ' इति निरुक्तशङ्काशून्यतया कथ्यते इत्यर्थः । तथा च प्रमाणादीति प्रमाणादिपदार्थतत्त्वं ज्ञायते । अनेनेति व्युत्पत्या शास्त्रमेव अभिधीयते । अत्र च शास्त्रेण कर्तव्ये निश्रेयसे तत्त्वज्ञानस्य व्यापारत्वेन व्यापारस्योपकारिणोः कार्यकारणभावः, ज्ञानद्वारा शास्त्रनिश्रेयसयोः कार्यकारणभावः। व्यापारवता शास्त्रेण [2]व्यापारविषयप्रमाणादेः कार्यकारणभावः। प्रतिपाद्यप्रतिपादकभावः व्यापारस्य[3] तत्वज्ञानस्य विषयविषयिभावः कार्यकारणभावः सूचितः नान्तरीयकत्वात् ।

ननु शास्त्रनिश्रेयसयोः न कार्यकारणभावः । तथापि मननरूपानुमितादेव (मितावेव) शास्त्रस्य शब्दरूपस्य [4]प्रमाणज्ञानादि व्यवहितव्यापारस्य न कारणत्वं, नितरां [5]निदिध्यासनादिप्रणालिकया उत्पाद्यमाने अपवर्गे, अन्वयव्यतिरेकयोः कारणान्तरसम्पादनेन अन्यथासिद्धत्वात् । (शास्त्रकारेण तत्कारणपरम्परान्वयव्यतिरेकपदवत्) यागस्य शब्दबोध्यस्य स्वर्गसाधनत्वे[6] अस्तु अपूर्वमवान्तरव्यापारः, अन्यथा [7]कार्यकारणव्यवस्थानुपपतिः स्यात् प्रसिद्धधूमानुमितौ व्यभिचारस्य न शास्त्रं कारणम् । अन्यथा अनुमितेः शास्त्रजन्यत्वेन शाब्दत्वानुमितित्वयोः जातिसङ्करापतेः, अथ न [8]शब्दजन्यत्वमात्रेण (शाब्दत्वम्, । मनोजन्यत्वमात्रेण)

1. क – 'स्वतः' इति स्थाने 'ननु' इति पाठः ।
2. क – 'विषय' इति स्थाने 'विधाय' [विधया] इति पाठः ।
3. क,ख – 'कोऽत्र ग्रन्थपातः?' इति अधिकः पाठः ।
4. घ – 'प्रमाणज्ञानादि' इति स्थाने 'प्रमाणोत्थापनादि' इति पाठः ।
5. घ – 'च' इति अधिकः पाठः ।
6. घ – 'साधनत्वे' इति स्थाने 'कारणत्वे' इति पाठः ।
7. घ – 'कार्यकारण' इति 'स्थाने व्यापार – व्यापारी' इति पाठः ।
8. घ – 'शब्द' इति स्थाने 'शास्त्र' इति पाठः ।

साक्षात्वमिवानुमितौ, किन्तु ज्ञाप्यान्वयप्रतियोगिगोचराकाङ्क्षादिसहायजन्यत्वेन। तच्छब्दानुमितौ बाधितमेवेति शब्दतुल्यान्वयव्यतिरेकेण तयोः शाब्दज्ञानकरणान्तरस्य शब्दवत् इष्टत्वात्, अन्यथा शब्दस्यापि न स्यात्, अविशेषात्। [1]तथा च शाब्दसामग्रीजन्यत्वेन जातिसङ्करो दुर्वारः, प्रागभावभेदेन तद्घटितसामग्रीभेदात् न जातिसङ्कर इति चेत् न तदितराशेषकारणतात्वे (णसत्वे) प्रागभावभेदस्यपि अवाच्यत्वात् तस्य तदेकान्वयत्वात्।

यत्तु कैश्चित्[2] साधितं प्रमाणादिपदार्थतत्वज्ञानात् निश्रेयसाधिगम इति महर्षिवाक्यादेव [3]निश्चताप्तभावैः (भावात्) स्वर्गादिकं प्रति यागादिरिव निश्रेयसे तदनुकूलानुमितौ [4]च करणव्युत्पत्या शास्त्रस्य हेतुत्वं प्रतीयते, लिङ्गपरमर्शाद्यजन्यत्वादेः [5]शाब्दत्वप्रयोजकत्वात् न [5]जातिसङ्करापत्तिः। कार्यवैजात्यकल्पनाच्च न व्यभिचार इति।

तन्न परस्पराश्रयप्रसङ्गात्, शास्त्रस्य हि[7] निश्रेयसहेतुत्वे सिद्धे करणव्युत्पत्या तत्वज्ञानपदं शास्त्रपरं सिध्येत्, सिद्धे च शास्त्रपरत्वे शास्त्र (शास्त्रस्य) निश्रेयसहेतुत्वमिति[8] लाघवेन

---

1. ग, घ – 'च' इति नास्ति।
2. क–ख – 'कैश्चित् साधितं प्रमाणादिपदार्थतत्वज्ञानात्' इति स्थाने 'क्वचित् समासान्तं प्रमाणादितत्वज्ञानात्' इति पाठः।
3. क – 'निश्चितात् अभावैः' इति पाठः।
4. क–ख – 'च' इति स्थाने अपि इति पाठः।
5. घ – 'त्व' इति वर्णः नास्ति।
6. घ – 'जातिसङ्करः' इति पाठः।
7. क–ख – 'हि' इति नास्ति।
8. क – 'इति' पदं नास्ति।

शब्दघटितसामग्रीजन्यत्वेन शाब्दत्वप्रयोजकत्वात्, कारणताग्राहक प्रमाणाभावात् न [1]वैजात्यकल्पनम् इत्यत्र उच्यते-शास्त्रप्रतिपाद्यज्ञानं ततो लिङ्गकण्टकोद्धारन्यायवाक्यार्थज्ञानं ततो लिङ्गपरामर्शः, ततोऽनुमितिः मननरूपा ततो निदिध्यासनादिक्रमेण आत्मसाक्षात्कारेण अपवर्ग इति।

तन्न[2] यदपवर्गकारणकारणत्वं शास्त्रस्य तत्रैव पञ्चम्याः तात्पर्यं प्रवृत्तेः तावत् प्रत्ययेनैव उपपत्तेः। नहि फलसाधनताज्ञानं [3]प्रवर्तकं, साधनसाधनगोचरप्रवृत्तिविलयापत्तेः। अत एव तत्त्वज्ञानां तत्त्वज्ञानशालिनाम् इति व्याख्यानम् अपहसितम्। तेन निश्रेयस्य (सः) तत्त्वज्ञानसाध्यतालाभे[4] कारणव्युत्पत्यनादरणे शास्त्रफलसम्बन्धानवबोधनात्। अथ अधिगतप्रयोजनसम्बन्धस्य [5]आद्यादिसूत्रात्मके [6]तर्कशास्त्रे प्रवृत्तेः, प्रवृत्तस्य प्रयोजनसम्बन्धावगतिरिति अन्योन्याश्रयः आद्यादिसूत्रप्रत्वृयर्थमपि प्रयोजनसम्बधान्तराभिधानानवस्थितिः आद्यसूत्रप्रवृत्तिः (त्तेः) तदनपेक्षणे अन्तेऽपि तथात्वापातात्, न च द्वितीयादिसूत्राण्येव[7] (सूत्राणामिव) शास्त्रप्रथमसूत्रस्यापि त्रिविधशास्त्रप्रवृत्त्यन्तर्गतत्वात्, [8]शास्त्रे प्रवृत्तिरेव न, किन्तु तदेकदेशे एव ते युक्ताः शास्त्रस्य प्रेक्षावदनुपादेयत्वापत्तेः

---

1. क–ख – 'कल्पनम्' इति पाठः।
2. घ – 'तन्न' इति नास्ति।
3. घ – 'एव' इति अधिकः पाठः।
4. ग – 'अपि' इति अधिकः पाठः।
5. घ – 'आद्य' इति नास्ति।
6. घ – 'तर्क' इति नास्ति।
7. घ – 'सूत्रादेव' इति पाठः।
8. घ – 'नच' इति अधिकः पाठः।

एकदेशस्य प्रवृत्तिविषयत्वे [1]शास्त्रमात्रगोचर – उपादानाभावात्। अत अनुभवरूपा प्रवृत्तिः न प्रयोजनमपेक्षते। [2]हेयोपेक्षणीययोः प्रयोजनं विनापि अनुभवात्, तथा च आद्यसूत्रे प्रयोजनसम्बन्धज्ञानं विनैव प्रवृत्तिरिति चेन्न[3]। उत्तरत्रापि अनुभवस्यैव प्रवृत्तित्वेन प्रयोजनानपेक्षापत्तिरिति चेत्, अत्रोच्यते – एकं हि ज्ञानमयत्वसाध्यम् (ज्ञानमयत्नसाध्यम्) अपरं हि यत्नाधीनं तत्र प्रथमसूत्रानुभवेन यत्व न यत्वादिपक्षेतरं विनापि विदितपदपदार्थसङ्गतेः, श्रुतादिसूत्रस्य तदर्थज्ञानोदयात् शास्त्रार्थकं किन्तु यत्नादिकं न, पूर्वापरपरामर्शः तत्तदविरोधागमश्च सुतरां [4] यत्काक्षेपेण [5]च आद्यसूत्रावधारणेऽपि विरोधिशङ्का नियता, येन तन्निवारणाय तु उपेक्षिता तस्मादत्र प्रथमसूत्रप्रयोजनसम्बन्धज्ञानं विनैव प्रवृत्तिः, तज्जन्यानुभवस्य साध्यत्वात् इति सर्वं 'त्रिसूत्रीतत्वबोधे' सुव्यक्तम्। अधिकं 'त्रिसूत्रीभास्करे' अनुसन्धेयम्[6]। निश्रेयसस्य मोक्ष एव रूढिः, अधिगमशब्देन प्राप्तेरुक्तत्वात्। तत्वं अनारोपितं रूपम्, अतो नोक्तदोषः, अवशिष्टशङ्काद्वये यथायोग्यमुत्तरं सुगमम्[7]।

ननु एतदसङ्गतं तत्वलक्षणम्, 'सर्वमनित्यम्' इति भ्रान्तिविषयत्वात् सर्वस्येति चेत्, न यत्र यदस्ति तत्र तस्य असम्भवः प्रमितिलक्षणं तु तादृशप्रमाविषयत्वे यत् अनारोपितं रूपम्, तथा च नोक्तदोषः।

---

1. घ – 'मात्र' इति नास्ति।
2. क – 'हेयोपेक्षणीययो' इति स्थाने 'हेयोपेक्षिणिशाय्यायाम्' इति पाठः।
3. घ – 'न' इति नास्ति।
4. घ – 'यत्व' इति स्थाने 'यत्र' इति पाठः।
5. घ – 'प्रयत्नापेक्षः' इति पाठः।
6. घ – इति 'इति' अधिकः पाठः।
7. न तु प्रमामाणदीनां तत्वज्ञानं सूत्रपाठादेव जातं किमतः परं ग्रन्थारम्भः इति अधिकः पाठः।

त्रिविधा शास्त्रप्रवृत्तिः

ननु प्रमाणादीनां तत्त्वज्ञानं प्रथमसूत्रपाठेन जातं (पाठेनैव जातम्) किमतः परं ग्रन्थारम्भ इत्यत आह – 'नचेति'। करण-व्युत्पत्त्या लब्धं यत् शास्त्रव्यापरत्वेन तत्त्वज्ञानं तदनूद्य व्याकरोति–'तत्त्वमि'ति। तत्त्वमिति उद्धेश – लक्षण – परीक्षणादिनेतरभिन्नत्वप्रकारकं ज्ञानं [1]सम्यक्ज्ञानमिति, अत्रार्थे सम्मतिमाह[2] 'यदाहे'ति त्रिसूत्रिनस्तु अर्थान्तरमव्यक्तमिति चेन्न। शास्त्रस्य तत्वज्ञानफलकत्वे निर्णीते शास्त्रप्रवृत्तेः।। सर्वं रञ्जितम्।।

उद्देश – लक्षण – परीक्षा – निरूपणम्

त्रैविध्यादेतत्प्रकारत्रयं विना सम्यग् ज्ञानं (न) भवतीति नार्थान्तरम्। लक्षणस्य त्रीणि दूषणानि, अव्याप्तिः अतिव्याप्तिरसम्भवश्चेति – तत्र लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः, अलक्ष्ये लक्षण्स्य गमनमतिव्याप्तिः, [3]लक्ष्यमात्रावर्तनमसंभवः। ततश्च एतादृशदूषणरहितोद्देशादि लक्षणाकरणे कथमेतस्यापि विशेषाकारेण ज्ञानं स्यात्। अतः स्वरूपं कथयन्, आदौ दूषणत्रयरहितमुद्देशलक्षणमाह – 'उद्देशे'ति। तथा च एतादृशसङ्कीर्तनत्वमेव एतल्लक्षणमिति भावः। मात्रपदादौ न (पदादाने) लक्षणवाक्येऽतिव्याप्तिः, अतः तद्दूषणम् (तद्दानम्)– 'लक्षणन्त्वि'ति। अत्र

1. घ – 'ज्ञानम्' इति स्थाने 'लक्षणम्' इति पाठः।
2. क–ख – 'सम्मतिमाह' इति स्थाने 'सम्मतिमादायाह' इति पाठः।
3. घ – 'मात्रागमनम्' इति पाठः।

वचनपदं लेखकदोषादापतितमिति । वस्तुतस्तु यथा घटशब्दो वाच्यवाचकभावसम्बन्धेन घटे वर्तते तथा असाधारणधर्मपदं लक्षणे वर्तते, एवञ्च वचनरहितो भागः स्वरूपकथनपरः तदन्तोभागः लक्षणपरः, तथा च विशेष्यत्वेन उपात्तमिति न वैयर्थ्यमिति [1]धर्म-मात्रस्य लक्षणत्वे प्रमेयत्वादिसाधारणधर्मेऽतिव्याप्तिः स्यात्। अत उक्तम्– साधारणेति – [2]व्यावर्तकधर्म इति भावः। लक्षणस्य [3]स्वरूपमुदाहृत्य दर्शयति[4] –'यथे'ति 'तेनैते' इति। यतः शास्त्र-स्य त्रिविधा प्रवृत्तिः अतः त्रयाणां कर्तव्यतावश्यकत्वे प्रथमसूत्रेण उद्देशस्य जातत्वात्। अवशिष्टे लक्षणपरीक्षे येन ते नइत्यर्थः।

प्रमाणनिरूपणम्

[5]ननु प्रमेयत्वादेरपि (प्रमेयादेरपि) लक्ष्यत्वाविशेषात्, कथं [6]प्रमाणमेवादौ लक्ष्यते, न च सूत्रकारेण तथोद्दिष्टत्वात्, [7]तथापि पर्यनुयोगः स्यादित्यत आह–'तत्रापी'ति लक्ष्यत्वाविशेषेऽपि प्रमे-यादेः प्रमाणार्थिना (प्रमाणाधीना) सिद्धिः, नान्यथा बुभुत्सि-तत्वेन प्रमाणमेवादौ लक्ष्यते इति भावः, तावच्छब्दः क्रमवाची

1. क-ख – 'धर्मसूत्रस्य' इति पाठः।
2. क-ख – 'विजातीय' इति अधिकः पाठः।
3. क-ख – 'कोशम्' इति पाठः।
4. घ – 'सास्नादित्यादिशब्देन लाङ्गलककुदादिनां ग्रहणम' इति पाठः।
5. क-ख – 'ननु' इति नास्ति।
6. घ – 'लक्षणम्' इति अधिकः पाठः।
7. क-ख – 'तत्रापि' इति पाठः।

तेन क्रमेण प्रमेयादिरपि लक्ष्यते इति भावः। प्रमाणमित्यत्र प्रमितिः प्रमाणमिति भावव्युत्पत्तिर्नाश्रयणीया, चक्षुरादेरप्रमाण-त्वापत्तेः, [1]किन्तु प्रमीयतेऽनेनेति करणव्युत्पत्तिराश्रयणीया। लक्ष्य-लक्षण – विभागानभिज्ञं प्रत्याह – 'अत्रे'ति – करणस्येति। यद्यत्का-रणं तत्तत् फलवदित्यर्थः। सन्त्यमी (सत्यम्) इत्यर्धाङ्गीकारेण उत्तरम्, व्याप्तिः अङ्गीक्रियते उक्तत्वात् वक्तव्यमिति नाङ्गी-क्रियते इत्यर्थः। फलशब्दार्थानभिज्ञं प्रत्याह – 'साध्यमि'ति। अत्रार्थ (र्थे) दृष्टान्तमाह – 'छिदे'ति – छिदा द्वैधीभाव इत्यर्थः।

प्रमाशब्दनिर्वचनम्

प्रमाशब्दानभिज्ञः पृच्छति – 'का पुनरि'ति। प्रमाणलक्षणप्र-स्तावे प्रमाणपदार्थप्रश्नोऽप्रस्तुत इत्यत आह – 'यस्या' इति। उत्तर-माह – 'यथार्थे'ति – यथार्थश्चासावनुभवश्चेति कर्मधारयसमासः। ननु यथा शब्देन "अव्ययं विभक्तिः" इत्यादिसूत्रेणाव्ययीभावः। तथा च "स नपुंसकमि"ति सूत्रेण यथार्थमिति स्यादिति चेन्न, "यथा सादृश्य" इत्युत्तरसूत्रेण सादृश्यव्यतिरिक्तेषु योग्यता विष्टा (वीप्सा) पदार्थानतिवृत्तिलक्षणेषु यथार्थेषु वर्तमानस्य यथा-शब्दस्य अव्ययीभावस्य विवक्षितत्वात् [3]अर्थस्यानुभवस्य च अबाधि-तत्वं सादृश्यम्॥

---

1. क–ख – 'किन्तु' इत्यधिकः पाठः।
2. ग – 'इतिभावः' इति पाठः।
3. घ – 'भावस्य विदितत्वात्' इति अधिकः पाठः।

अत्रेदं विचार्यते – यथाकथञ्चित् सादृश्यं वा अनुभवविषयीभूतार्थ[1] मात्रनिष्ठधर्मेण वा; नाद्यः प्रमेयत्वादिना सादृश्यस्य भ्रमेऽपि सत्वात्, न द्वितीयः अर्थनिष्ठधर्मस्य घटत्वादेः अर्थवृत्तित्व (त्वेन) ज्ञानावृत्तित्व (त्वात्)। अबाधितत्वमेत्र सादृश्यं न भवति, ज्ञानमात्रवृत्तित्वेऽपि अर्थावृत्तित्वात्, उभयवृत्तित्वस्य वक्तुमशक्यत्वात्[2] अतो यत्र यदस्ति तत्र तस्यानुभवः प्रमेति[3] लक्षणं बोद्धव्यम् यत्र विशेष्ये यदस्ति तत्र विशेष्ये[4] प्रकारीभूतस्य योऽनुभवः सः प्रमितिलक्षणार्थः। अन्यथा जातिभानं (भाने) व्यक्तेः अवश्यं भावात् (भानात्), इदं रजतमिति भ्रमे वस्तुतो [5]रजतत्वस्याप्रतीतेः अतिव्याप्तिः स्यात्, रजतभ्रमे रजतस्यापि विशेष्यत्वात्? [6]उक्तार्थकरणे न दोषः।

ननु घटे रूपं घटे घटत्वम् इत्यादिषु घटप्रकारकज्ञान (ज्ञाने) रूपघटत्वयोः विशेष्ययोः [7]घटाख्यप्रकारस्य अवृत्तेः अव्याप्तिरिति चेन्न, यत्र यदस्तीत्यनेन यत्र विशिष्य यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभवस्य विशेष्ये विशेषणे सम्बन्धांशे च प्रमा इत्यन्यार्थस्य च विवक्षितत्वात् इत्यास्तां विस्तरः।

अन्यथाख्यातेरभावात् व्यावृत्त्यप्रसिद्धिः मा भूदिति एतदर्थं तत्स्थापनाभिप्रायेण[8] यथार्थपदव्यावर्त्यमाह – 'यथार्थे'ति। एकस्मिन्

1. क–ख – 'मात्र' इति नास्ति।
2. ग – 'च' इत्यधिकः पाठः।
3. क–ख – 'प्रस्तुते' इति पाठः।
4. क–ख – 'विशिष्टे' इति पाठः।
5. ग–घ – 'रजताधारतांप्रतीतेः' इति पाठः।
6. घ – 'क्रमेण' इति पाठः।
7. घ – 'घटस्य' इति पाठः।
8. क–ख – 'स्थानांभिप्रायेण' इति पाठः।

धर्मिणि विरूद्धनानाप्रकारकज्ञानं संशयः। यत्वनवधारणं ज्ञानं संशय इति – तन्न। अन्योन्याश्रयापत्तेः, अनवधारणत्वं हि निश्चयभिन्नज्ञानत्वं, निश्चयत्वं संशयभिन्नत्वमिति। मिथ्याज्ञानं विपर्यय इति न लक्षणं मिथ्याज्ञानस्य विवक्षितविवेकेन विपर्ययघटितत्वेन आत्माश्रयता (तापत्तेः), किन्तु तदभाववति तत्प्रकारकज्ञानं विपर्ययः, 'व्याप्यारोपेण व्यापकारोपः तर्कः', एतेन [1]संशयविपर्ययतर्कज्ञानानां व्यावृत्तिः क्रियते इत्यर्थः। इह यद्यपि विपर्ययग्रहणादेव तेषां ग्रहणं भवति, तथापि परस्परावान्तरभेद (व्या) ख्यापनार्थं पृथगुक्तम्। अत एवाग्रे भिन्नत्वेन व्यक्तीकरिष्यति। अनुभवत्वस्य स्मृतित्वानधिकरणज्ञानत्वरुपत्वात् एतल्लक्षणं लाघवेन यथार्थज्ञानत्वमिति [2]एतावदेवास्तु इत्याशङ्क्य अनुभवपदव्यवर्त्यमाह – 'अनुभव' इति।

करणलक्षणम्

प्रमास्वरूपेऽवगते करणजिज्ञासायाः अनिवृत्तेः तज्जिज्ञासुःपृच्छति – 'किं पुनरि'ति। 'सर्वशास्त्रमुखं व्याकरण'मिति व्याकरणसूत्रेण उत्तरयति'साधकतममि'ति। (तमबर्थं) वृत्तिमुखेन स्पष्टयति – 'अतिशयितमि'ति। अतिशयार्थमाह – 'प्रकृष्टमि'ति।

---

1. घ – 'एतेषां व्यावृत्तिः' इति पाठः।
2. क–ख – अतदेवास्तु' इति पाठः।

कारणलक्षणम्

ननु किं कारणत्वं समाकारि (सहकारि) विरहप्रयुक्तकार्याभाववत्त्वं तावन्न सम्भवति। समा (सह) कारित्वस्य कारणत्वेन आत्माश्रयदोषप्रसङ्गात्। किञ्च प्रमुक्तत्वं जन्यत्वं, व्याप्यत्वं व्यापकत्वं वा? नाद्यः, कार्यध्वंसस्य समा (सह) कारिविरहाजन्यत्वेन इतरेषां प्रागभावादीनां प्रागभावाजन्यत्वेन सुतराम् अजन्यत्वात्। दण्डादेरेव गतत्वात्। नान्त्यः, व्यभिचारस्य प्रत्यक्षसिद्धत्वात्। अथ अन्वयव्याप्त्येतर (स्वस्वव्याप्येतर) सकलसम्पत्तौ सत्यां कार्याभावव्यापकाभावप्रतियोगित्वम्। तत्र यद्यपि घटाद्युत्पत्तिस्थले सकलेतरसम्पत्तिर्न सम्भवति। कारणत्वेनाभिमतसम्पत्तौ उच्यमानायाम् आत्माश्रयप्रसङ्गात्,[1] तथापि कार्यत्वेनाभिमतनियतपूर्ववर्ति (ना) अभिमतम्। नियमश्चायं यत्र देशे काले [2]वा घटाद्युत्पत्तिः, तत्र यदवश्यं पूर्वं वर्तते इत्येवं बोध्यः। घटाद्युत्पत्तिस्थले देशान्तरीयनियतपूर्ववर्तिसम्पत्तेः असम्भवात्।

न च कार्याभावव्यापकाभावप्रतियोगित्वं दण्डादेः न [3]सम्भवति भ्रमेरसम्भवात्[4]। कार्यघटाद्यभावसत्वेऽपि क्वचिद्दण्डादिसत्वादिति वाच्यम्; स्वस्वव्याप्तीतर (व्याप्येतर) नियतपूर्ववर्तिसम्पत्तौ यदभावावच्छिन्नकार्याभावव्यापकाभावप्रतियोगित्वं कारणत्वम्। तथा च दण्डाभावावच्छिन्नः कार्याभावो यत्र तत्र अवश्यं दण्डाभावः

1. क–ख – 'प्रसगङ' इति पाठः।
2. क–ख–ग – 'वा' इति नास्ति।
3. क – 'असम्भवि' इति पाठः।
4. ग – 'ग्रामे तदभावात्' इति पाठः।

तत्प्रतियोगित्वं च दण्डाभावत्वेऽस्ति (दण्डेऽस्ति) एव। वस्तुतो [1]बहुव्रीहिणा कार्याभावस्य व्याप्यो योऽभावः तत्प्रतियोगित्वमित्यर्थो व्यवसितः। एवं स्वस्वव्याप्येतरनियतपूर्ववर्तिसकलसम्पत्तौ दण्डत्वावच्छिन्नस्य यत्र सामान्याभावः तत्र अवश्यं घटाभावः अनयैव रीत्या कारणमात्रलक्षणं निर्णेयम्।

निरुक्तोभयव्याख्याने प्रागभावाव्याप्तेः। अतः कारणस्य अत्यन्तदुर्घटत्वेन निर्वक्तुम् अशक्यत्वात् कथं पर्यायशब्देन बोधः स्यादिति [2]भाववान् आशङ्कते– 'नन्वि'ति। निरुक्तानुपपत्तिपरिहारपूर्वकं सिद्धान्तं करिष्यमाणः प्रतिजानीते – 'उच्यते' इति। प्रतिज्ञातार्थमाह – 'यस्ये'ति। अनन्यथासिद्धनियतपूर्ववर्तित्वमिति पर्यवसितोऽर्थः।

ननु अत्र पूर्ववर्तित्वं प्रागभावावच्छिन्नकालवर्तित्वम्। प्रागभावस्य प्रागभावघटितत्वेन आत्माश्रयप्रसङ्गात्, नापि प्रतियोगिजनकाभावत्वम्, अन्योन्याश्रय (श्रयात्) आत्माश्रय इति चेन्न; (?) 'ग्रन्थान'धिकरणकालावृत्यभावस्य, अदृष्टानधिकरणकालावृत्यभावस्य वा प्रागभावत्वात्।

अनन्यथासिद्धत्वम् [3]अन्यथासिद्धिरहितत्वम् अतथात्वं पञ्चधा येन स्पष्टयकारि। यस्य यं प्रति पूर्ववर्तित्वमवगम्यते तेन तं प्रति तदन्यथासिद्धं यथा घटं प्रति दण्डरूपस्य। अन्यं प्रति पूर्ववर्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववर्तित्वमवगम्यते तं प्रति तदन्यथासि-

---

1. क–ख – 'बहुव्रीहिणा' इति लुप्तः पाठः।
2. ग – 'आशयवान्' इति पाठः।
3. क–ख – 'अन्यथासिद्धे' इति पाठः।

द्धम्, [1]यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञाते [2]एव ज्ञानं प्रति आकाशस्य।

ननु आकाशं प्रति ज्ञानपूर्ववर्तित्वे गृह्यमाणे कथं शब्दं प्रति पूर्ववर्तित्वमाकाशस्य ज्ञायते इति चेन्न। आकाशस्य (आकाशत्वस्य) एकमात्रवृत्तित्वेन अजातित्वेन शब्दसमवायिकारणत्वस्यैव तत्त्वात् [3]सहभूतमन्यथासिद्धम्, अन्यत्र क्लृप्तपूर्ववर्तिना कार्यसम्भवे तत् सम्भूतम्, [4]दूषणभूषणादिकं च सर्वमनुमानखण्डटीकायां मयोक्तमत्र प्राज्ञैर्बोध्यम्।

उदाहरति 'यथे'ति। उक्तान्यथासिद्धिरहितत्वात् घटमात्रं प्रति रासभमात्रम् अनन्यथासिद्धं तत्रातिव्याप्तिनिरासार्थं [5]नियतत्वग्रहणं कृतमित्याह – 'यद्यपी'ति। अनन्यथासिद्धपदव्यावर्त्यमाह– 'तन्तुरूपस्ये'ति। पटरूपजननोपक्षीणत्वात् इति पटरूपं प्रत्येव कारणत्वादित्यर्थः। उक्तप्रकारेण घटं प्रति अन्यथासिद्धत्वेन तस्य कारणत्वाभावः।

कारणत्व – कार्यत्व – निर्वचनम्

अत्र यद्यापि अनेन न काप्यन्यथासिद्धिरुक्ता। तथा च अप्रस्तुताभिधानमेतत्। किञ्च पटं प्रति तन्तुरूपस्यापि नियतपूर्ववर्तित्वे

---

1. क–घ – 'यथा' इति नास्ति।
2. घ – ज्ञानं एव ज्ञानं इति पाठः।
3. क–ख–ग – 'सहभूतमन्यथासिद्धिम्' इति नास्ति।
4. ग – 'यथा गन्धवति गन्धानुत्पादात् इत्यारभ्य' अतः चिन्तागणावपि त्रिविधान्यथासिद्धिः' पर्यन्तं इति अधिकः पाठः।
   घ – 'यथा गन्धं प्रति प्रागभावस्य नियतपूर्ववृत्तित्वकल्पनात्' इति अधिकः पाठः।
5. ग – 'नियतग्रहणं' इति पाठः।

क्षणगौरवस्य अकिञ्चित्करत्वात् कारणत्वमेव स्यात्, तथापि किञ्चिद्विशेषणं दत्वा अन्यथासिद्धिरेव तन्तुत्वादिसंग्राहिका-उच्यतां को दोषः? इत्याक्षेप यथोक्तान्यथासिद्धिभिरेव कारणत्वलक्षणे सिद्धे पटरूपं प्रति तन्तुरूपस्य कारणत्वे [1]स्वीक्रियमाणकारणलक्षणगौरवदोषः स्यात् इत्यभिप्रायकम् एतदभिधानम्,[2] उपसंहरति-'तेने'ति। पूर्ववर्तित्वस्य [3]कार्यानपेक्षितत्त्वात् कार्यलक्षणमाह - 'अनन्यथासिद्धे'ति। पटोत्पत्तिस्थले दैवादागतस्य घटादेः तन्तुजन्यता माभूदित्यर्थं - 'नियते'ति पटरूपादेः तन्तुजन्यत्वनिरासार्थं - 'अनन्यथासिद्धे'ति।

व्यतिरेकघटितकारणलक्षणनिराकरणम्

अन्यकृतलक्षणं दूषयितुम् उपन्यसति - 'यत्तु' इति। कार्येणानुकृतौ - अनुविहितौ अन्वयव्यतिरेकौ यस्य तत् तथा तस्मिन् तत्सत्त्वमिति अन्वयानुविधानम् तद्व्यतिरेकि (के) व्यतिरेक इति व्यतिरेकानुविधानम्, अव्याप्तिरिति[4] - दूषयति ('तेने'ति?) 'नित्ये'-ति। नित्यत्वंध्वंसप्रागभावाप्रतियोगित्वम्। विभुत्वं मेयत्वानच्छिन्न परिमाणयोगित्वं, नित्यत्वं हेतुः कालतो व्यतिरेकासम्भवे[5]।

---

1. ग - 'गौरवात्' इति पाठः।
2. ग-घ - 'अतो नाप्रस्तुताभिधानम्' इति अधिकः पाठः।
3. ग - 'कार्यसापेक्षत्वात्' इति पाठः।
4. ग - 'इति' इति स्थाने 'दोषेण' इति पाठः।
5. 'व्यातिरेकाभावे' हेतुः इति अधिकः पाठः।

ननु नित्यविभूनां व्यातिरेकासम्भवे इति अयुक्तं विश्व-स्यन्ताभावस्य केवलान्वयित्वात्, अत एव चिन्तमणौ वृत्तिमद-त्यन्ताभावप्रतियोगित्वं केवलान्वयित्वमिति केवलान्वयिलक्षणे वृत्ति-मदिति विशेषणम्। अन्यथा अत्यन्ताभावप्रतियोगित्वमेव सुष्टु स्यात्, तथा च आकाशात्यन्ताभावस्य आकाशरूपो योऽत्यन्ता-भावः तत्प्रतियोगित्वं च आकाशात्यन्ताभावेऽस्तीति अव्या-प्तिनिरासाय[1] वृत्तिमदिति[2] विशेषणम् आकाशस्यावृत्तिमत्वात् भवति केवलावय्यिकाकाशात्यन्ताभाव[3] इति चेन्न। यथाश्रुतलक्ष-णादरणे अन्यथासिद्धे अतिव्याप्तिः। न च अन्यथा (अनन्यथा) सिद्धत्वेनेत्यपि[4] विशेषणम् देयम्, तथापि युगपदुत्पन्नविनष्टयोः परस्परं प्रति परस्परस्य कारणता स्यात्। न च नियतपूर्ववर्ति-त्वेन अपि विशेषणीयम्, तर्हि आवश्यकत्वादेव (स्वत्तदेव) लक्ष-णमस्तु किमनेन इत्यभिप्रायो मूलकारस्य।

कारणप्रकारनिरूपणम्

[5]विशेषलक्षणं करिष्यमाणः कृतसामान्यलक्षणं विभजति-'तच्चे'ति। तिस्रा विधा दर्शयति - 'समवायी'ति[6]। उदाहरति-'यथे'ति।

---

1. ग – 'निरासार्थं' इति पेठः।
2. ग – 'अपि' इति अधिकः पाठः।
3. क–ख – 'आकाश' इति पाठः नास्ति।
4. घ – 'सति' इति अधिकः पाठः।
5. घ – 'कारण' इति अधिकः पाठः।
6. 'समवायि – असमवायि – निमित्तकारणम् इति त्रिविधं कारणमिति भावः। असमवायि कारणनिरूपणस्य समवायिकारण सापेक्षत्वात् आदौ समवायिकारणं लक्षयति'– इति अधिकः पाठः।

ननु पटाद्युत्पत्तिस्थले कारणत्रयसम्बन्धाविशेषात् कथं तन्तूनामेव समवायिकारणत्वं नेतरस्य इत्याशङ्कते - 'नन्वि'ति। सम्बन्धत्वेन साम्येऽपि अवान्तरभेदाद्भेद इत्यङ्गीकारेण समाधत्ते- 'सत्यमि'ति। तदेव स्पष्टयति - 'द्विविध' इत्यादिना, संयोगत्वस्य जातित्वात् लक्ष्यतया प्रथममुद्दिष्टमपि संयोगमुपेक्ष्य उपजीव्यतया चादौ समवायं लक्षयति - 'तत्रायुतसिद्धयोः सम्बन्धः' इति। संयोगं लक्षयति - 'अन्ययोरि'ति यत्र (युत) सिद्धयोरित्यर्थः। एतस्य लक्षणस्य स्वरूपसम्बन्धेऽतिव्याप्तिः, संयोगत्वमेव लक्षणं बोद्धव्यम्, अयुतसिद्धयोः अपृथक्सिद्धयोरित्यर्थः।

सोदाहरणम् अयुतसिद्धनिरूपणम्

सुवर्णोपष्टम्भकभागयोः (अति) व्यापकं लक्षणं स्यादित्याशयेन पृच्छति - कौ 'पुन'रिति। अपृथक्सिद्धयोः ययोः मध्ये यदेकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। सुवर्णावष्टम्भकभूभागयोः अपृथक्सिद्धत्वेऽपि स्वसमवायिकारण एव स्थितत्वात् नाश्रयाश्रयीभाव[1] इति भावः। अत्र [2]उद्योतकारस्य सम्मतिमाह - 'तदुक्तमि' ति। कथं स्थितिरित्यत आह - 'विनश्यदवस्था' इति। विनश्यत् अवस्था येषां ते अनाश्रिता अवतिष्ठन्ते इति भावः। तदेव स्पष्टमुदाहरति - 'यथे'ति।

---

1. क-ख - 'नाश्रयाश्रयीभावः' इत्यारभ्य 'तदुक्तमिति' पर्यन्तभागः लुप्तः।
2. घ - 'उद्योतकराचार्यसम्मतिमाह' इति पाठः। पुनः 'एतादृगयुतसिद्धवर्गं संकलय्योदाहरति - ययेति, लक्षणे अविनश्यदवस्थितमिति विशेषणस्य दीयमानत्वात अवयव्यादीनां विनश्यकालेपृथक्भावेऽपि नाव्याप्तिरित्याभिप्रेत्याह- अवयवेऽपि इति अधिकः पाठः।

ननु अविनश्यन्त इत्यस्यार्थो विनश्यत्तारहित इति – विनश्यत्ता च विनश्यतो भावः स च सत्तादिरपि भवति, तथा च स्थितिदशायामपि विनश्यत्ता स्यादित्यत आह – 'विनश्यत्तातु' इति। ध्वंसोत्पादकसकलकारणसान्निध्यमित्यर्थः।

ननु अविनश्यन्त अवयवावयविनोः समवायसम्बन्धे तन्तु-पटयोः किमायातमित्यत आह- 'तन्तुपटावि'ति। 'तेने'ति येन तयोः अवायववयविभावः तेनेत्यर्थः। अत्र हेतुमाह – अयुतसिद्धत्वादिति। ननु तन्तुपटयोरिव तुरी – पटयोः कथं न ससवायसम्बन्ध इत्यत आह- 'तुरीपटयोरि'ति। [1]हेतुमाह – 'अयुतसिद्धत्वाभावादि'ति। इममेव हेतुं स्फुटयति – 'नही'त्यादिना। अवबोधितं तु समवायिकारणत्वम् उपसंहरति 'तदेव'मिति।

समवायिकारणलक्षणम् उदाहरणं च

यदा तन्तुषु पटस्य समवायात् तन्तवः पटसमवायिकारणं तदा स्वगतरूपादिकं पटादिकमेव समवायिकारणमित्याह – 'पटश्चे'ति। उक्तमन्यत्रापि अतिदिशति – 'एवं मृत्पिण्डोऽपी'ति। ननु यदेव पटत्वजातिः दृश्यते तदैव रूपादेरिति[2] (रूपादिरिति) पौर्वापर्यनियन्त्रितकारणता कथं स्यादित्याशङ्कते – 'नन्वि'त्यादिना। ननु कारणताया अभावेऽपि समवायिकारणता कथं स्यादित्यत आह – 'अत' इति। अत्र हेतुमाह – 'तद्विशेषत्वादि'ति विशेषस्य सामान्य-

1. घ – 'अत्र' इति अधिकः पाठः।
2. ग – 'अपि' इति अधिकः पाठः।

व्याप्यत्वात् व्यापकनिवृत्त्या व्याप्यनिवृत्तेरावश्यकत्वादिति भावः। सिद्धान्तं वक्तुं प्रतिजानीते – 'अत्रोच्यते' इति। ननु (न) 'गुणगुणिनोरि'ति। क्षणस्य अतीन्द्रियत्वेन सम्यग्ज्ञातुम् अशक्यतया एकदैव उत्पत्तिर्दृश्यते इति भावः। आश्रयत्वादाद्यक्षणे द्रव्योत्पत्तिः इत्यत आह – 'किन्तु द्रव्यमि'ति। 'पश्चादि'ति। तदेकाश्रितकार्यत्वादिति भावः। समानकालोत्पत्ताविति। अत्र यद्यपि समानकालोत्पत्तिकानां समानसामग्रिकत्वनियमो नास्त्येव, तथापि भ्रान्तिशङ्काभिप्रायकम् उत्तरमिदम्।

यद्वा समानकालोत्पत्तौ अङ्गीक्रियमाणायां गुणिकारणातिरिक्तगुणकारणानुपलब्धेः[1] तयोः भेदो न स्यादित्यर्थः। कारणेऽपि कारणभेदेन अयं गुणः कार्यम्, इदं द्रव्यं कारणमित्यादिव्यवहारविलयापत्तिः स्यात् इति भावः निगदितार्थोपसंहारव्याजेन स्पष्टयति – 'तस्मादि'ति। यतः पूर्वापरभावनियन्त्रितकारणता अतः घटं प्रति घटो न कारणम् इत्याह – 'घटोऽपि' (घटो हि) इति सम्प्रदायः।

वयं तु ब्रूमः – ननु अनन्यथासिद्धमेव कारणं लक्षणमस्तु, किं पूर्ववर्तित्वेन?। तथा च [2]अनन्यथासिद्धरहिततया घटोऽपि स्वगुणान् प्रतिकारणं भविष्यत्येव, किमर्थमाद्ये लक्षणे निर्गुणघटोत्पत्तिः अङ्गीक्रियते इत्यत आह – 'घटोऽपि' (घटो हि) इति। अत्र हेतुमाह – 'एकस्ये'त्यादि। स्वस्य स्वकारणत्वाभावे पूर्ववर्तित्वभावाप्रयोजकः। तथा च अनन्यथासिद्धत्वम् इत्येतावतैव लक्षणे कृते [3]कार्यतयाभिमते घटेऽतिव्याप्तिः स्यादिति भावः। एतदुपलक्ष-

1. क–ख – 'कारणानुपलब्धतया' इति पाठः।
2. ग – 'अन्यथासिद्धिरहिततया' इति पाठः।
3. क–ख – 'कृते कार्यतयाभिमते' इति लुप्तः पाठः।

क्षणम्। पूर्ववर्तित्वभिन्नमात्रेऽतिव्याप्तिः बोध्या। तथा सति प्रवृत्तिरेव न स्यादिति भावः।

द्रव्य-लक्षणम्

ननु एतावता प्रबन्धेन गुणगुणिनोः कार्यकारणभावान्यथानुपपत्त्या प्रथमक्षणे 'घटाद्युत्पत्तिः' [1]अग्रिमक्षणे '[2]रूपाद्युत्पत्तिः' स्थापिता, तथा सति बहिर्द्रव्यप्रत्यक्षतावच्छेदकरूपाभावात् प्रथमक्षणे अप्रत्यक्षता स्यादित्याशङ्कते–'नन्वेवमि'ति। इदमुपलक्षणम्। अस्पार्शनश्च स्यादित्यपि द्रष्टव्यम्। यत्र यत्र अरूपिद्रव्यत्वं तत्र तत्र आचाक्षुषत्वमिति व्याप्तेरसत्वात् (व्याप्तेः सत्वात्) द्रव्यादिपदं रूपादौ अनैकान्तिकतावारणार्थम्। तर्हि, कथं भूतद्रव्ये चाक्षुषता स्यादित्यत आह– 'तदेवहि' इति। रूपवत्त्वस्यैव प्रयोजकत्वे अक्ष्णोः अपि चाक्षुषता स्यादित्यतः– 'उद्भूतरूपे'ति। तावन्मात्रस्य प्रयोजकत्वे परमाणौ व्यभिचारः स्यात् अत उक्तं सत्यन्तम्। न केवलं [3]अचाक्षुषतापत्तिः, अपि तु गुणे गुणाश्रयत्वाभावात् अद्रव्यं च स्यादित्यत आह– 'अद्रव्यं' चेति। प्रथमे क्षणे निर्गुणघटोत्पत्तिरङ्गीक्रियते अचाक्षुषतापत्तेः,दोषत्वं नाङ्गीक्रियते इत्यर्धाङ्गीकारेण[4] आह–'सत्यमि'ति। प्रथमे क्षणे इति परमसूक्ष्मपरमाण्वादिवत् अतीन्द्रियो न गृह्यते चक्षुषा यदि तदा न

1. क-ख – 'अन्तिमक्षणे' इति पाठः।
2. घ – 'घट' इति अधिकः पाठः।
3. ग – 'चाक्षुषता अनिष्टापत्ति' इति पाठः।
4. ग – 'अर्धाङ्गीकाराभिप्रायेण परिहरति' इति पाठः।

किञ्चिदनिष्टमित्यर्थः। तथा सति अतीन्द्रियसूत्रलोपापत्तिरिति भावः। न गुणोत्पत्तिक्षीण (क्षण) दशायाम् अन्धकारादिना घटो न गृह्यते चक्षुषा यदि, तदानीम् अचाक्षुषतामादाय तत्रापि मते अचाक्षुषता स्यादिति भावः। 'तेने'ति – येन कारणेन ग्रहणम् अन्यसहकारिविरहादेव अग्रहणम्, नोक्तदोषः तेन कारणेन घटो निर्गुण इत्यादौ उत्पद्यते [1]इत्यर्थः। अद्रव्यं चेति उक्तदोषादित्याह – 'नचे'ति। अत्र हेतुमाह – 'समवायिकारणमि'ति। यद्यपि आद्यक्षणे न किञ्चित्कार्यं तत्समवेतम् उत्पद्यते तथापि समवायिकारणतावच्छेदत्वस्वरूपसत्वात् योग्यतास्ति, समवायिकारणतावच्छेदकद्रव्यत्वमेव लक्षणमिति भावः। 'योग्यतये'ति – गुणात्यन्ताभावानधिकरणतया गुणाश्रयत्वलक्षणयोगादित्यर्थः।

ननु यत्किञ्चित् गुणात्यन्ताभावानधिकरणत्वं सकलगुणात्यन्ताभावानधिकरणत्वं वा? नाद्यः – असम्भवात्, अननुगमाच्च। न [2]वा सर्वस्मिन् द्रव्ये सर्वगुणाः वर्तन्ते, नापरः सर्वस्यैव संयोगात्यन्ताभावाधिकरणत्वात्। अत्रैव यत्र ये गुणाः वर्तन्ते तदत्यन्ताभावानधिकरणत्वमिति लक्षणं परास्तम् इति चेन्न। प्रतियोग्यसमानाधिकरणत्वमेव लक्षणं बोध्यम्।

ननु गुणात्यन्ताभावानधिकरणत्वं गुणात्यन्ताभावाभावत्वेन (सत्वेच भवति) सचात्यन्ताभावो गुण एव गुणात्यन्ताभावाभावत्वात्। तथा च स दोषस्तदवस्थ एवेति चेन्न। गुणात्यन्ताभावविरोधिधर्मस्योक्तत्वात्; विरोधित्वं च समानोपस्थायित्वं (सहानवस्थायित्वम्), तच्च तत्प्रागभावानां ध्वंसानां गुणानाम् चेति, अत एव

1. ग – 'भावः' इति पाठः।
2. ग – 'वा' इत्यत्र 'हि' इति पाठः।

गुणात्यन्ताभावे नातिव्याप्तिः, [1]एतदन्यतमवत्त्वाभावात् न च अभावेऽतिव्याप्तिरेव, न गुणात्यन्ताभावस्य गुणात्यन्ताभावानधिकरणत्व-गुणध्वंस – तत्प्रागभावान्यतमत्वप्रसङ्गः स्यादिति वाच्यम्। अधिकरणस्य भावादेव उक्तत्रयाभाववत्प्रमोत्पत्तेः आवश्यकत्वात् आत्माश्रयभयेन स्वस्वावृत्तेरेव भवत्यतिव्याप्तिशङ्का, अधिकं तु मत्कृतकिरणावलीटीकायां द्रष्टव्यम्।

असमवायिकारणनिरूपणम्

क्रमप्राप्तमसमवायिकारणं निरूपयितुं प्रतिजानीते – 'असमवायी'ति। 'यदि'ति – यस्य कार्यस्य असमवायिकारणं लक्ष्यं [2] तत्समवायिकारणं तत्कार्यं च तदन्यतरप्रत्यासन्नम् इत्यर्थो बोध्यः। प्रत्यासत्तिश्च समवायरूपा बोध्या। 'अवधृतसामर्थ्यमि'ति – अवधृतं सामर्थ्यं कारणत्वं यस्य तत्तथाभूतमित्यर्थः। एवं कार्यकारणोभयनिरूपितसम्बन्धाश्रयैकार्थसमवायत्वेनेति कारणत्वयोग्यसमवायिकारणमिति लक्षणं पर्यवसन्नम्। कारणत्वयोग्यसमवायिकारणमित्येव कृते निमित्तकारणेऽतिव्याप्तिः, अतः कारणैकार्थप्रत्यासत्तित्वे सति (इति), तावत्येवकृते कारणेन पटेन सह तन्तुरूपस्य तन्तुषु एकस्मिन्नर्थे समवायात् तन्तुरूपादौ लक्षणसम्भवेऽपि अकार्येण पटेन सह तन्तुद्वयसंयोगस्य एकस्मिन्नर्थे समवेतस्य समवायिकारणत्वं स्यात्, अतः कार्येति। एवमपि अनुगतोभयनिष्ठरूपाभावात् प्रत्येकमव्याप्तिः स्यात्, अत उक्तम् उभयनिरूपितसम्बन्धाश्रयेति। कारणत्वयोगिनः सकलार्थप्रत्यासन्नस्य प्रागभावस्य दण्डस्य वा

1. क–ख – 'अन्यतमत्वाभावात्' इति पाठः।
2. ग – 'ते' इति अधिकः पाठः।

समवायिकारणत्वं स्यात् – अतः समवायिग्रहणम्, मृत्पिण्डसमवेत भ्रमे कथं न घटो समवायिकारणतामिति चेन्न, कथं वा समवायिकारणत्वलक्ष्यतादशायां तद्भिन्नत्वे सति इत्यस्याबोध्यत्वात्, कार्येण सुखदुःखेन तस्मिन्नर्थे आत्मनि समवेतस्य अदृष्टस्य सुखं प्रति असमवायिकारणत्वं मा भूदित्येतदर्थम् आत्मविशेषकगुणान्यत्वे सति इत्यन्तं बोद्धव्यम्। ननु एवं सति अनुगतलक्षणं न स्यादिति चेन्न – अग्रे उच्यते इति संक्षेपः।

उक्तासमवायिकारणलक्षणं लक्ष्ये उपपादयति – 'यथा' इत्यादिना। परम्परया समवेतस्य असमवायिकारणत्वे अतिप्रसङ्ग इत्यभिप्रायेणाक्षिपति – 'नन्वि'ति। 'नैवमि'ति कारणैकार्थप्रत्यासत्तेः नियामिकायाअस्पत्त्वात् परम्परया समवेतस्य समवायिकारणत्वे-नातिप्रसङ्ग इतिभावः। एतदुभयोपजीवकत्वात् उभयनिरूपणम्।

निमित्त–कारणनिरूपणम्

अनन्तरं निमित्तकारणं वक्तुं भूमिकामारचयति – 'निमित्तकारणमि'ति। निरूक्तोभयकारणान्योन्याभाववत्वे सति कारणत्वयोगि 'निमित्तकारणमि'त्यर्थ ननु कारणसामान्यलक्षणं वस्तुत्वं जनकत्वस्य केवलान्वयित्वात्। अत एव अनुमानखण्डे जनकत्वस्य केवलान्वयितया नान्वयव्यतिरेकित्वमिति दूषणमुक्तम्। शक्तिवादे पारिमाण्डलयभिन्नवस्तुत्वमेव कारणत्वमस्तु। एवञ्च द्रव्यत्वमेव समवायिकारणत्वमस्तु। गुणकर्मान्यतरत्वमेव असमवायिकारणत्वमस्तु किमर्थमेतावान् प्रयास इति चेन्न। किं तत्र कारणम्,

1. घ – 'घट' इति अधिकः पाठः।

किं तत्र समवायिकारणमिति विशेषजिज्ञासायामेव एतेषां [1]लक्षणानामुत्थानात् एतान्यपि फलोपहितानामेव कारणानां प्रवृत्त्यौपयिकं तु अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वमुपलक्षणम् अतीतानागतकारणानांबोध्यमिति। ननु समवायिकारणनाशेन कार्यनाशस्य आवश्यकत्वात् ध्वंसस्य च समवायिकारणजन्यत्वे समवायिकारणनाशे सति ध्वंसनाशोऽपि अवश्यं वाच्यः। तथा च घटाजनकत्वप्रसङ्गात् इत्याशयेन भावानामेव कारणत्रयजन्यत्वं नाभावस्येत्याह – 'तदेतदि'ति। कारणविचारे प्रस्तुते कृतस्य कारणविचारस्य अप्रस्तुताभिधानत्वं मा [2]प्रसांहीत् इत्येवमर्थं प्रकृते सङ्गमयति – 'तदेतस्ये'ति। वक्ष्यमाणाव्याप्तिदूषणात् अनधिगतार्थगन्त्रपि न प्रमाणलक्षणमिति उपसंहारवाक्येन परिच्छिनत्ति – 'तेन व्यवस्थितमि'ति।

'अनधिगतार्थगन्तृत्वम्' इति प्रमाणलक्षणखण्डनम्

परकीयलक्षणं दूषयितुमुपन्यसति – 'यत्त्वि'ति। 'अनाधिगते'ति। 'ये गत्यर्थाः ते ज्ञानार्थाः' इति न्यायेन 'अज्ञातार्थग्राही' इत्यर्थः। ज्ञानं प्रमितिः प्रमाणम् इति भावव्युत्पत्त्या प्रमाणमिति [3]प्रमा तत्करणं प्रमाणमिति च नाभिप्रायः। स्मृतौ अतिव्याप्तिवारणाय अनधिगतेति। यद्वा करणव्युत्पत्तिरेव [4]अङ्गीकरणीया। तथा च अज्ञातार्थग्राहकमिति लक्षणार्थः, स्मृतिकरणे[5] अतिव्याप्तिवारणाय - 'अज्ञाते'ति। दूषयति - 'तन्ने'ति भिन्नभिन्नघटेषु घटत्वप्रकारक-

---

1. क–ख – 'लक्षणानामु' इति लुप्तः पाठः।
2. क – 'मास्तु नाक्षिता' इतिपाठः।
3. क–ख – 'प्रमा' इति लुप्तः पाठः।
4. ग – 'आदरणीया' इति पाठः।
5. घ – 'कारणे' इति नास्ति।

ज्ञानानां धारावाहिकत्वं नास्तीति एकस्मिन्नित्युक्तम्[1]। 'अप्रामाण्ये'ति [2]भावव्युत्पत्या अप्रमाणत्वप्रसङ्गादित्यर्थः। ननु वशेषण भेदात् विशिष्टभेदो भविष्यति इयाशङ्कां निराकरोति – 'नचे'ति। स्वभिन्नकयलोपधाव्यापककालोपाधिः क्षणः। तथा च एतादृशक्षणस्यापि अतीन्द्रियतया प्रत्यक्षगोचरत्वादित्यर्थः। ननु सूक्ष्मस्य अपि क्षणस्य भेदेन किं नः छिन्नमिति भ्रान्तशङ्कायामाह – 'भेदग्रहे' (कालभेदग्रहे) इति। आदिपदग्राह्यौ विभागपूर्वदेशसंयोगाकाशौ 'इदं [3]शतपत्रपत्रशतं मयैकदेव सूचया भिन्नम्' इति यौगपद्याभिमानः, क्रिया, क्रियातो विभागः तस्मात् संयोगनाशः उत्तरसंयोग इति चतुर्षु क्षणेषु जायमानः सार्वलौकिकः न स्यादित्यार्थः। ननु प्रमातृप्रमेययोः कारणत्वाविशेषे कथम् इन्द्रियसंयोगादिकमेव कारणमिति शङ्को- 'नन्वि'ति 'सत्यपी'ति सव्यापारे प्रमातरि प्रमेये च सति प्रमोत्पत्तिः आवश्यकत्वादित्यर्थः। आदिपदग्राह्याणि लिङ्गपरामर्शादीनि।

प्रत्यक्षनिरूपणम्

कृतसामान्यलक्षणस्य विशेषलक्षणं वक्तुं विभजते – 'तानी'ति। चतुष्टयातिरिक्तं न प्रमाणम्, सतोऽपि अत्रैवान्तर्भावः। ननु चार्वाकाः प्रत्यक्षमङ्गीकुर्वन्ति, काणादोपगते प्रत्यक्षानुमाने, सांख्याः शब्दं च, उपमानेन अर्थापत्त्या सहितानि प्राभाकराः, अभावषष्ठानि इति भाट्टाः, वेदान्तिनश्च, सम्भवैतिह्ययुक्तानि तानि

1. ग – 'एव' इति अधिकः पाठः।
2. क–ख – 'भावव्युत्पत्या' इत्यारभ्य 'नचे'ति पर्यन्तभागः नास्ति।
3. क–ख – इदं शतपत्रपत्रशतं मयानूध युगपद्भिन्नमिति पाठः।

पौराणिकाः (मनुः) इति बहुवादिविवादे जाग्रति सति न्यूनाधिकसंख्याव्यवच्छेदः प्रमाणानीत्यत्र गौतमसम्मतिमाह— 'तथा चे'ति। न्यायशास्त्रकर्ता अक्षपादो मुनिरपि चतुष्टयातिरिक्तं न प्रमाणम्, न च अन्यूनमित्यभिप्रायेणैव कृतसामान्यलक्षणं विभक्तवानिति भावः। तत्सूत्रं [1]पठति— 'प्रत्यक्षमि'ति। अनुमानाद्युपजीव्यतया आदौ [2]उद्दिष्टस्य प्रत्यक्षस्य अनाकांक्षिताभिधाननिरासाय आकांक्षामुद्भावयति— 'किं पुनरि'ति। लक्षणमाह— 'साक्षात्कारी'ति। साक्षात्कारिणी या प्रमा तत्करणं प्रत्यक्षमित्यर्थः। प्रत्यक्षभ्रमकरणेऽतिव्याप्तिवारणाय प्रमेत्युक्तम्। नन्वेतावता कथम् अनुमितौ न साक्षात्कारित्वमित्यत आह— 'साक्षात्कारिणी'ति। यां प्रमां प्रति इन्द्रियत्वेन जनकत्वं सा इन्द्रियजन्यत्वेन साक्षात्कारिणीत्यर्थः। ननु जन्यज्ञानमात्रस्यैव मनोजन्यत्वेन कथमतिव्याप्तिवारणमिति चेन्न। मनसः इन्द्रियत्वमनस्त्ववत्त्वे सत्यपि प्रत्यक्षविशेषं प्रति इन्द्रियत्वेन जनकत्वं, मनस्त्वेनैव। प्रत्यक्षविशेषातिरिक्ते मनसोऽजनकत्वात्। नन्वनुमितौ जन्यायां मनसः इन्द्रियत्वमनस्त्वोभयवैशिष्ट्यविशेषेण इन्द्रियत्वेन न जनकत्वं मनस्त्वेनैवेति कथं नियमः। जातिसङ्करादेश्च तादृशसामर्थ्याभावादिति चेन्न। यथा अनुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपम् अनुमानस्य अनुमानत्वम्। अन्यथा अनुमितेः आकस्मिकता स्यात् एवं जन्य (त्व) प्रत्यक्षकार्यतायां चाक्षुषादेः अननुगतत्वेन प्रमेयत्वादेः अतिप्रसक्तत्वेन च जन्यप्रत्यक्षनिष्ठकार्यताप्रतियोगिकारणतावच्छेदकम् इन्द्रियत्वम्। अतः प्रत्यक्षत्वानाश्रयज्ञानकारणतानवच्छेदकत्वात् इन्द्रियत्वस्य साक्षात्कारिज्ञानकारणतानच्छेदकत्वमेवेति

---

1. ग – 'प्रथयति' इति पाठः।

2. क – 'उद्दिष्टस्य प्रत्यक्षस्य' इति भागः लुप्तः।

[1]बुद्धिवैशद्याय । प्रत्यक्षप्रमावान्तरभेदमाह – 'साचे'ति । द्वैविध्य-माह – 'सविकल्पके'ति । अत्र यद्यपि प्राभाकराः निर्विकल्पकं नाङ्गीकुर्वन्ति तथापि गौरिति 'प्रत्यक्षं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात्' इत्यनुमानात् साध्यमित्यभिप्रायः । तत् करणं च इदमाह – 'तस्या' इति त्रैविध्यमेव दर्शयति – 'कदाचिदि'ति इन्द्रियजन्यसम्बन्धार्थग्राहकत्वेन इन्द्रियार्थसन्निकर्षमाह – 'अर्थे'ति । नाम संज्ञा, जातिः – ब्राह्मणत्वादिः, आदिपदेन गुणकर्मणोः ग्रहणं, योजना – वैशिष्ट्यम् । तेन ज्ञानं (हीनं) तदनवगाहीत्यर्थः । 'किञ्चिदि'ति । यद्यपि निर्विकल्पकस्य निष्प्रकारतया किञ्चिदित्याकारो न भवत्येव, तथापि वस्तुसत्तामात्रावगाहिन प्रकारावगाह्यपीति तात्पर्यकोऽयं ग्रन्थः । प्रसिद्धकरणस्वभावः नातिक्रमतीत्याशयेन दृष्टान्तमाह – 'छिदाया' इति इन्द्रियार्थसन्निकर्षस्य किं फलं प्रति केन व्यापारेण कारणत्वमित्याशयेन पृच्छति – 'कदे'ति । उत्तरमाह – 'यदे'ति । हानं त्यागः, उपादानं ग्रहणम्, उपेक्षा उदासीनता, तत्प्रयोजकज्ञानानामित्यर्थः । अत्र सविकल्पकस्य हानादिबुद्धीनां च [2]इन्द्रियाकरणकत्वेन प्रत्यक्षत्वमेव न स्यात् । अतः 'इन्द्रियार्थसंनिकर्ष' इति । निर्विकल्पकयोः करणलक्षणयोगमात्रेणैव कारणत्वं दर्शितम् । वस्तुतः प्रत्यक्षप्रमाणताप्रयोजकं करणत्वं इन्द्रियार्थसंनिकर्षः (र्षे) निर्विकल्पकद्वारा स्वाङ्गं स्वाव्यवधायकमि'ति न्यायेन इत्याशयेन निर्दुष्टं नवीनमतमाह – 'कश्चिदाहे'त्यादि ।

इन्द्रियसंनिकर्षनिरूपणम्

करणभेदमभिधाय संनिकर्षभेदमाह – 'इन्द्रियार्थयो'रिति न्यूनाधिकसंख्याव्यवच्छेदार्थः । तानेव षट्प्रकारान् दर्शयति – 'यदे'

1. ग – 'शिष्य' इति अधिकः पाठः ।
2. ग – 'इन्द्रियस्याकरणत्वे' इति पाठः ।

त्यादिना। ननु यदा [1]बाह्यघटादेः प्रत्यक्षमुत्पद्यते तदा किम् इन्द्रियम्? को वा विषयः? कः संनिकर्षः? इत्याकांक्षायामाह- 'तत्र यदे'ति। एवं [2]यद्वाविशेषगुणवदिन्द्रियाग्राह्यविषयं[3] प्रत्यक्ष-मुत्पद्यते तदा तत्र किमिन्द्रियम्? को विषयः? कः सम्बन्धः? इत्याकांक्षायामाह–'एवं मनसे'ति। एवमुत्तरोत्तरं संनिकर्षाभिधाने आकांक्षोद्भावनं स्वयमूह्यम्। अनन्वयासिद्धान्वयव्यतिरेककारण-ताकः उक्तसंनिकर्षातिरिक्तसंनिकर्षेषु [4]घटपरिमाणग्रहोऽस्तीत्याह- 'घटे'ति। स्पष्टत्वात् अन्वयसहचारम् उपेक्ष्य व्यतिरेकसहचारमाह- 'सत्यपी'ति संनिकर्षमाह– 'चतुष्टये'ति।

ननु चक्षुरादीन्द्रियस्य घटाद्यभावो न विशेषणं न वा विशे-ष्यमिति कथम् अभावग्रहे इन्द्रियार्थसंनिकर्षः विशेषणविशेष्यभावो भवेदित्यत आह–'तदेवमि'ति। इन्द्रियसम्बन्धेन (सम्बद्धेन) भूत-लादिना सह विशेषणविशेष्यभावः इति भावः। संयोगसंयुक्तस-मवायादीनां सम्बन्धत्वेन रूपेण अनुमानं कृत्वा इन्द्रियसम्बन्धिता वाच्येति 'संक्षेपत' इत्युक्तेरर्थः। उक्तसंनिकर्षमुपसंहरति– 'तदेव-मि'ति। इयता प्रबन्धेनोक्तं प्रमेयं शिष्यबुद्धिदार्ढ्याय पुनरेकत्र संग्रहीतामिति–'संग्रहश्जे'ति। संग्रहमेवाह–'अक्षचे'ति। अक्षम् इन्द्रियं [5]सविकल्पकमात्रप्रामाण्यमसहमानो बौद्धः प्रत्यवतिष्ठते–'नन्वि'ति स्वलक्षणविषयत्वात् स्वतो व्यावृत्तं वस्तुस्वरूपं लक्षणशब्दार्थः, सामान्यविषयकत्वादित्यभिमानः 'प्रत्यक्षमि'ति। प्रमाणमिति शेषः।

---

1. क – 'भाव्य' इति पाठः।
2. क – 'यदा अविशेषघुणवत्' इति पाठः।
3. क – 'इन्द्रियग्राह्याविषयं' इतिपाठः।
4. ग – 'गत' इति अधिकः पाठः।
5. क–ख – 'साविकल्पकप्रामाण्यं मनसा इति पाठः।

'शब्दलिङ्गवदि'ति। शब्दलिङ्गपदेन एतदुभयजन्यज्ञानमुपलक्षितम्। शब्दो लिङ्गं च यथा अनुगतो योऽयमाकारः सामान्यं तदवगाहित्वात्, तद्विपर्ययत्वात् न प्रत्यक्षं तद्वत् जातिविषयत्वात् कथं सविकल्पकं प्रत्यक्षं स्यात्। तथाच विवादाध्यासितं सविकल्पकं न प्रत्यक्षं सामान्यविषयत्वात् शब्दलिङ्गवदित्यनुमानं बोध्यम्। "श्लाध्यः [1]स्यात् न विजयी आत्मानमरक्षन् परघाती च वीरः" इति न्यायेन परपक्षदूषणमात्राभिधानेन अपेक्षितासिद्धिः इत्यभिप्रायेण स्वपक्षस्थापनायां हेतुमाह- [2]'अर्थजन्यस्यैवे'ति। आनयनादिरूपव्यवहारजनकस्वैवार्थत्वात् सामान्यस्य नैवभावादित्यर्थः तथा च निर्विकल्पकमात्रं प्रत्यक्षम् अर्थजत्वात्[3] संमतवदिति भावः। अत्र युक्तिपूर्वकं पक्षधर्मत्वमाह 'अर्थस्यचे'ति। अर्थस्य परमार्थतः सत्त्वम्– अस्तित्वम्, अतः अनन्यथासिद्धनियतपूर्वसत्वरूपकारणतायोगात् कारणत्वम्, अतः स्वतो व्यावृत्तं धर्मिस्वरूपमात्रं स्वलक्षणमेव परमार्थसत्वात्[4] तज्जन्यत्वं पक्षे अस्तीत्यर्थः। एवं सामान्यं न भवतीत्यत आह– 'नन्वि'ति। तस्य प्रमाणेन निरस्तविधिभावः विद्यमानतः। यस्य[5] तत्प्रमाणनिरस्तविधिभावम् अतदव्यावृत्तिस्वरूपम्, अतः तुच्छत्वमन्तिकत्वम्। अतस्तस्मिन् अत्यन्तासति सामान्यकारणत्वमेव नास्तीत्यर्थः। सिद्धान्तमाह–'मैवमि'ति। सामान्यस्य वस्तुभूतत्वात् परमार्थसत्त्वादित्यर्थः। अयमाशयः। अर्थक्रियाकारित्वं सामान्यस्यापि अस्ति यदि सामान्यं नाङ्गीक्रियते तदा घटार्थी कथं दण्डोपादानं कुर्यात्?

---

1. क–ख–ग – 'स्यात् न विजयी' इति 'परघाती च वीरः' इति लुप्तः पाठः।
2. क–ख – 'अर्थजस्य' इत्यारभ्य प्रत्यक्षम् पर्यन्तः भागः नास्ति।
   ग – लुप्तः पाठः।
3. क–ख – अजन्यत्वात् 'स्वमतवदिति भावः' इति पाठः।
4. क–ख – 'परमार्थसत जन्यत्वम्' इति पाठः।
5. क–ख–ग – 'तत्प्रमाणनिरस्त' इति नास्ति।

अननुगतासु व्यक्तिषु अनुगतातिप्रसक्तम् एकमवच्छेदकं धर्मं विना अनन्यथासिद्धनियतपूर्ववर्तित्वस्य ग्रहीतुमशक्यत्वात्। एवं व्याप्ति सङ्केतग्रहानुरोधेन अपि अवश्यमङ्गीकार्यत्वात्। तथा च अर्थक्रियाकारित्वम् अवच्छेदकतथा सामान्यस्य अस्त्येव। तथा च विमतं सामान्यं[1] परमार्थसत् अर्थक्रियाकारित्वात् स्वलक्षणवत्। एवं घटोऽयमिति सविकल्पकम् प्रत्यक्षम् अर्थजन्यत्वात् निर्विकल्पकवत् इति आस्तां विस्तरः।

इयता प्रबन्धेन समासादितं[2] प्रत्यक्षम् उपसंहरति - 'तदेवमि'ति।

अनुमाननिरूपणम्

अनुमानलक्षणम्

उपजीव्यत्वादादौ प्रत्यक्षं निरूप्य तदुपजीवकत्वेन तदनन्तरम् अनुमानं निरूपयति – 'लिङ्गपरामर्शोऽनुमानमि'ति।

ननु अनुमानं न प्रमाणं सर्वत्र उपाधिसंशयत्वेन (संशयसत्वेन) व्याप्तिग्रहस्यैव असम्भवात्। भूयस्सहचारेण उपाभावः अवधार्यते इति चेन्न। पार्थिवत्वलोहलेख्यत्वादौ[3] शतशः सहचारेऽपि वज्रमण्यादौ व्यभिचारोपलब्धेः, उपाधेः सत्वाश्च। न च संवादेन प्रामाण्यम् अनुमीयते इति वाच्यम्। तस्य उत्कटकोटि संशयादेः एव उपपत्तेरिति। मैवम्।अनुमानं न प्रमाणम् इति इत्येतदनुमानविधया

1. घ – 'सामान्यम्' इति नास्ति।
2. घ – 'व्युत्पादितम्' इति पाठः।
3. क-ख – 'लोम' इति पाठः।

अप्रामाण्यम् साधयति अथ[1] शब्दविधया वा? आद्ये अनुमानस्य प्रामाण्यं समायातमेव। न द्वितीयः, शब्दः परप्रतीतिं जनयत्येवेति एतादृशज्ञानादेव शद्बप्रयोगात् परप्रतीतेः स्वंप्रति अयोग्यत्वात् अनुमानं विना एतादृशज्ञानासम्भवात् इत्युभयथा अनुमानस्य प्रामाण्यमायातमेव। अतः मूकीभाव एव इत्यलं विस्तरेण। अत्र करणस्य लक्ष्यतथा भावव्युत्पत्तिमाह – 'येते'ति । ततः[2] प्रकृते किमायातमित्यत आह – 'लिङ्गपरामर्शेने'ति । ननु कोऽसौ लिङ्गपरामर्श इत्यत आह – 'तश्चे'ति। व्याप्तिविशिष्टपक्षवृत्तिधूमज्ञानमिति अर्थः। करणत्वं फलसापेक्षमत आह – 'अनुमितिं प्रती'ति केयमनुमितिः इत्यत आह – 'अग्न्यादी'ति। किं तस्याः करणम् इत्यत आह – 'तेस्या' इति।

लिङ्गपरामर्शस्य व्याप्तेः च निरूपणम्

लिङ्गापरिचये तत्परामर्शोऽपि दुर्ज्ञेय इति कृत्वा उभयं पृच्छति – 'किं' पुनर्लिङ्गम्? 'कश्चे'ति। उत्तरमाह – 'व्याप्ती'ति। अर्थगमकं लिङ्गमित्यर्थे व्यभिचार्यपि लिङ्गं स्यात् इत्यत आह– 'व्याप्तिबलेने'ति[3]। [4]तदुदाहृत्य दर्शयति – 'यथे'ति। यथा गमकत्वं तदुपपादयति। 'साहचर्यनियम' इति। साहचर्यमात्रस्य व्याप्तित्वे व्यभिचारिसाहचर्येऽतिव्याप्तिः स्यादत उक्तं नियम इति। [5]सह-

---

1. क–ख–ग – 'अथ' इति नास्ति।
2. क–ख–ग – 'ततः' इति नास्ति।
3. ग – 'व्याप्तीति' इति पाठः।
4. ग – 'तदुदाहरति' इति पाठः।
5. क–ख – 'न साहचार्यस्य अभावः साहचार्यनियमः नियत–

चर्यमात्रस्य व्याप्तित्वे व्यभिचारिसाहचर्येऽतिव्याप्तिः स्यादत उक्तं नियम इति। सहचरस्य भावः साहचर्यं तस्य नियमः साहचर्यनियमः नियमतः सहचारः इति पर्यवसन्नार्थः।

न च स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्, तच्च धूमेऽस्ति। तथापि स्वं साधनं धूमः तत्समानाधिकरणो योऽत्यन्ताभावः तदप्रतियोगित्वं साध्ये वन्हौ अस्ति धूमवति च सत्वात्। तदधिकरणाधिकरणत्वरूपं सामानाधिकरण्यं धूमे चाक्षुण्णमेव। 'इदं संयोगि द्रव्यत्वात्' इत्यादौ द्रव्यत्वसमानाधिकरणो योऽत्यन्ताभावः तत्प्रतियोगित्वं संयोगस्यैवेति कृत्वा तत्र अव्याप्तिवारणाय प्रतियोगिव्यधिकरणत्वेन अत्यन्ताभावो विशेषणीयः। एतादृशव्याप्तिज्ञानस्य अन्वयव्यतिरेकाभ्यां गमकता अस्त्येवेति अभिप्रायेणाह – 'तस्यां गृहीतायामि'ति। भवति धूमस्य अग्निलिङ्गकत्वम्। हेतुमाह – 'अत' इति। ननु लिङ्गज्ञानस्य परामर्शत्वं महानसाधिकरणकप्राथमिकधूमज्ञानेन अग्निरनुमीयते इत्यत आह – 'तस्ये'ति। तदेवोपपादयति – 'तथाचे'ति। 'स्वाभाविके'ति स्वाभाविकसम्बन्धो व्याप्तिरित्यर्थः। तदभिनीय दर्शयति – 'यत्र धूमः तत्राग्निरि'ति। अयमभिनयो यद्यपि स [1]श्यामो मैत्रीतनयः मैत्रीतनयत्वात् [2]इत्यादिव्यभिचारिसम्बन्धसाधारणः, तथापि शाकाद्याहारपरिणामस्य वादः (उपाधेः) विद्यमानत्वात् न स्वाभाविकः सम्बन्धः इति शङ्कोत्तराभ्यामाह – 'यद्यपी'त्यादिना। व्याप्तेः अनौपाधिकत्वनिरूपणावसरे उपाधेः लक्षणम् तदुदाहरणम्

उपाधित्वं प्रतिपादयति – 'तथापी'ति। [3]ननु उपाधित्वप्रतिपादने

1. क – 'स श्यामो मैत्रीतनयः मैत्री' इति भागः लुप्तः।
2. क – 'इत्यत्र तन्वादि' इति पाठः।
3. घ – 'ननु' इति नास्ति।

असम्प्रयोजकत्वाभिधानम् असङ्गतमित्यत आह – 'प्रयोजकश्चे'ति। स्वनिष्ठां व्याप्तिम् अन्यत्र[1] प्रयुक्तिरिति (प्रयुङ्क्ते इति) प्रयोजकः।

न च साध्यसमव्याप्तत्वे सति साधनाव्यापकः। समव्याप्तत्वं-यत्र यत्र साध्यं तत्र तत्र उपाधिः, यत्र यत्र उपाधिः तत्र तत्र साध्यमिति एवं रूपम्। साधनाव्यापकत्वं – न च साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वं, तच्च शाकाद्याहारपरिणतिभेदे अस्त्येव। तथापि मैत्रीनाम्न्याः कस्याश्चित् स्त्रियः पुत्रपञ्चकं श्यामः अपरश्च गौरः तद्रूपमजानतो परस्य तं पक्षीकृत्य अनुमितिः उत्पद्यते, स श्यामः मैत्रीतनयत्वात् [2]यत्र पक्षधर्मता नरत्वावच्छेदेनोत्पत्तिकश्यामत्वं तत्र तत्र शाकाद्याहारपरिणतिभेदः तत्र तत्र श्यामत्व-मिति समव्याप्तनिष्ठा व्याप्तिः मैत्रीतनयत्वे भासते। अतः प्रयोजकः शाकाद्याहारपरिणतिभेदः पक्षीकृतनरे साधनवति तदभाव-सत्त्वात् साधनाव्यापकत्वात् अयमुपाधिः साधनावच्छिन्नसाध्यव्यापकाभावो (व्यापको) बोध्यः। अन्यथा शाकादौ साध्याव्यापकत्वं स्यादिति सम्प्रदायः।

वस्तुतस्तु [3]पर्यवसितसाध्यव्यापकत्वे सति पर्यवसितसाधना-व्यापकत्वम् उपाधित्वम्। यद् धर्मावच्छेदेन साध्यं प्रसिद्धं यद् धर्मसमानाधिकरणं साध्यमिति यावत्, तद् धर्मावच्छिन्नसाधना–व्यापकत्वमिति लक्षणार्थः। अत्र [4]साध्यव्यापकत्वमात्रे कृते प्रमेयत्वादेः सर्वत्रोपाधित्वं स्यात् अतः साधनाव्यापकत्वे सतीति।

1. क – 'अन्यत्र' इति पाठः लुप्तः।
2. घ – 'इति' इति पाठः।
3. ग – 'पर्यवसित' इति पाठः लुप्तः।
4. क-ख – 'साध्यव्यापकत्वे इत्यवसिते' इति पाठः।

साधनाव्यापकत्वमात्रे कृते आकाशादेः सर्वत्राप्युपाधिता स्यादतः साध्यव्यापक इति। तावत्यवसिते पक्षधर्मावच्छिन्न–साधनावच्छिन्न साध्यव्यापके अव्याप्तिर्भवेत् अतः [1]प्रथमपर्यवसितपदम्। द्वितीय-पर्यवसितपदादाने यत्र यत्र महानसत्वावच्छेदेन वह्निमत्वं तत्र तत्र व्यञ्जनवत्त्वमिति पर्यवसितसाध्यव्यापकस्य महानसत्वनियतस्य [2]व्यञ्जनवत्वस्य कस्यचिदन्यस्यैवोपाधिता स्यात्। एतदर्थं तद-वच्छिन्नसाधनाव्यापकत्वमिति। यद्यपि व्यतिरेकिणो धर्मस्य सर्व-स्यैव कुत्रचित् साध्यव्यापकत्वं[3] साधनाव्यापकत्वमस्त्येव, अतः व्य-तिरेकिधर्मत्वमेवोपाधेः[4] लक्षणं भवितुम् अर्हति, तावता एव इतर-भेदसाधनसामर्थ्यम्, तथापि यादृशस्य ज्ञानेन हेतोः व्यभिचारज्ञानं भवति तादृक् स्वरूपनिर्वचनाय[5] एतावान् प्रयासः। अत्र च अन्यदूषणभूषणादिकं व्याभिचारोन्नयनरीतिश्च मत्कृत्यनुमानखण्ड-दीपिकायां[6] द्रष्टव्यम्।

ननु मैत्रीतनयत्वनुमान इव न कथं धूमानुमानेऽपि उपाधिः इत्यतआह – 'नचे'ति। अत्र युक्तिमाह – 'अयोग्यस्ये'ति। शङ्कापि-शाच्याः[7] सर्वत्र सुलभत्वेन सर्वत्र यात्राविलोपापत्तिः इति भावः। ननु मा भूदयोग्यः योग्य एव कुतो न स्यादित्यत आह–'योग्यस्य चे'ति। योग्यानुपलब्धिबाधितत्वादित्यर्थः। 'यत्रोपाधिरि'ति। योग्य

---

1. ग – 'प्रथमपदम्' इति पाठः।
2. क – 'व्यञ्जनवत्त्वस्य' इति लुप्तः।
3. घ – 'साध्यव्याकसाधनाव्यापकत्वम् इति पाठः।
4. ग – 'धर्मवत्वम्' इति पाठः।
5. घ – 'निर्वचनार्थमेव' इति पाठः।
6. घ – 'अनुमानखण्डिकायाम्' इति पाठः।
7. क – 'शङ्काक्षेपादयः, ननु सुलभत्वेन सर्वानुमानविलोपप्रसङ्गादिति' इति पाठः।

इति शेषः। उपलम्भस्थलमाह[1]–'यथाग्नेरि'ति। 'अयं पक्षः धूमवान् वह्निमत्त्वात्' इत्यत्र यत्र यत्र धूमवत्वं तत्र तत्र आर्द्रेन्धनसंयोग इति [2]नास्ति अयोगोलके व्यभिचारादिति, साध्यव्यापकसाधनाव्यापकत्वात् भवत्यग्नेर्धर्मसम्बन्धे आर्द्रेन्धनसंयोगः उपाधिः[3]। अयं चोपाधिः विषमव्याप्तित्वो (व्याप्तत्वमेवो) पाधिरिति पक्षे[4] निर्धूमस्थले आर्द्रेन्धनसंयोगसत्त्वेन साध्यव्यापकत्वात् समानव्याप्तोपाधिपक्षे (समव्याप्तत्वमेवोपाधिरिति पक्षे) आर्द्रेन्धनसंयुक्तवह्निरेवोपाधिः बोध्यः। 'हिंसात्वस्ये'ति यागीयमांसे (हिंसा) अधर्मसाधकेन (अधर्मसाधनम्) हिंसात्त्वात् यागभिन्नहिंसावदिति अत्रेत्यर्थः। 'मैत्रीतनयत्वस्ये'ति। सः श्यामो [5]मैत्रीतनयत्वात् इति हेतोरित्यर्थः। उदाहृतस्थले[6] यवधूमाग्निसम्बन्धे[7] न कोऽपि उपाधिरित्याह–'न चे'ति। ननु केन सम्बन्धेन उपाध्यभावो अवधार्यते इत्यत आह–'यद्यभविष्यदि'ति। प्रत्यक्षत[8] एव उपाध्यभावोऽवधार्यते इत्यन्वयः कार्यः, प्रत्यक्षमात्रस्य अभावग्राहकत्वे घटवत्यपि भूतले घटाद्यभावो गृह्यते इत्यत आह–'अनुपलम्भसनाथेने'ति। [9]संसर्गाभावग्रहे प्रतियोग्यनुपलम्भ[10]सहकारिणा अन्योन्याभावग्रहे प्रतियोगितादात्म्यानुपलम्भसहकृतेनेत्यर्थः।

---

1. घ – 'लक्ष्यमाह' इति पाठः।
2. घ – 'नास्ति' इति नास्ति।
3. घ – 'उपाधिविशेषः' इति पाठः।
4. क–ख – 'पक्षे' इति नास्ति।
5. क – 'मैत्रीतनयत्वात्' इति लुप्तः।
6. घ – 'स्थलवत्' इति पाठः।
7. ग – 'यश्च' इति पाठः।
8. क – 'प्रत्यक्षतः' इति लुप्तः।
9. क–ख – 'संसर्गा' इति लुप्तः।
10. क–क – 'समानाधिकरणात्यन्ताभावग्रहे' इति पाठः।

[1]तथाप्येतादृशसामग्र्याः सत्वात् जलपरमाणौ पृथिवीत्वाभावो गृह्यते इत्यत आह – 'तर्कसहकारिणे'ति। जलपरमाणौ पृथिवीत्वं यद्यभविष्यत्तदा उपलभ्येत इति तर्के कृतेऽपि अनुपलम्भनियमात् तर्कसहकृतप्रत्यक्षाभावात् जलपरमाणौ पृथिवीत्वाभावग्रह इति भावः।

वस्तुतस्तु यो व्यधिकरणे तर्कितप्रतियोगिसत्वविरोध्यनुपलम्भः सोऽभावं ग्राहयति, इयं च योग्यानुपलब्धिः अभावप्रत्यक्षमात्रे कारणं नाभावज्ञानमात्रे, [2]तां विनापि शब्दादितः [3]अभावज्ञानस्य [4]जायमानत्वात्।

ननु न प्रत्यक्षमात्रेऽपि कारणं,[5] घटवति विषयासंनिकर्षात्, अन्धकारे च [6]आलोकरूपसहकारिविरहात्, 'इदं रजतम्, इति भ्रमस्थले च दोषविशेषसत्वात्, [7]क्लृप्तप्रत्यक्षकारणान्तराभावा[8]देव नाभावप्रत्यक्षता योग्याधिकरणनिष्ठाभावसंनिकर्षरूपकारणाभाव वान्[9] जलपरमाणौ पृथिवीत्वाभावग्रह इति चेत् न। वायौ रूपाभावस्य अप्रत्यक्षत्वं स्यात्,[10] न चेष्टापत्तिः अपसिद्धान्तात् आकाशे शब्दध्वंसस्य [11]अप्रत्यक्षत्वप्रसङ्गाच्चेति दिक्। प्रकृतोपयोगं

---

1. घ – 'ननु' इति पाठः।
2. घ – 'एताम्' इति पाठः।
3. ग – 'अभावस्य' इति पाठः।
4. ग – 'ज्ञायमानत्वात्' इति पाठः।
5. घ – 'कारणत्ववति विषये इन्द्रियार्थसंनिकर्षाभावात्' इति पाठः।
6. क–ख – 'आलोकरूपसहकारिविरहात्' इति लुप्तः।
7. क–ख – 'उक्त' इति पाठः।
8. क – 'कारणताकाभावात्' इति पाठः।
9. क – 'एव' इति पाठः।
10. घ – 'प्रसङ्गाभावात्' इतिअधिकः पाठः।
11. क – 'अप्रत्यक्षप्रसङ्गादिति विप्रकृतौ प्रयोगं दर्शयति' इति पाठः।

दर्शयति – 'तथाचे'ति। उक्तमुपसंहरति – 'तेने'ति। ननु व्याप्ति-निरूपणावसरे स्वाभाविकसम्बन्धनिरूपणम् अनवसरग्रस्तम् इत्यत आह – 'स्वाभाविक' इति।

त्रिविधलिंगज्नानम्

व्याप्तौ गृहीतायामपि कथं लिङ्गपरामर्शरूपं तृतीयं ज्ञान-मुत्पद्यते? तत्राह – 'तदनेने'ति। यत्कारणात् व्याप्तिग्रहणोपायो दर्शितः तस्मादेव कारणेन न्यायेन प्रकारेण इत्यर्थः। तृतीयज्ञानस्य प्रथमद्वितीयनिरूपितत्वात् ते दर्शयति – 'महानसे'ति। तृतीयज्ञान-माह – 'अस्ती'ति। तृतीयज्ञानमनुमानं प्रत्याह – 'एतच्चे'ति अन-ङ्गीकारे दोषमाह – 'अन्यथे'ति। उपसंहरति – 'तस्मादि'ति। ननु तृतीयज्ञाने स्थापिते परामर्शस्य किमायातम् इत्यत आह – 'अयमेवे'-ति। ननु तथापि कथम् अन्या (अस्या) नुमानत्वमित्यत आह-'अनुमितिं प्रती'ति, 'करणत्वाच्चे'ति। ननु अतिशयितं कारणं करणम् इत्युक्तम्, प्रकृते तु कथमतिशयोऽस्ति इत्यत आह – 'तस्मादि'ति। यस्मात् परामर्शादपि लाभेन (दव्यवधानेन) पर्वते चाग्निरिति अनुमितिरुत्पद्यते, अतः अविलम्बेन अनुमित्युत्पादकत्वेन अतिश-योऽस्तीत्यर्थः।

ननु निर्व्यापारस्य कथम् करणत्वम्? इत्याह – 'तेने'ति, निर्व्यापारमपि करणम्। तेन लिङ्गपरामर्शः करणम् इत्यत्र ता-त्पर्यात्। तृतीयत्वमत्रापि पक्षत्वं शब्दादितो जायमानात् लिङ्ग-परामर्शात् उक्तज्ञानद्वयं विना अनुमित्युत्पादनात्, अतो लिङ्ग-

परामर्शत्वेनैव जनकतात्वं च (तच्च) व्याप्तिविशिष्टपक्षवृत्तिज्ञानत्वमेव। एतदेव ज्ञानं तृतीयलिङ्गपरामर्शत्वेन व्यवह्रियते। पक्षत्वं च न पक्षताश्रयत्वम्, तथा सति पक्षतायाः पृथक्कारणता न स्यात्, अतः यः साध्याश्रयत्वेनाभिमतः स एव पक्षशब्दवाच्यः तद्व्यतिरिक्तत्वमेव (तद्वृत्तित्वमेव) पक्षवृत्तित्वम्। यन्मते व्यापारवदेव करणं व्यापारत्वञ्च तज्जन्यत्वेन तज्जन्यजनकः अनेनैव अतिशयितेन (अतिशयेन) अतिशयितं कारणं करणम्, तन्मते व्याप्तिज्ञानं करणं तृतीयलिङ्गपरामर्शः अवान्तरव्यापारः।

प्रथमलिङ्गज्ञानस्य अनुमानत्वनिराकरणपूर्वकं तृतीयलिङ्गपरामर्शस्य अनुमानत्वप्रतिपादनम्

ननु लाघवात् लिङ्गज्ञानमेव परामर्शः अस्तु तस्मादेव अग्निः अनुमीयताम्, नतु नियमतोव्याप्तिविशिष्टपक्षधर्मताज्ञानमेव, इत्याशयेनाशङ्कते – 'नन्वि'ति। परिहरति – 'सत्यमि'ति। 'व्याप्तिरि'ति। लिङ्गज्ञाने जातेऽपि धूमे व्याप्तिवैशिष्ट्यास्फुरणात् इत्यर्थः। भवेदेवं यदि व्याप्तिवैशिष्ट्यस्य (ष्ट्यज्ञानस्य) कारणता सिद्धा स्यात् इत्यत आह – 'गृहीतायामेवे'ति। अनुगृहीतायाम् अनुदयात् इति एवकारार्थः। तथा च अन्वयव्यतिरेकाभ्यां लिङ्गे व्याप्तिवैशिष्ट्यज्ञानम् अवश्यमपेक्षणीयम् इति भावः। ननु तथा च (तथापि) व्याप्तिनिश्चयोत्तरकाले धूमे व्याप्तिवैशिष्ट्यस्य ज्ञान (ज्ञानात् महानस) वृत्तित्वज्ञानेन पक्षवृत्तिज्ञानात् समान (महानस) एव अग्निः अनुमीयताम् इत्याशयेन आशङ्कते – 'अथे'ति। परिहरति - 'मैवमि'ति। 'अग्नेरि'ति। परामर्शवत् आप्त (कल्पत) कारणताकस्य सन्देहस्य अभावात् इत्यर्थः। तर्हि कीदृशः अर्थः अनुमीयते इति तज्जिज्ञासायामाह – 'सन्धिग्धश्चे'ति अत्रोपजीव्यसंमतिमाह-

'यथोक्तमि'ति। नानुपलब्धे – सर्वथा अज्ञाते, न निर्णीते – निश्चिते न्यायः अनुमितिः प्रवर्तते उत्पद्यते[1] इत्यर्थः। तर्हि कुत्र न्यायस्य प्रवृत्तिरित्यत आह – 'अपित्वि'ति।

ननु श्रवणानन्तरं मननस्य सार्वत्रिककत्वात् निर्णीते अनुमितिः दृश्यते। [2]घनगर्जितस्थले घनत्वानुमितिदर्शनेन उभयत्र व्यभिचारात् कथं सन्दिग्ध एव न्यायप्रवृत्तिरिति चेत् न, सन्देहस्य पक्षताघटकत्वात् पक्षतायाश्च अनुमितिं प्रति कारणत्वात् सन्देहपदेनात्र[3] पक्षतैव उच्यते तत्स्वरूपं च अग्रे वक्ष्यते।

द्वितीयज्ञानस्य करणत्वं आशङ्कते – 'अथे'ति। परिहरति – 'सत्यमि'ति। 'अग्रहीते'ति। [4]सन्देहे सत्यपि [5]व्याप्तिस्मरणाभावात् नानुमित्युत्पाद[6] इत्यर्थः। स्मारकमाह – 'धूमदर्शनाच्चे'ति। स्मृतिमभिनीय्य दर्शयति – 'यो यो धूमवान्' इति। तृतीयज्ञानमभिनीय्य दर्शयति – 'धूमवांश्चायमि'ति। विशिष्टधूमवांश्चायमित्यर्थः। 'नान्यादि'ति। प्रथमद्वितीययोः अकारणत्वेन स्थापितत्वादिति भावः।

ननु पर्वतीयवह्निना सह धूमस्य [7]व्याप्यताग्रहणात् कथम् परामर्शः स्यादिति चेत् न। महानसादौ एकेन महानसीयधूमसहचारज्ञानात् व्याप्तौ गृह्यमाणायां वह्नित्व - धूमत्वरूपसामान्यलक्षणया प्रत्यासत्त्या, अनागतसर्वधूमस्य सर्ववह्निना सह व्याप्तेः

---

1. क – 'इत्युच्यते' इति पाठः।
2. क–रू – 'घनगर्जित' इति पाठः लुप्तः।
3. ग – 'शब्देन' इति पाठः।
4. क – 'सन्देहे' इति पाठः लुप्तः।
5. क–ख – 'स्मरणादौ' इति पाठः।
6. ग – 'उदय' इति पाठः'।
7. ग – 'सहचाराग्रहणात्' इति पाठः।

ग्रहणात्, इयं च प्रत्यासत्तिः विशेष्यविशेषणभावरुपेव बोध्या।

स्वार्थानुमान - परार्थानुमान निरूपणम्

उक्तानुमानं विभजते – 'तच्चे'ति। निरूपितमेतन् तृतीयलिङ्गपरामर्शात्मकमनुमानं द्विविधमित्यर्थः। द्वैविध्यं दर्शयति स्वार्थश्चेति। आद्यं लक्ष्यं लक्षयति – 'स्वार्थमि'ति। अन्वयप्रतिपत्तिः (स्वप्रतिपत्तिः) स्वस्यैव पक्षादिप्रतिपत्तिः। तदेव व्युत्पादयति – 'तथाही'ति। धूममात्रस्य कपालघटकादि[1] (गोपालघुटिकादि) साधारणस्य व्यभिचारात् धूमं विशेषयति – 'अविच्छिन्ने'ति। परार्थानुमानं दर्शयति – 'यत्वि'ति। 'अनुमानवाक्यमि'ति। अनुमानाय वाक्यम् अनुमानवाक्यम्। तथा च परस्मिन् यावत् लिङ्गपरामर्शोत्पत्तिः तदिच्छया प्रयुक्तं वाक्यमनुमानम् इत्यर्थः। तदिति तद्वाक्यं परार्थानुमानमित्यर्थः। अत्र यद्यपि परस्य या वह्न्याद्यनुमितिः तज्जनकत्वेन एतद्वाक्यजन्यवाक्यार्थज्ञानस्य परामर्शस्यैव परार्थानुमानत्वं वक्तुमुचितम्, तथापि[2] एतादृशवाक्येऽपि[3] एतादृशपरामर्शप्रयोजकतया परार्थानुमानप्रयोगं कर्तुं शक्यत एवेति [4]'ज्ञानेनोपलक्षितेनैनदि'ति येन कारणेन परस्मिन् या अनुमितिः

1. ब्रह्मसूत्रशाङ्करभाष्यम् – सूत्रम् – भावे चोपलब्धेः [2-1-15] "इतश्च कारणादनन्यत्वं कार्यस्य,……………नेत्युच्यते; उद्वापितेऽप्यग्नौ गोपालघुटिकादि धारितस्य धूमस्य दृश्यमानत्वात्" इत्यादि।
2. ग – 'तथा च' इति पाठः।
3. ग – 'वाक्ये च' इति पाठः।
4. एतादृशंवाक्यं मूले न दृश्यते। मूलेऽपि अधिक पाठःएतद् व्याख्याकारेणोपलब्धः स्यात्।

तत्प्रयोजकत्वमस्ति तेन कारणेन इत्यर्थः। [1]यथा च एतादृशवाक्यस्य अनमितिप्रयोजकत्वं तथा अवयवप्रकरणे निरूपयिष्यते इत्यर्थः। 'एवम् अन्येऽपी'ति। परामर्शात्मकः 'शब्दः अनित्यः कृतकत्वात्' योऽयं कृतकः सोऽनित्यः, यथा घटः, अनित्यत्वव्याप्यकृतकत्ववान् चायं तस्मात् अनित्य इति, पर्वतो धूमवान् आर्द्रेन्धनप्रभववह्निमत्वात्, यदुक्तसाधनं तदुक्तसाध्यं यथासंमत इत्यादयो द्रष्टव्याः।

अन्वयव्यतिरेकिणं निरूप्य केवलव्यतिरेकिणं निरूपयितुं प्रतिजानीते—'कश्चिदि'ति ननु केवलव्यतिरेकित्वे (कोत्व) विद्यमानसपक्षः तच्चानुमानमेव न भवितुम् अर्हति। तथापि (तथाहि) लिङ्गपरामर्शतः अनुमानम्। न च पक्षधर्मताज्ञानं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वदित्यादौ।

(प्रक्षिप्तभागः—अभावज्ञानस्य प्रतियोगिज्ञानाधीनत्वात् अन्वयव्याप्तिमाह—'यत्र धूमे'ति। व्याप्यलक्षणं वदन् धूमस्यव्याप्यत्वे हेतुमाह—'अल्पविषयत्वादि'ति। ननु कथं तद्व्याप्त्युपलक्षणं समव्याप्त्यव्याप्तेः। अत्र समव्यापकलक्षणमपीति चेत् तद्वन्निष्ठाभावप्रतियोगित्वम् व्यापकत्वं, तत्समानाधिकरण्यं व्याप्यत्वमिति तात्पर्यात्।)

'यत्र इतरभेदाभावः तत्र पृथिवीत्वाभावः' इति व्यतिरेकयोः व्याप्तेः पथिवीत्वस्य पक्षधर्मत्वं ज्ञायते। अतो व्याप्तिविशिष्टपक्षधर्मताज्ञानाभावः।

ननु व्यतिरेकिणि साध्याभावव्यापकाभावप्रतियोगिहेतुमान्

---

1. क – 'यदा' इति पाठः।
2. क–रू – 'तदा' इति पाठः लुप्तः।

अयम् इति परामर्शान्वयिनि (परामर्शादन्वय) व्याप्तिपक्षधर्मताज्ञानमिति वाच्यम्। अननुगमेन अनुमितित्वावाच्छिन्नं प्रति एकस्यापि आकारणत्वं (न) स्यात्। अनुगतकार्यस्य अनुगतकारणनियम्यत्वात् च। न च अन्यतरत्वेन उभयोरनुमानत्वं, तथा सति प्रत्यक्ष – अनुमान – उपमान – शब्दान्यतमत्वेन एकप्रमाणतापत्तेः इति चेन्न। निरूपादिव्यतिरिक्तसहकारेण अन्वये (निरूपाधिव्यतिरेकसहचारेणान्वय) व्याप्तिग्रहणात्।

ननु साध्याभाव – साधनाभावसहचारेण यदि साध्य-साधनयोः व्याप्तिः गृह्यते तर्हि वह्निधूमयोः सहचारेण कृतकत्वनित्यत्वयोः अपि व्याप्तिः गृह्यताम् अविशेषादिति चेन्न, यदभावयोः सहचारः तयोरेव व्याप्तिः गृह्यते इति (प्रति) योग्यनुयोगिभावस्य नियामकत्वात्, यद्वा ज्ञानमात्रं प्रति आत्ममनोयोगादिरूपसामान्यसामग्रीप्रयोजिका प्रमारूपविशेषं प्रति गुणः अप्रमां प्रति तु दोषः तद्वत्[1] प्रकृते अनुमितिमात्रं प्रति व्याप्तिज्ञानं केवलव्यतिरेक्यनुमितिं प्रति व्यतिरेकमात्र परामर्शः, अन्वयव्यतिरेक्यनुमितिं प्रति उभयपरामर्शः कारणं बोध्यम्। उदाहरति – 'यथे'ति। शरीरमात्रस्य पक्षत्वे मृतशरीरे बाधः स्यात् अतो जीवच्छरीरमिति।

ननु सात्मकत्वाज्ञाने कथं व्यातिरेकज्ञानम्। न च इच्छा समवायिकारणजन्या भावकार्यत्वात् घटवत् इत्यनुमानेन समवायिकारणसिद्धौ पृथिव्याद्यष्टके च बाधकसत्त्वात्. यदेवातिरिक्तं प्रसिद्धं तद्वत्वं जीवच्छरीरे (न) साध्यते इति वाच्यम्। आत्मकत्वं यदि आत्मसंयोगित्वं तस्य घटादि (दौ) सत्त्वेन ततो हेतुः व्यावर्तते इति कृत्वा असाधारणैकान्तिकता स्यात्। तस्य

1. क – 'तद्वता' इति पाठः।

मृतशरीरसाधारणत्वाच्च। अथ (ज्ञानं न घटकारण) ज्ञानकारणीभूतसंयोगाश्रयकार्यत्वं सात्मकत्वम्। इन्द्रियार्थसंनिकर्षस्य ज्ञानकारणत्वेन तदाश्रये अतिव्याप्तिवारणाय – ज्ञानकारणीभूतेति। आत्ममनसोरतिव्याप्तिवारणाय – कार्यत्वमिति, तन्न, शरीरादन्यत्राप्रसिद्धेः। तत्रैव प्रसिद्धौ सिद्धसाधनम्।

न च धूमादिस्थले यथा पूर्वाज्ञातो वह्निपर्वतसम्बन्धः सिध्यति तथा व्यतिरेक्यप्रसिद्धं साध्यं साधयति इति वाच्यम्, प्रतियोग्यज्ञानेन व्यतरेकिणः अनवतारणादीति चेन्न, इच्छायाः जन्यानुगुणत्वेन असमवायिकारणसिद्धौ 'इच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्ति गुणत्वसाक्षात् व्याप्य जातित्वात् शब्दत्ववत्' स्नेहत्वे[1] व्यभिचारवारणाय 'नित्ये'ति। आत्मकत्वप्रत्यक्षपक्षे नित्येन्द्रियग्राह्यगुणवृत्तिगुणत्वसाक्षात्व्याप्य-जातिः, संख्यात्वे व्यभिचारवारणाय 'विशेषे'ति। शब्दत्वव्याप्यशब्दजन्यशब्दवृत्तिजातौ व्यभिचारवारणाय साक्षादिति। इच्छा समवायिकारणसंयोगसिद्धौ मचा (इच्छा) समवायिकारणसंयोगः किञ्चिदवच्छिन्नः संयोगत्वात् कपि संयोगवत्, आत्ममनस्संयोगमात्रस्य इच्छाजनकत्वे अतिप्रसङ्गादिति तर्कसहायेन अनुमानेनेति। समवायिकारणं संरोगावच्छेदकत्वं ज्ञातं सन् तदेव सात्मकत्वं शरीरे साध्यते इति संक्षेपः।

व्यातिरेक्यन्तरमाह – 'लक्षणमपी'ति। अत्र दूषणभूषणादिकं मया मयाप्रदर्श्यमाण पृथिवीतरभेदसाधकानुमाने[2] बोद्धव्यम्। लक्षणान्तरस्य व्यातिरेकित्वं प्रदर्शयति – 'प्रमाण लक्षणं चे'ति। अत्रापि

1. क – 'स्नेहत्वे' इति लुप्तः पाठः।
2. ग – 'अनुमानवत्' इति पाठः।

साध्यप्रसिद्धिः प्रमाणमात्रस्य प्रक्षत्वेऽपि प्रमाणत्वाक्रान्त एव वक्ष्यमाणानुगतिः बोध्या।

उपोद्घातसङ्गत्या व्यतिरेक्यन्तरं प्रदर्श्यते, तथा च[1] 'पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात्, यन्नेतरेभ्यो भिद्यते तत्पृथिवीत्वाभाववत्, यथा जलम्' इति।

ननु इतरभेदाज्ञाने कथं तदभाव – पृथिवीत्वाभावयोः व्याप्तिः गृह्यते तत्प्रतियोगिज्ञानं विना अभावज्ञानानुदयात्। अथ [2] इतरभेदः घट एव प्रसिद्धः घटो न जलादिरिति प्रतीतेरिति चेन्न। तथा सति तत्र हेतुज्ञाने अन्वयित्वम्, अज्ञाने सपक्षव्यावृत्तिज्ञानेन असाधारणैकान्तिकता स्यात्। न च त्रयोदशान्योन्याभावाः त्रयोदशसु प्रत्येकं सिद्धाः पृथिव्यां मिलिताः साध्यन्ते इति वाच्यम्, यादृशाभावानां प्रसिद्धिः तादृशाभावसाधनेन इष्टानुमितिसिद्धिः मिलितानां साधने पूर्वोक्तदोष इति चेन्न, घटोन जलम्' इत्यादि प्रकारेण त्रयोदशभावानां घट एव प्रसिद्धिः, घटत्वेन इतरभेदसिद्धावापि 'सर्वा पृथिवी इतरभिन्ना न वा' इति संशयस्य, सिसाधयिषायाश्च सत्त्वेन अंशतः सिद्धसाधनम्। निश्चयस्य समाप्रकारकस्यैव[3] संशयविरोधित्वात्। अत एव अनित्ये शाब्दे न स (वाङ्मनसी) इत्यादौ नानापक्षतावच्छेदकस्थले एव अंशतः सिद्धसाधनं दोष इति अन्ये मन्यन्ते। अत एव "पक्षतावच्छेदकनानात्व एव हि" तदिति प्रसिद्धिरिति।

यद्वा तद्भिन्नपृथिवीत्वेनैव रूपेण यावान् विप्रतिपत्तिविषयः तावत् एव पक्षत्वं नांशतः सिद्धसाधनम्।

---

1. ग – 'तथाहि' इति पाठः।
2. ग – 'जल' इति अधिकः पाठः।
3. क – 'समानप्रकारकस्यैव संशयविरो' इति पाठः लुप्तः।

ननु "पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् घटवत्" इत्य-न्वयेनैव कथम् नेतरभेदः साध्यते इति दोषतादवस्थ्यम्। न च घटसाधारणपक्षत्वपक्षे कथं पक्षैकदेशस्य घटस्य दृष्टान्तत्वमिति वाच्यम्, पक्षान्यत्वं हि न दृष्टान्तप्रयोजकं किन्तु लाघवात् निश्चितसाध्यवत्त्वमेवेति चेन्न, अन्वयव्याप्त्यस्फुरणदशायां साध-कत्वाविशेषेण व्यतिरेकिणोऽपि सामर्थ्यावधारणात्। प्रकारस्य प्रकारान्तराद् ूषकत्वात्। तदुक्तमाचार्यैः–

"आस्तां तावदयं सुहृदुपदेशो निर्व्यूढं केवलव्यतिरेकित्व-लक्षणम्" इति।

अथ सम्भाविताऩ्वयिनि कथं केवलव्यतिरेकिपदप्रयोग इति चेन्न। अन्वयसहचारास्फुरणे सति केवलव्यतिरेकयोः एव यत्र व्याप्तिः स्फुरति तत्रैव केवलव्यतिरेकिपदप्रयोगः, अत एव अन्व-यास्फुरणदशायां धूमोऽपि केवलव्यतिरेकी सपक्षाव्यावृतत्त्वात्, नासाधारण्यमपीति।

केवलान्वयिनं दर्शयति — 'कश्चिदि'ति। असिद्धपक्ष (असि-द्धिपक्षः) इति केवलान्वयिलक्षणं बोध्यम्। (व्यावृत्तत्वं कुतोऽपि व्यावृत्तमव्यावृत्तमपि भवति) तथापि अभिधेयत्वं कुतोऽपि व्या-वृत्तं धर्मत्वात् गोत्ववदिति [1]विपक्षसाधनादिति चेन्न। एतदनु-मानसाध्यं व्यावृत्तत्वं कुतोऽपि व्यावृत्तम् अव्यावृत्तं वा [2]आद्ये यत्रैव व्यावृत्तत्वं व्यावृत्तं तत्रैव व्यावृत्तत्वधर्माभावस्य सत्वात् तत्रैवानेकान्तिकत्वं धर्मत्वस्य। न द्वितीयः, व्यावृत्तत्वस्याव्या मर्वत्रैव तस्सत्त्वेन व्यावृत्तत्वस्यैव केवलान्वयित्वात्। पुनः

1. क – 'विपक्ष' इति लुप्तः पाठः।
2. क – 'आद्ये' इति लुप्तः पाठः।

धर्मत्वस्य व्यावृत्तत्वे एव व्यभिचारात्, न च अभिधेयत्वम्, अत्यन्ताभावप्रतियोगिधर्मत्वाभाववत्, अतोऽपि पक्षसिद्धिरिति वाच्यम्, अत्यन्ताभावप्रतियोगित्वम् अत्यन्ताभावप्रतियोगिवान् (?) इत्यर्थः। यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तस्यैव अत्यन्ताभावप्रतियोगित्वेन धर्मत्वहेतोः अनैकान्तिकत्वात्, न द्वितीय्यः[1] अत्यन्ताभावप्रतियोगित्वस्यैव केवलान्वयित्वात्। अत्यन्ताभावप्रतियोगित्वे व्यभिचारात्। दुदाहरति – 'यथा' इति। [2]'विशेषोऽभिधेयः प्रमेयत्वात्', इत्यादौ[3] दृष्टान्ताभावात् व्यतिरेकव्याप्तिर्नास्ति इत्याह – 'यदभिधेयमि'ति। ननु शशविषाणमेव कुतो न दृष्टान्त इत्यत आह – 'सर्वत्रे'ति।

किञ्च अभिधेयत्वादेः यदि विपक्षः स्यात् सः किमनभिधेयः? अभिधेयो वा? आद्ये अनभिधेयपदेनैव अभिधीयमानत्वेन तत्र अभिधेयत्वमायातम् एव। द्वितीये स्पष्टमेवेति[4] अत्यन्तम् अभिधेयत्वादेः निश्शङ्कं केवलान्वयित्वं विद्वद्भिः आदरणीयम्।

न च अभिधेयत्वम् अभिधानयोग्यता, प्रमेयत्वं च प्रमादिविषयत्वम्। एतदुभयोरपि अननुगमेन कथं सर्वत्र प्रवृत्तिः स्यादिति वाच्यम्। अननुगतप्रतीतिबलेन तयोरेकत्वसिद्धेरिति।

ननु सन्देहाघटिता पक्षता केवलान्वयिनि सन्देहाभावात् कथमनुमितिः, न च अभिधेयत्वमत्र[5] वर्तते न वा इति संशयसत्त्वात् कथम

---

1. क – 'द्वितीय्यम्' इति पाठः।
2. क – 'विशेष्यो' इति लुप्तः पाठः।
3. ग – 'व्यतिरेक' इति अधिकः पाठः।
4. क – 'स्पष्टमेवेति' इति लुप्तः पाठः।
5. ग – 'प्रवर्तते' इति पाठः।

नुमितिः न? इति वाच्यम्। अन्याभिधेयपक्षकत्त्वेन भिन्नविषयकत्त्वात् विशेषोऽभिधेयो नवेति सन्देहो मृग्यते, स च नानेति चेन्न, य एव सन्देहः पक्षे साध्यसिद्धिविरोधी स एव अनुमानाङ्गम्। भिन्नविषयत्वस्य अकिञ्चित्करणत्वात्। तथा च विशेषोऽभिधेय इत्यनुमितेः अभिधेयत्वं विशेषनिष्ठात्यान्ताभावप्रतियोगि नवेति संशयविरोधित्वेन। एतादृशसंशयत्वस्य सर्वत्र सुलभत्वेन अनुमितेः अविकलत्वादिति सर्वमवदातम्।

उक्तहेतुत्रयमध्ये गमकतायाः[1] अन्वयव्यतिरेकिणोः विशेषमाह 'एतेषांचे'ति। तानि पञ्चरूपाणि विशेषतः क्रमेणोद्दिशति – 'तानी'ति। तेषां सद्भावं धूमवत्त्वहेतौ दर्शयति – 'एतानी'ति न खण्डितानीत्यर्थः इति।

न किञ्चित्............... [2]वाव्याप्तिरिति। धूमवत्त्वहेतुवदन्ये अन्वयव्यतिरेकपञ्चरूपोपपन्ने एव साध्यसाधक इत्याह – [3]'यस्त्वन्य' इति। अन्यथा केनापि रूपेण न केनापि प्रमाणेन साध्याभावो विषयीकृत इत्यर्थः। न च व्याख्यानमन्यत् – 'अनुमानस्य' इति। तृतीयलिङ्गपरामर्शस्य द्वयं साध्यं विषय इत्यर्थः। द्वे अङ्गे इति पाठे द्वौ विषयौ इत्यर्थः। हेत्वाभासो (हेतुलक्षणंहेतोः) हेतुवदाभसमानः, ततः किमुक्तं भवति इत्यत आह – 'अहेतुरि'ति।

अन्वयव्यतिरेक्यपेक्षया केवलान्वयिनः साधकतायां विशेषमाह – 'केवलान्वयी'ति। केन रूपेण भानः (हीनः) तदाह – 'तस्ये'ति

---

1. क – 'अन्वयव्यतिरेकिणोः विशेषमाह' इति भागः लुप्तः।
2. क–ख–ग–घ – अत्र ग्रन्थपातः।
3. अत्र– मूले पौर्वापर्यं दृश्यते, अतः व्याख्याकारेण अनुसृतः क्रमः मूलेऽपि उपलब्धः स्यात्।

तत्र हेतुमाह – 'विपक्षाभावादि'ति । एवं केवलव्यतिरेकिणोऽपि गमकतायां विशेषमाह – 'केवलव्यतिरेकी'ति ।

पक्ष – सपक्ष – विपक्षाणां लक्षणमुदाहरणं च

पक्ष – सपक्ष – विपक्षाज्ञाने तद्घटितरूपमेव ज्ञातुं न शक्यते इत्याशयेन पृच्छति – 'के पुनरि'ति। पुनः शब्दो वाक्यालङ्कारे। पक्षलक्षणमाह – 'सन्दिग्धे'ति। साध्यधर्मा धर्मी पक्ष इत्युक्ते सपक्षेऽतिव्याप्तिः स्यात् अत उक्तं – 'सन्दिग्धे'ति। धर्मिपदं स्पष्टार्थम्।

ननु एतल्लक्षणं मननस्थले अव्यापकं श्रवणेन आत्मनो निश्चितत्वेन सन्देहाभावात्। किञ्च सन्देहो विशेषणं वा उपलक्षणं वा? नाद्यः – व्याप्तिज्ञानादिना तन्नाशात्, नापरः – सिद्धसाधनस्थलव्यावर्तकोपलक्ष्यतावच्छेदकाभावात् इति चेन्न (यो़ऽतः) सिसाधयिषाविरहसहकृत सिध्यवहित (सिध्युपहित) साधकमानाभावो यत्र सपक्षः, तथा च यद्यपि मननस्थले [1]सिध्यवहितं (सिध्युपहितं) मानं वर्तते तथापि सिसाधयिषायाः। सत्त्वेन विशेषणाभावघटिता पक्षता अस्त्येव। घनगर्जितस्थले सिसाधयिषाविरहरूपविशेषणसत्त्वेऽपि सिध्यवसित (सिध्युपहित) रूपवशिष्याभावात् पक्षता, पर्वतादिस्थले यत्र सिसाधयिषायाः सत्त्वेन अनुमितिरुत्पद्यते तत्र उभयाभावात् पक्षता, अयं च अभावो यद्यपि न पर्वतादिनिष्ठः किन्तु [2]आत्मनिष्ठ एव तथापि स्वरूपविशेषेण

---

1. क – 'सिध्यवहितं' इति पाठः लुप्तः ।
2. क–ख – 'आत्मादिनिष्ठ' इति पाठः ।

पर्वतादिनिष्ठ एवेति मन्तव्यः। सन्देहस्य जिज्ञासाजनकत्वेन परम्परया पक्षताघटकत्वेन उपयोगात् सन्दिग्धताध्यधर्मेति लक्षणस्य अत्रैव तात्पर्यम्। अनेन रूपेण पक्षज्ञानं नानुमितौ कारणं किन्तु तन्निष्ठा पक्षता स्वरूपसती कारणम् अनुमितिमात्रे मन्तव्यम् इति दिक्।

सपक्षलक्षणमाह – 'निश्चिते'ति । पक्षेऽतिव्याप्तिवारणाय निश्चितपदम् ।

विपक्षलक्षणमाह – 'निश्चिते'ति। कस्यचित् जलहृदे वह्निसन्देहात् बाधविषयकधूमभ्रमेण वह्न्यनुमितौ जायमानायां जलहृदस्य पक्षत्वं न स्यात्, अत उक्तं – 'निश्चिते'ति। एतावता प्रबन्धेन उपपादितमर्थम् उपसंहरति – 'तदेवमि'ति।

हेत्वाभासनिरूपणम्

[1]तत्वनिर्णयविजयप्रयोजकत्वात् हेत्वाभासान् निरूपयितुम् उपक्रमते – 'अतोऽन्य' इति। तत्त्वं च यद्यपि न तावत् हेतुलक्षणरहितत्वे सति हेतुवदाभासमानत्वम्, अज्ञायमानदशायां नित्यदोषसाधारणानेकान्तिकादौ अव्याप्तेः (अव्याप्तेः) किञ्च पञ्चम्यन्तं तृतीयान्तं वा हेतुत्वप्रतिपादकवचनं यदि हेतुलक्षणं विवक्षितं तथा (तदा) स्वार्थानुमाने धूमे अतिव्याप्तिः, अथ पक्षधर्मत्वादिपञ्चरूपरहितत्वं, तदा व्यतिरेक्यादौ अतिव्याप्तिः, न च यस्य हेतौ यानि रूपाणि सन्ति तदन्यतमरूपरहितो यः सः हेतुलक्षणरहित इत्यनेन उक्त इति वाच्यम्, अननुगमापत्तेः [2]पूर्वोक्तदोषानति–

1. क–ख – 'विजय' इति नास्ति ।
2. क–ख – 'हेतौ कारणतानतिवृत्तेश्च' इति पाठः ।

वृत्तेश्च। एवं [1]सति 'हेतु(पद)वदाभासमान' इत्यस्य वैयर्थ्यं स्यात्, न च धूमानुमाने घटादौ अतिव्याप्तिवारणार्थं तदुपात्तं तस्य तत्र हेत्वाभासत्वादिति। कथं तर्हि घटे[2] न हेत्वाभासपद-प्रयोगः तात्विकस्यात्स्येव (?), किञ्च यदि यत्किञ्चिद्रूपेण हेतु (पद) वदाभासमानत्वं तदा घटादौ तत्सकलसम्भवमिति अति-व्याप्तिः अस्त्येव[3]। यदि पञ्चम्यन्तत्वादिरूपेण आभासमानत्वं तदा उक्तदोषानतिवृत्तिः इति। नाप्यनुमितिप्रतिबन्धकत्वं कामि-नीजिज्ञासादेरपि हेत्वाभासतापत्तेः। न च ज्ञानविषयत्वे सतीति विशेषणं, कामिनीजिज्ञासायाः स्वरूपसत्या एव अनुमितिप्रतिब-न्धकत्वमिति वाच्यम्। 'धूमो व्यभिचारी'ति ज्ञानादपि अनुमि-तिप्रतिबन्धेन तत्राप्यतिव्याप्तिः, नापि अनुमितिप्रतिबन्धकयथा-र्थज्ञानविषयत्वं, ज्ञानस्य विशेषणत्वे [4]अज्ञानदशायां नित्यदोषसा-धारण—अनैकान्तिकादौ अव्याप्तेः उपलक्षणत्वे असाधारणसत्प्र-तिपक्षोत्तीर्णदशायां सद्धेतौ अतिव्याप्तिः। अत एव यद्विषयतया ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमिति प्रत्युक्तम्। अथ विरोधिपरामर्शस्य (र्शभिन्न) भ्रमान्यज्ञानप्रतिरुद्धकार्याङ्गत्वं, विरोधिपरामर्शभिन्न भ्रमादन्यतया ज्ञानं तेन प्रतिरुद्धं कार्यम् अनु-मितिरूपंयस्य तत्त्वमित्यर्थः। भ्रमादन्यज्ञानप्रतिरुद्धकार्यलिङ्गत्व-मात्रे कृते अयथार्थसत्प्रतिपक्षे अव्याप्तिः स्यादत उक्तम्, वि-रोधिपरामर्शभिन्नेति॥ तन्न॥

प्रतिरुद्धत्वं स्वरूपयोग्यत्वं वा अथोऽपधानं वा? नाद्यः। तत्र सत्प्रतिपक्षाभावदशायाम् असाधारणोत्तीर्णदशायां सद्धेतावतिव्याप्तेः।

---

1. क–ख – 'न' इति पाठः।
2. क – 'घटे न' इति पाठः लुप्तः।
3. क – 'अस्त्येव यदि' इति पाठः लुप्तः।
4. क – 'अज्ञायमानदशायाम्' इति पाठः।

नापरः, अप्रतिरुद्धदशायां हेत्वाभासमात्रेऽव्याप्तेः। तथापि अनुमितिप्रतिबन्धकज्ञानविषतायवच्छेदकरूपवत्त्वमेव हेत्वाभासत्वं बोध्यम्। एवं च दुष्टहेतौ हेतुदोषव्यभिचारादौ च उभयत्र हेत्वाभासपदप्रयोगात्, नतुपसाहित्य - राहित्याभ्याम् उभयलक्षणमपि उक्तं [1]भवति इति अवधातव्यम्। सत्प्रतिपक्षे यद्यपि परामर्शज्ञानं न प्रतिबन्धकं तथापि विरोधिपरामर्शसहकृतजनकपरामर्शस्यैव प्रतिबन्धकत्वेन एतद्विषयः पूर्वसाधनं तद्विषयपूर्वावच्छेदकं प्रति साधनमपि स्वरूपसम्बन्धविशेषेण तद्वत्त्वं पूर्वसाधनस्य अस्त्येव, यद्यपि 'धूमो व्यभिचारी'ति ज्ञानस्य अनुमितिप्रतिबन्धकत्वेन तद्विषयतावच्छेदको व्यभिचारो भवत्येव तथापि तद्वत्त्वं धूमे नास्तीति नातिव्याप्तिः।

ननु अनुमितिप्रतिबन्धकत्वं साक्षाद्वा, परम्परया वा? नाद्यः, बाधसत्प्रतिपक्षयोः एतत्सत्वेऽपि व्यभिचारादव्याप्तेः। नापरः - तयोरेवाव्याप्तिः, व्यभिचारज्ञानद्वारा व्याप्तित्वज्ञानविघटकोपाधौ च अव्याप्तेश्च। अत एव प्रतिबन्धकत्वमात्रपुरस्कारेण इति। चेन्न। अनुमिति - तत्करणान्यतर - साक्षात्प्रतिबन्धकत्वस्यैव उक्तत्वादिति दिक्।

हेत्वाभासाः पञ्च

ते कतीति जिज्ञासायामाह - 'असिद्धे'ति। एवकारो न्यूनातिरिक्तसंख्याव्यवच्छेदार्थः।

---

1. क - 'भवति इति' इति पाठः।

असिद्धनिरूपणम्, तद्भेदः उदाहरणं च

तत्र व्याप्तिपक्षधर्मताभ्यां रहितोऽसिद्ध इति नासिद्धलक्षणं व्याप्तिविरहमात्रस्यैव पक्षधर्मतारहिते अव्याप्तेः। पक्षधर्मताराहित्यस्य व्याप्तिरहिते अव्याप्तेः। उभयाभाववत्त्वस्य प्रत्येकाभाववत्येव अव्याप्तिः। न च व्याप्तिविशिष्टे पक्षधर्मत्वाभावो विशेषणाभावात् यतः सर्वत्र[1] अस्तीति वाच्यम्, इदमसाधकं व्याप्तिरहितत्वात् इत्यस्यैव गमकत्वे अधिकवैयर्थ्यात् प्रत्येकमात्रोद्भावनेन उपाधिनिवृत्तेश्च इत्यत आह— 'तत्रानिश्चित' इति।

तिस्रो विधा दर्शयति — 'आश्रयासिद्धे'ति। एभिरेव विप्रकारैः असिद्धोद्भावनम्। व्याप्यवृत्तिः अनुमितिबन्धः, साधकतासाधनं चेति प्रत्येकमेव दोषत्वादिति भावः।

ननु आश्रयासिद्धादिज्ञानमात्रेणैव स्वार्थानुमितेरिव परार्थानुमितेश्चापि प्रतिबन्धकत्वसम्भवेन अपरं प्रत्यपि तदुद्भावनस्यैव उचितम्, न तु असाधकतानुमानमपीति, अन्यथा अर्थान्तरता एव स्यादिति चेन्न, परोपन्यस्तसाधकात् मध्यस्थानाम् अनुमत्युत्पादाभावः तस्य च असाधकत्वज्ञानं चेत् द्वयमपि उद्धेश्यं दोषधातुः तत्र च आद्यं दोषोद्भावनादेव, अपरं च इदम् असाधकम् असिद्धत्वात् इत्यादिप्रकारेण लिङ्गोपन्यासात्।

अथवा कथं सम्प्रदायानुरोधेन दोषोद्भावनेन अनुमितिप्रतिबन्धवत् तादृशलिङ्गोपन्यासादेन [2]परापकर्षबोधः। [3]'नान्यथे'ति।

---

1. — ग-एव इति अधिकः पाठः।
2. क–ख – 'परापकर्षं बोध्ये' इति पाठः।
3. एतादृशं वाक्यं मूले न दृश्यते। मूलेऽपि अधिकः पाठः एतद्व्याख्या कारेणोपदर्शितम्।

असाधकतानुमानस्य आवश्यकत्वात् इत्यलं विस्तरेण ।

न च प्रत्येकज्ञानस्यैव अनुमितिप्रतिबन्धकत्वे हेत्वाभासाधिक्येन 'पञ्चैव' इति विभागव्याघातः स्यादिति वाच्यम्, व्याप्तिविष्टिपक्षधर्मत्वाभाववत्त्वेन परामर्शविषयाभावत्त्वेन वा त्रयाणामप्यसिद्धत्वेन महर्षिणा विभागः कृत इति न विभागविरोधः। नचैवं साक्षात्प्रतिबन्धकत्वेन कालात्ययापदिष्ट – प्रकरणसमयोः व्याप्तिविरहलिङ्गत्वेन व्यभिचारविरुद्धयोरपि संग्रहाकरणे विभागविघातः स्यादिति वाच्यम्, स्वतन्त्रेच्छस्य महर्षेः नियन्तुमशक्यत्वात्। अन्यथा परिभाषामात्रमुच्छिद्यते, यद्यपि सव्यभिचारो हेतुरपि व्याप्यत्वासिद्धो भवतीति उपाधेरसाङ्कर्यम्, तथापि सव्यभिचारोपाधेः असङ्कर एवेति दिक् ।

आश्रयासिद्धनिरूपणम्

आश्रयासिद्धमुदाहरति – 'आश्रयासिद्धो यथे' त्यादिना। आश्रयासिद्धत्वमेव स्पष्टयति – 'अत्र ही'ति ।

ननु गगनरूपारविन्दाश्रयासिद्ध्या गगनकमलमित्यादौ समुदायार्थाभावेन अपार्थनिग्रहस्थानमेव स्यादिति चेन्न। "काञ्चनमयाद्रिः अग्निमान् धूमवत्वात्" इत्यादौ विशेषणासिद्धिस्थले आश्रयासिद्धिरसङ्कीर्णा, नचैवं पक्षविशेषणाभावात् आश्रयासिद्धिः वाच्या, तथा च तज्ज्ञाने सत्यपि विशेष्यधर्मिणि लिङ्गपरामर्शसम्भवेन अनुमित्यप्रतिबन्धेन कथं हेत्वाभासतेति वाच्यम्। तज्ज्ञानस्य विशिष्टपक्षकानुमितिप्रतिबन्धकत्वेन हेत्वाभासत्वात् हेतोः

विशिष्टपक्षवृत्तित्वाभावेन असिद्धसामान्यलक्षणेन संग्रहश्च । "गगनारविन्दं सुरभि" इति मूलं तु यत्र प्रसिद्धारविन्दे गगनीयत्वस्य ज्ञापनाय गगनारविन्दम् इति उच्चार्यते तत्र प्रतीयमाने प्रसिद्धारविन्दे गगनीयत्वस्य विशेषणस्य असिध्द्या काञ्चनमयाद्रिः इत्यादाविव आश्रयासिद्धिपरतया व्याख्येयम् ।

अथवा (अनेन) (न) केवलम् आश्रयविशेषणासिध्द्या आश्रयासिद्धिः अपि तु "ह्रदः पर्वतो वह्निमान्" इत्यादाविव "गगने अरविन्दं सुरभि, अरविन्दत्वात्" अत्र गगनाधिकरणे अरविन्दस्य आश्रयस्य अभावेन (आश्रयाभावेन) आश्रयासिद्धिरेव तज्ज्ञानस्य गगनाधिकरणकत्व विशिष्टारविन्दपक्षकानुमितिप्रतिबन्धकत्वात् हेत्वाभासत्वमविकलमेवेति एतत्परं बोध्यम् ।

स्वरूपासिद्धः

स्वरूपासिद्धमुदाहरति – 'स्वरूपसिद्धो यथे'ति । स्पष्टमन्यत् ।

व्याप्यत्वासिद्धनिरूपणम्

उक्तद्वयापेक्षया व्याप्यत्वासिद्धे विशेषम् आह – 'व्याप्यत्वासिद्धः तु' **इति । तत्र प्रथमम्** उदाहरति – 'यत्सदि'ति । सौगतमतमेतत् । अस्य सोपाधिकत्वेन न कुतो व्याप्यत्वासिद्धतोच्यते इत्यत आह – 'सोपाधिकतथे'ति । "पर्वतो वह्निमान् धूमवत्त्वात्" इत्यत्र

'पर्वतो वह्निमान् (नील) धूमवत्त्वात्' इत्यादि व्यर्थविशेषण-स्थले नीलधूमवत्त्वादेः गौरवेण व्याप्यतानवच्छेदकत्त्वात् तेन रूपेण विशिष्टे व्याप्तिः नास्तीति व्याप्यत्वासिद्धिः बोध्या। द्वितीय-मुदाहरति – 'यथ'ति। निगदव्याख्यानमन्यत्।

विरुद्धनिरूपणम्

विरुद्धलक्षणमाह – 'साध्यविपर्यथे'ति। विपर्ययथोऽभावः, साध्या-भावव्याप्यो हेतुः विरुद्धः इत्यर्थः। अत्र साध्यासामानाधिकर-णसाध्याभावो बोध्यः। अन्यथा 'इदं संयोगि द्रव्यत्वात्' इत्यादौ अतिव्याप्तिः। अयं च अभावो भावाभावसाधारणो[2] बोध्यः। तेन च अयं गुणात्यन्ताभाववान् द्रव्यत्वात् इत्यादौ गुणाभावाभाव-गुणव्याप्यत्वेऽपि नाव्याप्तिः।

ननु विरुद्धे साध्यहेत्वोः समानावस्थान (सहानवस्थान) लक्षणो विरोधः, तथाच पक्षे साध्यसत्त्वे हेत्वसिद्धिः हेतुसत्त्वे साध्याभावसत्त्वात् बाध एव अतो नातिरिक्तो विरुद्धो हेत्वा-भास इति चेन्न। यत्र हेतुः तत्र साध्याभाव इति ज्ञानानन्तरं[1] पक्षे हेतुसत्त्वज्ञानेन साध्याभावज्ञानमिति बाधस्यैव उपजीव्यत्वात् विरुद्धः पृथक् हि कार्यः।

ननु साध्याभावसमानाधिकरणो हेतुः सव्यभिचारः। स एव

1. क – 'भावाभावसाधारणो' इति पाठः लुप्तः।
2. ग – 'पश्चात्' इति अधिकः पाठः।

दोषोऽस्तु, न च व्याप्यत्वम् अपि गौरवात्, इदमसाधकं साध्याभावव्याप्यत्वादिति असाधकतानुमाने [1]नियतत्वभागस्य व्यर्थत्वात् इति चेन्न। प्रतियोगिव्यधिकरणसाध्यव्यापकाभावप्रतियोगित्वं वृत्तिमतः साध्यवदवृत्तित्वं वा विरुद्धत्वं बोध्यम्। वृत्तिमदिति विशेषणं गगनादौ विरुद्धत्ववारणाय, [2]दूषणं तु साध्यवदवृत्तित्वज्ञानमेव, तावन्मात्रज्ञानस्यैव व्याप्तिज्ञानपरिसन्धित्वात् (परिपन्थित्वात्)।

यद्यपि "आत्मा अनित्यः आत्मत्वात्" इत्यादि – असाधारणसङ्कर एव तथापि अनेनापिरूपेण तस्य दोषत्वात्; न च वृत्तिमत्साध्यवदवृत्तित्वात् [3]साध्याभाववद्वृत्तित्वज्ञानम् आवश्यकम् इति साधारणानैकान्तिकतथैव दोषत्वम् स्यात् इति वाच्यम्। उपजीव्यत्वेन भिन्नदोषत्वात्, उपजीव्यत्वेऽपि साध्यवति हेतुर्न[4] संभवतीति ज्ञानं नन्वतो (तत्वतो) दूषणमिति चेन्न। सहचारज्ञानपरिपन्थित्वेन व्याप्तिज्ञानविघटकत्वात् अव्यभिचारिज्ञानविरोधित्वेन व्यभिचारज्ञानवत् अथ सहचारज्ञानपरिपन्थित्वेन स्वार्थानुमाने दोषत्वासम्भवे परं प्रति निश्चितानन्वयित्वेन अयोग्यतया अपार्थकतेव स्यादिति चेन्न। अयोग्यताज्ञानस्य विरुद्धोपजीवकत्वात्, अत एव "वह्निः अनुष्णः कृतकत्वात् जलवत्" इत्यादिबाधस्थले बाधस्यैव उपजीव्यत्वम् इत्युदाहरति 'सयथे'ति। तदेव स्पष्टयति – 'कृतकत्वं ही'ति। उपसंहरति – 'अत' इति।

---

1. क – 'नियतत्वभागस्य व्यर्थत्वादिति चेन्न' इति पाठः लुप्तः।
2. क – 'दूषणं तु साध्यवदवृत्तित्वज्ञानमेव' इति पाठः लुप्तः।
3. क – 'साध्याभाववद्वृत्तित्व' इति पाठः लुप्तः।
4. क – 'हेतुर्न सम्भवतीति' इति पाठः लुप्तः।

अनैकान्तिकनिरूपणम्

व्यभिचारं (सव्यभिचारं) लक्षयति – 'सव्यभिचार' इति।

ननु किमनैकान्तिकत्वं न साध्यतदभाववदवृत्तित्वम् उभय-व्यावृत्तत्वम् अनुपसंहारित्वमिति अननुगमात्। अथ साध्यव्याप्यत्वे सति साध्याभावव्याप्यत्वं, विरुद्धेऽतिव्याप्तिवारणाय (साध्यव्याप्यत्वे सतीति) (साध्याभावव्याप्यत्वं) सद्धेतावतिव्याप्तिवारणाय साध्यव्याप्यत्वे सतीति (साध्याभावव्याप्यत्वमिति)।

यद्वा साध्यवन्मात्रवृत्यन्यत्वे सति साध्याभाववन्मात्रवृत्यन्यत्वं [1]तत्रापि आद्यपदं सद्धेतावतिव्याप्तिवारणाय, द्वितीयं च विरुद्धे अतिव्याप्तिवारणाय, मात्रपदद्वयं च साध्यतदभाववद्वृत्ति – साधारणानैकान्तिके अतिव्याप्तिवारणायेति। न[2] साध्याव्याप्यत्वसाध्यवन्मात्रवृत्यन्यत्वयोः एव असाधकतानुमानादौ गमकत्वे[3] अधिक-वैयर्थ्यात्। न च सपक्षविपक्षगतसकल (वत्) सपक्षविपक्षव्यावृत्तान्यतरत्वं, विपक्षगतत्वादेः एव गमकत्वे अधिकवैयर्थ्यात्। "सर्वम् अनित्यं प्रमेयत्वात्" इत्याद्यनुपसंहार्यव्याप्तेश्च, तत्र सपक्षविपक्षाभावात्। न च पक्षातिरिक्तसाध्यवन्मात्रवृत्यन्यत्वे सति सपक्षातिरिक्तसाध्याभाववन्मात्रवृत्यन्यत्वम् इति वाच्यम्। धूमे सद्धेतौ अतिव्याप्तेः, अनुपसंहार्यव्याप्तेश्च।

अथ – 'हेत्वाभासत्वे सति साध्यवन्मात्रवृत्तित्वेन अप्रतीयमानत्वे[4] सति साध्याभाववन्मात्रवृत्तित्वेन अप्रतीयमानत्वम्'।

---

1. क – 'तत्राप्याद्यपदं साद्धेतावतिव्याप्तिवारणाय' इति लुप्तः पाठः।
2. ग – 'न साध्याव्याप्यत्व–साध्यवन्मात्रवृत्यत्यन्वयोः' इति लुप्तः पाठः।
3. क – 'गमकत्वे अधिकवैयर्थ्यात्' इति लुप्तः पाठः।
4. क – 'अप्रतीय्यमानत्वे सति' इति पाठः लुप्तः।

सत्यन्तमात्रे कृते विरुद्धे अतिव्याप्तिः स्यात्। न च इष्टैव। न अविरुद्धत्वज्ञानदशायां तस्य अनिष्टत्वात्, द्वितीयसत्यन्तविनाकृतस्य सद्धेतुधूमादावतिव्याप्तिः अतः तदपीति। मात्रपदद्वयं सपक्षविपक्षवृत्तिसाधारणाव्याप्तिवारणार्थम्। ज्ञायमानदशायां सद्धेतौ अतिव्याप्तिवारणाय हेत्वाभासत्वे सतीति विशेषणम्। एवं च 'आत्मा नित्यः आत्मत्वात्' इति विरुद्धसङ्कीर्णश्च सपक्षविपक्षव्यावृत्तिज्ञानेन असाधारणतामापन्नस्य 'शब्दः नित्यः शब्दत्वात्' [1]इति।

वस्तुतः साध्यव्याप्यस्य असाधारणतामापन्नस्य च संग्रहो भवतीति न सत्प्रतिपक्षत्वेन हेत्वाभासतापन्ने व्यतिरेकिणि साध्यव्यापकाभावप्रतियोगित्वेन[2] अज्ञायमानदशायाम् अन्यहेत्वाभासोपाध्यनालिङ्गनेन विरुद्धत्वज्ञानमात्रदशायां केवलविरुद्धे अतिव्याप्तिः। व्याप्तिज्ञानविरहदशायां ह्रदादिपक्षक-धूमादावतिप्रसङ्गादिति। इत्यत्र उच्यते।

असाधारण्याभावकालावच्छिन्नविरुद्धत्वाभाववत्वं साध्यव्याप्यत्वे अभावमात्रस्य विरुद्धे अतिव्याप्तिः स्यादतः तदुपात्तम्। विरुद्धत्वाभावमात्रस्य सद्धेतावतिव्याप्तिः स्यात् अतः साध्यव्याप्तत्वाभावे सति इति, साध्यव्याप्यत्वाभाववत्वे सति विरुद्धत्वाभाववत्वम् इत्येतावत्येव कृते "शब्दः अनित्यः शब्दत्वात्" इत्यादिषु असाधारणे अव्याप्तिः स्यादतः असाधारण्याभावकालावच्छिन्नेति साध्यव्याप्तत्वविशेषणम्। तेन सत्यपि साध्यव्याप्तत्वे विशेषणाभावात् विशिष्टाभावः। एवं च असाधारणतापन्ने विरुद्धे

1. ग – 'इत्यदि' इति पाठः।
2. क – 'साध्यव्यापकाभावप्रतियोगित्वेन' इति लुप्तः पाठः।

अतिव्याप्तिः स्यात् अतः असाधारण्याभावावच्छिन्नेति विरुद्धत्व विशेषणम्। तेन 'आत्मा नित्यः आत्मत्वात्' इत्यादिषु असाधारणतापन्नेषु सत्यपि विरुद्धत्वे असाधरण्याभावकालावच्छिन्नत्व-रुपविशेषणाभावात् विरुद्धत्वाभावोऽस्त्येवेति सर्वं समञ्जसमिति संक्षेपः।

येन रूपेण अनैकान्तिकोद्भावनं प्रतिबन्धकम्, असाधकतानुमानं च तदाह–'स द्विविध' इति इदं तु एकदेशिमतम्।

वस्तुतस्तु अयं त्रिविधः। न्यायप्रथमाध्यायप्रथमेयग्रन्थे टीकाबन्धोपायतत्वबोधनादिभिः अनुपसंहारिणः उक्तत्वात्। ननु एभिः त्रिभिः प्रकारैः अनुमितिप्रतिबन्धेन कथं न हेत्वाभासाधिक्यं कथं वा न विभागव्याघातता इति चेन्न। स्वरूपसत्ता अनेन सामान्यलक्षणेन, त्रयाणामेककृत्यत्व (मेकीकृतत्व) मस्त्येव हेत्वाभास इति विभागकरणात्। नचैवं साध्याभावज्ञापकत्वेन बाध-सत्प्रतिपक्षयोः अन्येषां तदज्ञापकतया लक्षीकृत्य कथं न विभागः कृत इति वाच्यम्। स्वतन्त्रेच्छस्य महर्षेः व्यापारस्य नियन्तुमशक्यत्वात्, द्वैविध्यं दर्शयति 'साधारण' इति। तत्र साधारणलक्षणं – 'पक्षसपक्षे'ति।

नन्विदम् अलक्षणम्। विरुद्धसङ्कीर्णसाधारणस्य सपक्ष-विपक्ष-वृत्तित्वाभावेन अव्याप्तेः। विपक्षवृत्तित्वज्ञानमात्रेण अनुमितिप्रतिबन्धे असाधकतानुमाने च संभवति शेषत्रयवैयर्थ्यात् नापि साध्याभाववद्वृत्तित्वम्, इदं गन्धवत् पृथिवीत्वात्' इत्यादौ साध्यप्रागभावध्वंसवति पृथिवीत्वस्य वृत्तिमत्त्वेन अतिव्याप्तेः। नापि साध्यात्यन्ताभाववद्गामित्वम्, "सर्वम् अनित्यं प्रमेयत्वात्" 'भूः नित्या गन्धवत्वात्' इति अनुपसंहारि – असाधारणयोः संयोगा–

दिसाध्यकद्रव्यत्वादौ अतिव्याप्तेः। न च विपक्षवृत्तित्वं साधारणत्वं, विपक्षत्वस्य निश्चयघटितत्वेन साधारणस्य अनित्यदोषत्वापत्तेः, अनुमितिप्रतिबन्धे परं प्रत्युद्भावने असाधकत्वानुमाने च साध्याभाववद्गामित्वस्य प्रयोजकत्वे निश्चितभागस्य व्यर्थत्वात्। न च प्रतियोगिव्यधिकरणसाध्यात्यन्ताभाववद्गामित्वमेव तद्व्याप्यम्, पर्वतादिपक्षे एतत्संशयस्यापि संभवेन संदिग्धानैकान्तिकतया अनुमितिप्रतिबन्धकत्वेन अनुमानमात्रोच्छेदापत्तेः। किञ्च एतन्न्यायेन हेतोः साध्यवद्भिन्नवृत्तित्वज्ञानस्य हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यवत्त्वज्ञानस्य साध्याभाववदवृत्तित्वज्ञानाभावस्य च साध्यावन्मात्रवृत्त्यन्यज्ञानस्य च साध्यात्यन्ताभाववद्वृत्ति – अभावाप्रतियोगिज्ञानादीनां प्रत्येकम् अनुमितिप्रतिबन्धकसामर्थ्यात् 'सव्यभिचारस्त्रिविध' इति विभागव्याघात इति। [1]उच्यते।

साध्यव्यधिकरणधर्मवत्वं विपक्षत्वम्, तद्वृत्तित्वं साधारणत्वम्, व्यधिकरणत्वं तदधिकरणानधिकरणत्वम्। तथा च प्रतियोगिव्यधिकरणसाध्यात्यन्ताभाववद्गामित्वाद्युपाधीनां भाने अस्त्येव उपाधेः ज्ञानमावश्यकमिति एतद्विषयकत्वेनैव सर्वेषाम् अनुमितिप्रतिबन्धकत्वम्। अतो नाधिक्यं न वा विभागव्याघातः। एतत्सन्देहात् सन्दिग्धानैकान्तिकता। न च साध्यव्यधिकरणधर्मवद्वृत्तित्वसाध्यव्यधिकरणत्वस्यैव अनुमितिप्रतिबन्धकत्वादिसामर्थ्ये अधिकं व्यर्थमिति वाच्यम्। अन्यविशेषणत्वेनोपात्तस्य अन्यविशेषणं कृत्वा दूषणाभिधानस्य अप्रामणिकत्वात्। न च पक्षे व्यभिचारसन्देहस्य अनुमितिप्रतिबन्धकत्वे अनुमानमात्रस्य उच्छेद इति वाच्यम्। अनुकूलतर्कादिना तदुच्छेदे अनुमानप्रवृत्तेः निश्चितहेतुमिति

1. ग – 'तत्र' इति अधिकः पाठः।

साध्यव्यभिचारसंशयातिरिक्तव्यभिचारसंशयत्वेन अनुमितिप्रतिबन्धकत्वात् वा अनुमानमात्रोच्छेदः। तमेनमुदाहरति -- 'स यथे'ति। विपक्षवृत्तित्वं स्पष्टयति – 'अत्र ही'ति।

असाधारणं लक्षयति – 'सर्वसपक्षविपक्षव्यावृत्त' इति। यत्किञ्चित्सपक्षव्यावृत्तस्य धूमस्य असाधारण्यं मा भूदित्येदतर्थं 'सर्वेति'

ननु शब्दोऽनित्यः शब्दत्वात्' इत्यादिः विरुद्ध एव 'भूः नित्या गन्धवत्वात्' इति साधारण एव। तथा च उदाहरणाभावादेव असाधारणो न पृथगिति चेन्न। सन्देहादिघटितपक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वात्।

यद्यपि निश्चयाभावः – पुरुषदोषः वा (अथवा) अज्ञानं (न) हेत्वाभासः। तथापि ज्ञायमानतया अनुमितिप्रतिबन्धकत्वेन हेत्वाभासत्वात्। यद्यपि पक्षविपक्षव्यावृत्तत्वेन निश्चयदशायाम् एतेषाम् असाधारणत्वात्। अथ सपक्षव्यावृत्तिरेव दोषः न तु विपक्षव्यावृत्तिरपि तस्या गुणत्वात्। किञ्च परं प्रत्युद्भावनदशायां विपक्षव्यावृत्त्युपन्यासे परसाध्यसाधको व्यतिरेकसहचार एव उपन्यस्तो भवेदिति। किञ्च परामर्शोत्तरकालं तावन्नेदम् उद्भाव्यम्। तथा च बाधसत्प्रतिपक्षयोरभावे अनुमितेः ब्रह्मणापि निवारयितुमशक्यत्वात्। नापि 'शब्दोनित्यः शब्दत्वात्' इत्युक्तौ 'निवृत्ते जीवादिनि (निवृत्ते वादिनि) दोषोद्भाव्यम् (?), न्यूननिग्रहोद्भावेनैवोपाधिनिवृत्तेः (नैव वादिनिवृत्तेः)। ननु स्वार्थानुमाने दोषो भविष्यतीति वाच्यम्, सपक्षव्यावृत्तिमात्रस्यैव दोषत्वादिति।

अत्रोच्यते शब्दत्वं साध्यवतः तदभाववतश्चव्यावृत्तम्। तथा च यत्र यत्र अनित्यत्वं तत्र तत्र शब्दत्वाभावः यथा घटः, यथा

आकाशम्। एवञ्च साध्य – तदभाव-उभयव्यापकाभावप्रतियोगिना शब्दत्वेन पक्षे किं साधनीयमिति साध्य–तदभावोभयाव्यापकतया स्वार्थानुमाने परार्थानुमाने वा असाधारण्यदोषः, नचात्र परामर्शद्वयं सत्प्रतिपक्षेऽपि परामर्शद्वयमिति कथं ततो भेदः स्यादिति वाच्यम्। द्वौ हेतू सत्प्रतिपक्षे साध्य – तदभावोभयाव्यापकौ, अत्र तु एक एव हेतुरिति तद्भेदः।

यद्यपि सपक्षव्यावृत्तित्वेनैव वादिनिवृत्तिर्भवतीति कथं परार्थानुमाने तदुद्भावनम्, तथापि विपक्षव्यावृत्ततया यथा साध्यं साधयति तथा सपक्षव्यावृत्तत्वेन साध्याभावमपि साधयेत् अविशेषादिति प्रतिबन्धितया दृष्टान्ततया तस्यैव उद्भावनं न्याय्योत्तरं साधारणवद्बोध्यम्। लक्षणं तु सर्वसपक्षव्यावृत्तत्वं नत्वधिकं व्यर्थत्वात् विरुद्धस्य विरुद्धत्वाज्ञानदशायाम् एतद्रूपेणावगमे असाधारणता एव अन्यथा हेत्वाभासाधिक्यापत्तेरिति दिक्।

यद्यपि अनुपसंहारी नासत्सपक्षविपक्षः स च सिद्धोऽसिद्धो वा? नाद्यः सति सपक्षे सपक्षराहित्यस्य वक्तुमशक्यत्वात्, नापरः प्रतियोगिज्ञानं विना तदभावस्य सुतरां ज्ञातुमशक्यत्वात्। नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, एवंविधोऽपि यदि व्यतिरेकिसाध्यकः तदा सद्धेतुरेव तथापि व्याप्तिग्रहानुकूले कथम् उपसंहार्यभावो यत्र हेतुत्वाभिमतेन अनुपसंहारी।

वस्तुतस्तु केवलान्वयिधर्मावच्छिन्नपक्षक एव अनुपसंहारी इति। तथा च 'सर्वम् अभिधेयं प्रमेयत्वात्' इत्यादौ विप्रतिपत्त्या साध्यनिश्चयदशायाम् अनुपसंहारी एव। 'सर्वम् अनित्यं प्रमेयत्वात्' इत्यादिव्यतिरेकिसाध्यके साध्याभाववदवृत्तित्वाज्ञानद-

शायाम् अनुपसंहारित्वमेव। ननु उपसंहारज्ञाने सति व्याप्यत्वासिद्धज्ञानम् आवश्यकमिति व्याप्यत्वासिद्धिः एव दोष इति चेन्न, व्याप्यत्वासिद्धिज्ञाने उद्भावने च व्यभिचारज्ञानवत् उपजीव्यत्वात् दोष इत्यन्यत्र विस्तरः।

प्रकरणसमनिरूपणम्

प्रकरणसमं लक्षयति – 'यस्यहेतो'रिति। तृतीयलिङ्गपरामर्शविषयीभूतस्य यस्य हेतोः साध्यविपरीतसाधकं तृतीयलिङ्गपरामर्शविषयं हेत्वन्तरं वर्तते इत्यर्थः। अन्यथा व्याप्तिविशिष्टपक्षधर्मताज्ञानान्यतराभावादेव नानुमितिरिति किं सत्प्रतिपक्षस्य हेत्वाभासकल्पनया? इत्यपि ब्रूयात्, न च सत्प्रतिपक्षे परामर्शस्य अविरोधे अनुमितिरेव स्यात् विरोधे एकत्र व्याप्तिभङ्गज्ञानम् आवश्यकमिति असिद्धिरेव स्यादिति वाच्यम्। परस्परविरोधि परामर्शस्य यस्य प्रतिबन्धकत्वज्ञानानन्तरं व्याप्तिभङ्गज्ञानम् इत्युपजीव्यत्वेन व्यभिचारवत् अस्य दोषत्वात्; अत एव सद्धेतौ सत्प्रतिपक्षतापन्ने व्याप्त्यादिभङ्गाभावे अनुमितिप्रतिबन्धकं ज्ञानं विरोधिपरामर्शसहितं जनकपरामर्शरूपम् एतद्विषयश्च पूर्वसाधनं विषयतावच्छेदकं च प्रतिसाधनं तद्वत्वं च तस्मिन् व्यक्तमिति अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकरूपवत्त्वात् हेत्वाभासता तस्य केवलान्वयिनि अपि सम्भव एव, तथापि 'घटोऽभिधेयः प्रमेयत्वात्' इत्यत्र घटनिष्ठात्यन्ताभावप्रतियोगिजात्यन्यत्वे सति घटमात्रवृत्यन्यत्वात् घटान्योन्याभाववत्। मात्रपदं स्वरूपासिद्धिवारणाय। यस्य मते स्वरूपासिद्धिवारकं हेतौ विशेषणं न

दीयते तन्मते अभावविशेषणत्वेन न व्यर्थता। घटवृत्तिद्रव्यत्वादिजातौ व्यभिचारवारणाय सत्यन्तम्। न च पक्षैक्याभावात् कथं सत्प्रतिपक्षतेति वाच्यम्। पूर्वसाध्यविरोधिप्रतिसाधनवत्त्वमेव दूषकतायां तन्त्रं नत्वधिकम्, व्यर्थत्वात् इति दिक्।

कालात्ययापदिष्टनिरूपणम्

इदानीं बाधितविषयं निरूपयति – 'प्रमाणान्तरे'ति। यो हेतुः यत्साध्यं साधयितुमुद्यतः तत्साध्याभावः पक्षे प्रमाणान्तरेण अवधारितः स हेतुः बाधितविषय इति।

वस्तुतस्तु प्रमितसाध्याभाववत्पक्षकत्वम्। ननु बाधितविषयस्य एतल्लक्षणं, न कालात्ययापदिष्टस्य इत्यत आह – 'कालात्ययापदिष्ट इती'ति। अस्यैव नाम कालात्ययापदिष्टः इत्यर्थः। अत्र विवक्षितविवेकेन पक्षे साध्याभावक्रमेणैव बाधः हेतुनिष्ठत्वोक्तिः असाधकतानुमानसौकर्यार्थम्। अत्र साध्याभावज्ञाने तृतीयलिङ्गपरामर्शो विशेषदर्शनत्वेन साध्याभावज्ञानं परिभूय साध्यं साधयेत्, पर्वते धूम इव वह्निम्। सा च प्रमात्वेन ज्ञाता प्रतिबन्धिका न स्वरूपसती हेत्वाभासत्वात् अधिकबलत्वात् निश्चयेन अनुमितिप्रतिबन्धकत्वाच्च। एतेन साध्याभावनिश्चयदशायां साधनाज्ञाने हेतुज्ञानाभावादेव नानुमितिः तज्ज्ञाने च व्यभिचार एव। न च पक्षातिरिक्तव्यभिचारो दोष इति वाच्यम्। सामान्यतः साध्याभाववति साधनवत्त्वज्ञानादेव व्याप्तिभङ्गात् व्यर्थविशेषणत्वादिति निरस्तम्।

पक्षे साध्याभावनिश्चयः साध्याभावज्ञाने प्रमात्वनिश्चयः, तेन हि ज्ञानमात्रेण अर्थनिश्चयः, तथा सति सर्वत्र प्रामाण्यवैयर्थ्यं स्यात्, तथा च साध्याभावज्ञानप्रमात्वनिश्चयेन साध्याभावनिश्चये सति व्यभिचारज्ञानमिति उपजीव्यत्वेन साध्याभावनिश्चयादिना व्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोषः।

ननु उपजीव्यत्वेऽपि ज्ञानमन्यत्र अक्लृप्तत्वात् न स्वतो दूषकं किन्तु क्लृप्तत्वात् साध्याभावनिश्चयं कुर्वन् व्यभिचारज्ञानद्वारा इति चेन्न। नियमतः अत्र साध्याभावप्रमेति ज्ञाने सति साध्यज्ञानानुदयात् स्वस्यैव प्रतिबन्धकत्वात् शाब्दज्ञानादौ एकपदार्थसंसर्गे अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविषयत्वमिति ज्ञानसत्त्वेन प्रतिबन्धदर्शनाच्च। नच साध्याभावप्रमा अत्रेति साध्याभावप्रमात्वनिश्चयदशायां साध्याभावनिश्चयाभावेन व्यभिचारज्ञानस्यैव अभावात्।

ननु पक्षे साध्याभावज्ञानप्रमात्वं साध्याभाववति साध्याभावप्रकारकज्ञानत्वम्, तथा च साध्याभावप्रमात्वनिश्चयोऽपि साध्याभावनिश्चय एव। तथा च साध्याभावज्ञाने प्रमात्वनिश्चयदशायां व्यभिचारज्ञानमिति बाधस्तुअन्य हेत्वाभसासङ्कीर्तनस्थलं यत्प्रदर्शितं तदसङ्गतमिति चेन्न। विशेष्यावृत्यप्रकारकत्वादिरूपप्रमात्वेन यत्र अधिकबलत्वं तत्र व्यभिचारविषयत्वेन असङ्कीर्णत्वात्। किञ्च यत्र पक्षे साध्याभावज्ञानस्य प्रमात्वज्ञानं विस्मरणरूपं परामर्शश्च प्रत्यक्षे तत्र स्मरणस्य हेत्वत्रिषयकतया न व्यभिचारज्ञानलेशोऽपि इत्यत्र असङ्कीर्णतयैवेति सम्प्रदायः।

तदयुक्तम्। विरोधिज्ञानस्य अप्रामाण्यशङ्काऽनास्कन्दितस्यैव प्रतिबन्धकत्वात् यदि च प्रमाणत्वेन ज्ञातमेव विरोधिज्ञानम्

अधिकबलत्वेन प्रतिबन्धकं तर्हि साध्याभावज्ञानप्रमात्वनिश्चयोऽपि प्रमात्वेन निश्चित एव प्रतिबन्धकः, एवमुत्तरोत्तरं प्रमात्वनिश्चयापेक्षायाम् अनवस्थैव स्यात्। यदि चोत्तरोत्तरं न प्रमात्वनिश्चयापेक्षा तर्हि साध्याभावज्ञानमपि तथास्तु, अविशेषात्। सत्प्रतिपक्षादौ च प्रमात्वग्रहणं विनैव प्रतिबन्धकतादर्शनाच्चेति नोक्तस्थले बाधासङ्कीर्णोदाहरणमिति वाच्यम्। पर्वतीयवह्न्यभाववति महानसादौ व्यभिचारात् पर्वतीयमपि वह्निं न साधयेत्।

अथ महानसादिवृत्तिधूमः पक्षवृत्तेः अन्य एवेति सूचितं न साधयत्येवेति। तथा सति गोत्वादीनामपि सास्नाद्यनुमानं न स्यात् प्रत्येकव्यक्तौ व्यभिचारात्। यदि च साध्यतावच्छेदकसामान्यावच्छिन्नसाध्याभाववद्वृत्तित्वेन व्यभिचारस्तर्हि धूमस्यापि वह्नित्वसामान्यावच्छिन्नप्रतियोगिकाभाववत् अवृत्तित्वेन व्यभिचाराभावात् साध्यतावच्छेदकवह्नित्वेन रुपेणाप्रसिद्धं पर्वतीयमिव अपर्वतीयमपि प्रतिसाधकताबोधेनैव अदूरीक्रियते इति बाधोऽसङ्कीर्ण एव।

अथ पक्षान्यवृत्तिसाध्यसिद्धौ भ्रमरूपानुमितिः स्यात्, तथा च यवाङ्कुरं प्रति सकारणत्वादेव न महानसीयवह्न्यनुमितिः, न तु बाधात्। न च प्रसिद्धबाधसहकृतस्यैव सत्यपरामर्शस्य एव प्रमारूपानुमितिं प्रति गुणवत्वेन भ्रमरूपानुमितिं प्रति अकारणत्वम्, न तु परामर्शमात्रस्यैवेति वाच्यम्। लाघवेन सत्यपरामर्शस्यैव गुणत्वं न तु बाधसहकृतस्य गौरवात्, मानाभावाच्चेति न।

साध्याभाववति पक्षे हेतुज्ञानस्य दोषत्वं न तु अयथार्थपरामर्शस्य, अन्यथा वह्निमति निर्धूमे पर्वते बाष्पादौ धूमभ्रमात् जायमानानुमितिः यथार्था स्यात्, दोषजन्यत्वात्, सपक्षवति हे-

तुज्ञानस्य गुणत्वाच्च तस्मात् पक्षधर्मताबलात् पक्षेतरवृत्तिः बाधात् न सिध्यति इति बाधः पृथक् इति चेत्, मैवम्।

पक्षातिरिक्तवृत्तिसाध्यं पक्षे नास्तीति खलु बाधः पक्षातिरिक्तसाध्यसिद्धिविरोधी। स च विशेषप्रकारकसाध्यसिद्धिरेव प्रतिबन्धकः, न तु सामान्यप्रकारकसिद्धेरपि, अन्यथा वस्तुतो निर्वह्निपर्वते पर्वतत्वेनैव ज्ञाते पर्वतेतरवृत्तिवह्निः अत्र नास्ति बाधे अवतीर्णे सति तृतीयलिङ्गपरामर्शात् जायमाना अनुमितिः निर्विषया स्यात् असत्ख्यातेश्च अनङ्गीकारात्, न च एतादृशस्थले अनुमितिरेव न जायते इति वाच्यम्, तदनन्तरं प्रवृत्तेः प्रत्यक्षसिद्धत्वादिति।

अत्रोच्यते। हेतोः साध्याभाववद्[1]वृत्तित्वं न व्यभिचारः किन्तु साध्यात्यन्ताभाववद्वृत्तित्वम्। अन्यथा पृथिवीत्वादिना गन्धाद्यनुमानं न स्यात्। तथा च रूपप्रागभावावच्छिन्नो घटो रूपवान् पृथिवीत्वादित्यादौ व्यभिचाराभावात् बाध एव दूषणम्। न च प्रागभावरूपसाध्यविरहप्रमैव, ननु प्रागभावविशिष्टो घटः पक्षः तथा च विशिष्टप्रागभावात् अत्यन्ताभाव एव कालत्रयेऽपि विशेषणांशे रूपावृत्तेः, अतो व्यभिचार एवेति चेन्न। तत्र विशिष्टः किन्तु (ननु) पक्षतावच्छेदकं, प्रागभावावच्छिन्नेति विशेषणं, तथा च पक्षतावच्छेदकविशिष्टपक्षे विशेषणांशे साध्यावृत्तित्वेन यदि व्यभिचारः स्यात् तर्हि "शब्दो नित्यः शब्दत्वात्" इत्यादौ शब्दत्वरूपपक्षतावच्छेदकविशिष्टे कालत्रयेऽपि अनित्यत्वस्य अवृत्त्या बाध एव स्यादिति बहुव्याकुली स्यात्, न च 'गन्धप्रागभावावच्छिन्नो घटोगन्धवान् पृथिवीत्वात्' इत्यादौ गन्धात्य-

---

1. ग – 'साध्याभाववृत्तिमात्रं' इति पाठः।

न्ताभावो वाच्यः। अन्यथा एतादृशवाक्यं योग्यं स्यात्, तर्हि यत्रधर्मिणि यत्प्रागभावः तत्र न तदत्यन्ताभाव इति युक्तं (उक्तं) चेत् तत्काले प्रतियोगिसत्वस्यापि प्रसङ्गात् इति वाच्यम् गन्ध-प्रागभावावच्छिन्नो घटो गन्धवान्' इत्यदौ यदुक्तकालोपलक्षण-त्वेन वक्तुः तात्पर्यविषयः तदेकस्य द्वयथोग्यत्वात् योग्यमेव, यदि च विशेषणत्वे तात्पर्यं तर्हि विशेषणांशे तात्पर्यं गन्धासत्वात् अयोग्यमेव, अनुमितौ च तात्पर्यादेः अनुपयोगात् पक्षतावच्छेद-कावच्छिन्नप्रकृतस्थले बाध एव। वस्तुतस्तु प्रागभावलालविशिष्टे अत्यन्ताभावसत्वेऽपि न व्यभिचारः, गन्धरूपप्रतियोगिसमानाधिक-रणत्वात्, प्रतियोग्यसामानाधिकरणसाध्याभाववद् वृत्तित्वं व्य-भिचारत्वमित्युक्तत्वात् न च विशेषणभेदात् विशिष्टभेदे प्राग-भावविशिष्टं न गन्धाधिकरणम् अतो व्यभिचार एव इति वाच्य-म्। एकस्यापि घटस्य अनेकक्षणविशिष्टतया विशेषणभेदेन घट भेदे प्रतिक्षणं स्वीक्रियमाणैकक्षणिकत्वापत्तौ बोद्धमतप्रवेशापत्तेः इति।

अथ प्रागभावे अवच्छेदके हेत्वसिद्धिः अवच्छेद्ये सिद्धसा-धनमिति चेन्न पक्षतावच्छेदकधर्मविशिष्टे पक्षे साध्यवैशिष्ट्यस्य पक्षधर्मताबलेन अनुमानविषयत्वात् अनुमानविषये सिद्ध एव हि सिद्धसाधनम्। तस्मात् प्रागभावावच्छेदेन प्रतियोगिसाधने बाध एव न सिद्धसाधनम् न च अन्यहेत्वाभासङ्कीर्णतायामपि सन्दे-हादिघटितपक्षत्वाभावादौ आश्रयासिद्धिरेव कथं न भवतीति वा-च्यम्। सति हि बाधे पक्षत्वाभाव इति बोधस्योपजीव्यत्वात्। नचैवं सिद्धसाधनेऽपि सति पक्षतायाः अभाव इति बाधवदुपजी-व्यत्वात् सिद्धसाधनमपि कथं न पृथक् हेत्वाभास इति चेन्न। उपजीव्यत्वेऽपि स्वतो दूषकत्वात् नहिसाध्यसिद्धिः साध्यसिद्धि-

विरोधिनी धारावाहिकबुद्धीनाम् अनुभवसिद्धत्वात्। न च अनुमानविरोधित्वम्, अनुमित्सया प्रत्यक्षसिद्धेऽपि अनुमितिदर्शनात्। तदुक्तम् वाचस्पतिमिश्रैः प्रमाणटीकायां "प्रत्यक्षकलितमप्यर्थम् अनुमानेन बुभुत्सन्ते तर्करसिकाः" "नहि करिणिदृष्टे तयनुमिन्वन्ति अनुमातारः" इति। श्रवणानन्तरं मननदर्शनाश्च। तस्मात् सिद्धिमात्रार्थिनः सिद्धौ तदिच्छा न भवति सिद्धिविशेषार्थिनः सा अस्तीति अनुमितिरेव। तस्मात् सन्देहादिघटितपक्षताघटनद्वारा सिद्धसाधनं दूषणं [1]स्वत संक्षेपः। विस्तरस्तु मत्कृतानुमानखण्डटीकायां सूक्ष्मदृष्ट्या अनुसन्धेयः।

न च (स च) अयं दशविधः धर्मिग्राहकमानबाधितः "घटो व्यापकः स्त्वात्", इति प्रत्यक्षेण "परमाणवः सावयवाः मूर्तत्वात्" इत्यनुमानेन "मेरुः पाषाणमयः कार्यत्वात्" इति सुवर्णमयत्वबोधकागमेन, "शब्दो न श्रावणः गुणत्वात्" इत्यनुमानेन, पूर्वम् अतीन्द्रियपक्षकम् एतश्च प्रत्यक्षपक्षकमिति अनयोः भेदः। गवयत्वं न गवयपदप्रवृत्तिनिवृत्तं जातित्वात्' इत्यनुमानेन साध्यविपरीत बोधितग्राहकं बाधितम्, "नरशिरः कपालम् शुचि, प्राण्यङ्गत्वात्" इत्यागमेन हेतुग्राहकबाधितम्, जलानिलावुभावप्युष्णौ पृथिवीतो विपरीतस्पर्शाश्रयत्वात् तेजोवदिति प्रत्यक्षेण, 'मनो विभु ज्ञानासमवायि, कारणाधारत्वात्' इत्यनुमानेन, "राजसूयं ब्राह्मणेन कर्तव्यं स्वर्गसाधनत्वात्, ज्योतिष्टोमवदि"ति राजसूयकर्तव्यताबोधकागमेन साध्यविपरीतग्राहकमुदाहरति — "वह्निः अनुष्णः कृतकत्वात्" इति प्रत्यक्षेण प्रपञ्चिता इति शेषः। केवलव्यतिरेकि — केवलान्वयि — अन्वयव्यतिरेकि चेति त्रिविधम् अनुमानं निरूपितमित्याह— 'व्यख्यातमि'ति। ।। श्रीरस्तु ।।

---

1. क — 'नन्वत' इति पाठः।

उपमान निरूपणम्

अनुमानोपजीवकत्वेन अनुमाननिरूपणानन्तरं शब्दोपमाननिरूपणे प्राप्ते, यद्यपि शब्दापेक्षा उपमानस्येति, शब्दनिरूपणमेवोपमानतः प्राप्तं तथापि न शब्दमात्रापेक्षा इह भूतले घटो नास्तीति वाक्यानामुपमानं प्रत्यप्रयोजकत्वात्। उपमानस्य च उपमानत्वावच्छेदेनैव सङ्केतग्राहकत्वेन शब्दं प्रत्युपयोगात् शब्दापेक्षया उपमानस्यैव शब्दतः प्राक् निरूपणं युक्तम्, नचैवं शब्दविशेषस्यैव उपमानोपजीव्यत्वेन स च कुतोन निरूप्यते इति वाच्यम्। नहि यावत् उपजीव्यं तावत् आदौ निरूप्यं तथासति अतिप्रसङ्गात्। तथा सति प्रमाणविभाजकोपाध्यवच्छेदेन उपजीव्योपजीवकभावे विचार्यमाणे उपजीव्यत्वम् उपमानस्य एवेति मनसि निधाय शब्दनिरूपणात् प्राक् तदादौ निरूपयति — 'अतिदेशे'ति अतिदेशवाक्यार्थस्मरणसहकृतेति। अतिदिश्यते ज्ञाप्यते सादृश्यं येन सोऽतिदेशः सचासौ वाक्यं चेति कर्मधारयः अतिदिश्यते येन पुंसा सोऽतिदेशः तस्य वाक्यमिति न षष्ठीतत्पुरुषः। तथा च सादृश्यप्रतिपादकवाक्यार्थस्मरणसहकृतसादृयज्ञानम् उपमानमित्यर्थः। (वैधर्म्यविशिष्टपिण्डज्ञानं) गोसादृश्यविशिष्टपिण्डज्ञानमित्यर्थः। वैधर्म्यविशिष्टपिण्डज्ञानमपि बोध्यम्। अन्यथा कुतश्चित् उदीच्यात् गोविलक्षणं विद्धि करभम् अतिदीर्घग्रीवप्रलम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशम् अविशदं पशूनामिति वाक्यं श्रुत्वा दाक्षिणात्यः उत्तरपथं गतः तादृशपशुम् उपलभ्य अयमसौ करभशब्दवाच्यः इति प्रत्येति तत्र किं मानं भवेत् यथा सादृश्यज्ञानस्य उपमितिकरणत्वेन उपमानत्वं तदुपपादयति -- 'तथाही'त्यादिना।

उपमितिमभिनीय्य दर्शयति – 'अयमसौ' इति। ननु क्लृप्ता-न्यतरप्रमाणात् एव न कथमियमिति चेत्, तत्र तु न तावत् वाक्यमात्रात् अचाक्षुषीकृतपिण्डस्य विनोत्पद्यते (प्रसोत्पद्यते) नापि प्रत्यक्षमात्रात्। अश्रुतवाक्यस्यापि प्रसङ्गात्। नापि संमिलितात्, शब्दप्रत्यक्षयोः भिन्नकालीनत्वात्, उभयोरेकज्ञानाजनकत्वात् अस्तु तर्हि वाक्यार्थस्मरणसहकृतसादृश्यादिज्ञानकाले व्याप्रियमाणं चक्षु-रेव कारणम्, न, उपलब्ध – गोसादृश्यविशिष्टगवयपिण्डस्य पुंसो वाक्यार्थस्मृतौ निमीलितनयनस्य कालान्तरेऽपि अनुसन्धानबलात् अयं गवयपदवाच्य इत्युपमितिदर्शनात्।

ननु वाक्यादेव गवयशब्दः संज्ञा गोसादृश्यविशिष्टः पिण्डः संज्ञा इति निरणायि। तदनन्तरम् अयमसौ गवदशब्दवाच्य इति प्रत्यभिज्ञा (न) मात्रं जायते; किञ्च प्रयोगादपि गवयशब्दः गवयत्वविशिष्टधर्मिवाचकः असति वृत्यन्तरे वृद्धैः तत्र प्रयुज्य-मानत्वात् यः यत्र असति वृत्यन्तरे वृद्धैः प्रयुज्यते स तस्य वाचकः यथा गोशब्द एव गोः। प्रयुज्यते चायं गोसादृश्यविशेष्टे, कि-मुपमानेनेति चेन्न। नहि गोसादृश्यं गवयपदप्रवृत्तिनिमित्तम्, अप्रतीतगवां वनेचराणांच गवयपदव्यवहाराभावप्रसङ्गात् न च अतिदेशवाक्यात् गवयत्वं गोसादृश्यं च प्रवृत्तिनिमित्तत्वेन अवग-म्यते इति वाच्यम्। व्युत्पित्सुं प्रति एतादृशतात्पर्येण प्रयोगाद्य-नुपपत्तेः। गवयत्वे अयं व्युत्पन्नो व्यवहारः न गोसादृश्य इति कुत एवं निर्धारणीयम् इति वाच्यम्। गोसादृश्यं प्रवृत्तिनिमित्तम् उत गवयत्वमिति सन्देहः, नापि फलसिद्धेः। लाघवेन गवयत्व-स्यैव प्रवृत्तिनिमित्तत्वावधारणञ्च।

ननु वाक्यात् एवं विधावधारणे ममैव इष्टमायातामिति

चेन्न। भ्रान्तोऽसि तदुपमानं विना अन्यस्य एतादृशावधारणाजन-कत्वम्। न च गोसादृश्येति अतिदेशवाक्यस्थं पदं लक्षणया गवयवत्वस्य प्रवृत्तिनिमित्तत्वं बोधयतीति वाच्यम्, यत्र गोसादृश्यं तत्र गवयवत्वमिति सामानाधिकरण्येनापि अन्वयबोधसम्भवेन अन्वयानुपपत्तेः अभावात्, तस्मात् अतिदेशवाक्यार्थं स्मरणानन्तरं यथा गोसदृशं पिण्डं पश्यति तदा गोसादृश्यम् उपाधितया तिरस्कृत्य अन्यूनातिरिक्तनिमित्तान्तरस्य अनुपस्थित्या गवयत्वमेव प्रवृत्तिनिमित्तमिति अधिगच्छति, एतश्च निमीलितनयनस्यापि भवतीति न प्रत्यक्षजन्यता। लक्षणं तु अनवगतसङ्गतिसंज्ञमभि (संज्ञा सम-भि) व्याहृत वाक्यार्थस्य संज्ञिनि अनुसन्धानम् उपमानम्। वाक्यार्थश्च क्वचित् साधर्म्यं क्वचित् वैधर्म्यम् इति। तदुक्तं कुसुमाञ्जलौ उदयनाचार्यैः "सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिनासह प्रत्यक्षादेः असाध्यत्वात् उपमानफलं विदुः"। इति।

वस्तुतस्तु उपमितित्वं जातिः तत्करणम् उपमानमिति सादृश्यवैदृश्यज्ञानसाधारणं बोध्यम्। तएतत्सर्वं मनसि निधाय आह-'इदं तु प्रत्यक्षानुमाने'ति। इयम् उपमितिरित्यर्थः। सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम्, सामान्यमुपाधिरूपं न तु अर्थान्तरम् इत्यास्तां विस्तरः।[1] ॥ श्रीरस्तु ॥

शब्दनिरूपणम्

शब्दप्रमाण – आप्त – वाक्य

शाब्दबोधानां निरूपणम्

---

1. क – 'इत्यविस्तरः' इति पाठः।

उपजीव्योपमान निरूपणानन्तरम् अत्र क्रमप्राप्तं शब्दं निरूपयति'आप्ते'ति। शब्दपदात् पूर्वं प्रमाणेतिपदं बोध्यम्। तेन प्रमाणशब्दत्वं लक्षतावच्छेदकम्। अन्यथा गौरश्च इत्यादिषु लक्ष्यतावच्छेदकातिप्रसङ्गेन लक्षणागमनात् अव्याप्तिः स्यात्।

आप्तस्वरूपमाह – 'आप्तस्तु' इति यदावस्थितार्थकथक इत्यर्थः।

वाक्येस्वरूपमाह – 'वाक्यं तु' इति। आप्त पदं स्पष्टार्थम्, न तु व्यावर्तकम्। वस्तुतस्तु वाक्यम् आकाक्षाआसत्ति – मत्पदसमूह एव, नन्वधिकं व्यर्थत्वात्। तथा च तावन्मात्रम् अङ्गुल्यग्रेकरिशतमिति वाक्येऽतिव्यापकं स्यात् अत आप्तेति।

आकांक्षासत्ती इति विशेषणात् गिरिरग्निमान् भुक्तं देवदत्तेनेति वक्तव्ये इन्द्रियस्य (अ) पाठवशात् गिरिर्भुक्तमाग्निमान् देवदत्तेन इयुच्चार्यमाणे, घटमानयेत्येवमर्थे घटः कर्मत्वम् आनयनं कृतिरिति उच्चारिते वा नातिव्याप्तिः। वह्निना सिञ्चतीत्यत्रापि नातिव्याप्तिः। वाक्यार्थासंभवेन निरुक्ताजन्यत्वात् अत एव आप्तोपदेशः शब्दः इति सूत्राविरोधः। 'वाक्यं तु' – इति वाक्यलक्षणप्रतिपादकग्रन्थस्तु उपसंहारपरो बोध्यः। वाक्यपदं च प्रमाणभूतवाक्यपरम्। 'अत एवे'ति। यतः प्रमाणवाक्यम् आकांक्षादिघटितम् अत एव (न) प्रमाणवाक्यमित्यर्थः। अत हेतुमाह – 'परस्परे'ति।

ननु केचमाकांक्षा न तावत् समभिव्याहृत पदार्थजिज्ञासा। वाक्यश्रवणोत्तरक्षणे जिज्ञासा विनापि वाक्यार्थ प्रतीतेः सर्वलोकसिद्धत्वात्। अत एव तज्ज्ञानस्यापि अहेतुत्वम्।

[1]अथ स्वश्रोत: (?) तदुच्चारणजनित संसर्गावगमप्रागभाव आकाङ्क्षा। श्रोतरि उत्पाद्यज्ञानवतीत्यर्थ:। न च प्रागभावस्य कार्यमात्रं प्रति कारणत्वेन कथं शब्दं प्रति असाधारणकारणत्वं स्यादिति वाच्यम्। प्रागभावत्वेन साधारणत्वेऽपि अनेन रूपेणापि असाधारण्यात्। श्रोतरीति पदं च यत्रैकं वाक्यं श्रोतृद्वयेन श्रुतं तत्रैकस्य व्युत्पन्नत्वात् शीघ्रमन्वयबोधे जाते परस्य अन्वयबोध-दशायां पुनस्तं प्रति सांकाक्षं स्यात् अत उपात्तम्। (न) 'यत्सं शयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चय: तद्धेतुरि'ति व्याप्ते: आकाङ्क्षाभ्रमेण अन्वयबोधदर्शनाद्वा आकाङ्क्षाज्ञानस्यैव कारण-त्वात्, न च एतादृशाकाङ्क्षाया: अनन्वये बाधात् पूर्वं ज्ञानस-म्भव: नापि ज्ञाप्य – तदितरान्वयप्रकारकजिज्ञासानुकूलो पस्थिति-जनकत्वे (न) सति अजनिततात्पर्य विषयान्वयबोधकत्वं ज्ञाप्य-स्तदितरश्च योऽन्वय: तत्प्रकारकजिज्ञासानुकूलोपस्थितिजनकत्वं च घटमानयेत्यादीनामेव वाक्यानाम्, घटमित्युक्ते किमानयति पश्ये-ति वा आनयेत्युक्ते किं घटमन्यं चेति जिज्ञासाया: प्रत्यक्षसि-द्धत्वात्, घट: कर्मत्वमानयनं कृतिरित्यादीनां च न तथा।

न च घट: किं कर्तव्यमिति जिज्ञासाया: सत्वेन कथमभे-देन अन्वयबोधो न इति वाच्यम्, अयोग्यत्वात्, घट इति पदात् घटस्य सम्बन्धित्वेन अनुपस्थिते:, घटस्य आनयनमिति नान्व-यबोध: जनितान्वयबोधे अतिव्याप्तिवारणाय अजनितान्वयबोध इति, घटपदेन नीलादिना सह अवान्तरान्वयबोधे जनिते अजनि-तान्वयबोधस्वाभावात् आनयनपदेन घटपदं निराकाङ्क्षं

1. न्यायमञ्जर्यां – "आकाङ्क्षापदार्थ: तर्हि क:? जिज्ञासां प्रति योग्यता। सा च स्मरिततदाक्षिप्तयो: अविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगम प्रागभाव:" इति।

स्यात् अत उक्तम् — 'तात्पर्यविषये'ति। यद्यपि तात्पर्य-विषयता तत्रापि तथापि अजनितमुख्यतात्पर्यविषयान्वयबोधत्वमिति अर्थो बोध्य इति नामविभक्तिधात्वाख्यातक्रियाकारकपदानां घट कर्मकत्वआनयनकृतीनां च स्वरूपेण उपस्थितेः अविशेषात्, घट-मित्यादिपदात् जायमानोपस्थितिरपि नान्वयप्रकारक जिज्ञासानु-कूलेति तेषां परस्परमाकाङ्क्षा स्यात्।

नहि घटः कर्मत्वम् आनयनं कृतिरिति एतत्पदजन्योपस्थि-तिः तस्याः किञ्चित् वैजात्यमस्तीति उच्यते, यस्य पदस्य येन पदेन विना स्वतात्पर्यविषयान्वयानुभावकत्वं नास्ति तस्य तद-पर्यवसानम् (?) आकाङ्क्षानाम्। विभक्तिधात्वाख्यातक्रियाकार-कपदानां परस्परं विना परस्परस्य न स्वार्थान्वयानुभावकत्वमिति तेषां परस्परमाकाङ्क्षेति संक्षेप इति।

'अग्निना सिञ्चती'त्यादिनवाक्यम् न प्रमाणवाक्यमित्यर्थः। तत्र हेतुमाह 'योग्यते'ति।

ननु केयं योग्यता न तावत्सजातीये अन्वयबोधदर्शनम्, यत्किञ्चित्साजात्यं वा पदार्थतावच्छेदकरूपेण साजात्यं वा वाच्यः अयोग्येऽपि सत्वात्। नापरः अद्य जातः पयः पिबतीत्यत्र अभा-वात्, नापि बाधकप्रमाणाभावः अन्यत्र यद्बाधकप्रमाणं तदभा-वस्य अयोग्येऽपि सत्वात्, न च प्रकृतसंसर्गे बाधकप्रमाणाभावः अयोग्यसंसर्गस्य अप्रसिद्ध्या संसर्गबाधकप्रमाणाभावाभावस्यैव सु-तरां वक्तुमशक्यत्वात् अयोग्यत्वस्यैव अनिर्वचनीयत्वापत्तेः।

किञ्च स्वबाधकप्रमाणाभावो वा अपरबाधकप्रमाणाभावो वा बाधकमात्रप्रमाणाभावो वा? नाद्यः अयोग्येऽपि सत्वात्,

अयोग्यत्वेन ज्ञातुम् अशक्यतया शाब्दभ्रमानुदयप्रसङ्गात्। न च अन्वयप्रयोजकरूपवत्त्वेन अनुमाप्यते इति वाच्यम्। आवश्यकत्वेन तस्यैव योग्यत्वापत्तेः। न च एवमेव भवत्विति वाच्यम्। अन्वयस्य पूर्वमज्ञानात् अत एव न अन्त्येऽपि, यावद्विशेषबाधेन सामान्यबाधवदिति। उच्यते।

एकपदार्थसंसर्गे अपरपदार्थनिष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यता। "इदं संयोगि द्रव्यत्वात्" इत्यादौ अव्याप्तिवारणाय प्रतियोगिव्यधिकरणेति। इदं (इयं) च न स्वरूपसती कारणं किन्तु ज्ञातैव। तद्भ्रमात् अन्वयबोधदर्शनात् ज्ञानं संशयनिश्चय साधारणमिति दिक्। आसत्तिश्च अव्यवधानेन अन्वयप्रतियोग्युपस्थितिः। व्यवधानं च अप्रकृतपदेन कालेन चेति। न कश्चित् विशेषः। इयमपि ज्ञातैव अन्वयबोधजनिका इयं चावश्यमभ्युपेयेति अभिप्रायेणाह -- 'एवमि'ति।

ननु आकाङ्क्षेति पदबलात् इच्छैव आकाङ्क्षा स च आत्मनिष्ठैवेति कथं पद -- पदार्थयोः साकाङ्क्षत्व -- निराकाङ्क्षत्व -- व्यवहारः इत्याशयेनाशङ्कते -- 'नन्वि'ति। परिहरति -- 'सत्यमि'ति। 'अर्थास्तावदि'ति। यद्यपि मन -- आत्मादीनां च आकाङ्क्षाजनकत्वमस्तीति तेषामेव साकाङ्क्षत्वं वक्तुमुचितं, तथापि तेषु साकाङ्क्षत्वव्यवहाराभावात् एवं कथ्यते। यः साकाङ्क्षत्वव्यवहारजनकः तत्रैव अन्योन्यविषयाकाङ्क्षाजनकत्वस्य स्वरूपसम्बन्धविशेषेण स्थितिः, अतः साकांक्षत्वं समभिव्याहृतपदार्थानां नात्मादीनामिति। 'तद्द्वारेणे'ति। समभिव्याहृतपदार्थप्रतिपादकत्वरूपसम्बन्धेनेत्यर्थः।

नन्वेवं सति अतीतानागतपदार्थप्रतिपादकवाक्यानाम् आकाङ्क्षा

न स्यात्, असत्त्वेन तेषामजनकत्वादित्यत आह – 'यद्वे'ति। 'अर्थान्' इति – साकाङ्क्षपदप्रतिपाद्यत्वात् इत्यर्थः। सम्प्रदायमतेनेयमाशङ्का समाधानं च।

ननु अननुभावकत्वाकाङ्क्षापक्षे अनुभावकत्वाभावस्य आकाङ्क्षत्वेन पदेष्वेव आकाङ्क्षावत्वं स्वयमूह्यम्। 'परस्परान्वये'ति समभिव्याहृतपदार्थसंसर्गवन्त इत्यर्थः। 'तद्द्वारे'ति। योग्यार्थप्रतिपादकत्वद्वारेत्यर्थः। सन्निधिमत्वं च पदानामेवेत्याह – 'सन्निधिमत्त्वं त्वि'ति। एतावता प्रबन्धेन उपपादितमर्थम् उपसंहरति – 'तेने'ति। 'वाक्यमि'ति। प्रमाणवाक्यमित्यर्थः।

वाक्यस्य पदघटितत्वेन पदाज्ञाने वाक्यं दुर्ज्ञेयमतः पदलक्षणमाह – 'पदमि'ति। ननु आशुतरविनाशीनां वर्णानां कथं समूहः स्यादित्यत आह – 'समूहश्चे'ति। इदं लक्षणं यथाश्रुतं "झ–भ–षु–थ–ध" इति वर्णसमूहे अतिव्यापकम्। न च सुप्तिङन्तौ वर्णसमुदायः पदलक्षणमस्तीति वाच्यम्। एकत्र पदे सुप्तिङोरभावात्। न च प्रत्येकमेव लक्षणम् अननुगमात्। न च विभक्तित्वेन अनुगमः। "प्राक् दिशोः विभक्तिः" इति सूत्रेण कृतविभक्तिसंज्ञतद्धितान्तस्य सुप्विनाकृतस्यैव पदसंज्ञापत्तेः। 'देवदत्त' इत्याकारस्यैव पदत्वापत्तेश्च। नापि यस्मात् वर्णात् विभक्तिः तदन्तो वर्णसमूहः देवदत्तस्य वस्त्रमिति सकलस्यैव वाक्यस्य पदत्वापत्तेः। न च अन्तराविभक्तिरहितत्वे सतीति विशेषणम्? देवदत्तस्य शुल्कवस्त्रमि'ति समुदायस्य अतथात्वापत्तेः। न च अश्रूयमाणविभक्तिकत्वे सति इति विशेषणम्। 'उरभिलोमकं काशः' इत्यादौ अव्याप्तेः।

वस्तुतस्तु 'देवदत्तशुल्कवस्त्रमित्यादिवाक्यं न पदं तथा च

तस्यापि पदत्वापत्तेः। न चेष्टापत्तिः। विशिष्टे वृत्त्यनुगतौ अनतिप्रसक्तशक्यतावच्छेदकाभावात् न शक्तेरेव ग्रहीतु मशक्यत्त्वात् प्रत्येकशुल्कादिपदसंज्ञापि नद्यादिसंज्ञावत् पदसिध्यर्थमेव। न तु वाक्यघटकलक्षणमिति। उच्यते। ईश्वरेण यस्मिन्नर्थे यः शब्दः सङ्केतितः प्रत्येकपदप्रतीत्यनन्तरमित्यर्थः, अन्त्यपदविषयेण अन्त्यपदसम्बन्धेनेत्यर्थः। ननु श्रोत्रेन्द्रियं शब्दतद्गतजातिमात्रग्राहकं तदा तेन कथं वाक्यप्रतीतिः जन्यते पदघटितत्वात् वाक्यस्येत्यत आह-'पदार्थप्रत्ययानुगृहीतेने'ति। पदरूपो योऽर्थःतस्य प्रत्ययः पदत्वेन पदज्ञानं तदनुगृहीतत्वं तत्सहकृतत्वम्। इयताप्रबन्धेनोक्तर्थम् उपसंहरति – 'तदिदमि'ति। तस्य फलसाकाङक्षत्त्वात् तदाह – 'फलं तस्ये'ति। वाक्यस्मरणद्वारेति शेषः।

ननु वाक्यश्रवणानन्तरम् इदं वाक्यं साकाङक्षे तदर्थविषयकैकज्ञानहेतुकम् आप्तोक्तत्वेनेति एतदर्थप्रतिपादकत्वात्, मद्वाक्यवदिति अनुमानान्तरम् एते पदार्थाः मिथः संसर्गवन्तः साकाङक्षत्वे सति एकज्ञानविषयत्त्वात्, राजते इदं रजतमिति ज्ञानविषयत्वात्, एवं वक्तुः यथार्थज्ञाने अनुमितेः वाक्यार्थप्रत्यय इति लौकिकवाक्यस्य न स्वातन्त्र्येण प्रमाणत्वं वेदेतु अपौरुषयत्वेन वक्तृज्ञानानुमानाभावात् स्वातन्त्र्येण प्रमाणत्वमिति जरन्मीमांसकमतम्। वाक्यस्य आकाङक्षादिमत्त्वज्ञानमात्रेणैव संभृतसामग्रीकत्वेन अर्थप्रत्यायकत्वम्। अनुमानस्य तु व्याप्तिस्मृत्यादिसापेक्षितत्त्वेन विलम्बितत्वात् प्रथमत एव वाक्यार्थ प्रतीतेः जायमानत्वात् आकाङक्षादिमद्वाक्यत्वेन यथा प्रमाणशब्दत्वं वेदस्य तथा अस्य लौकिकवाक्यस्य अस्त्येव इत्यादिशेषैः निराकरणीयमिति अभिप्रायेणाह – 'तश्चेतदि'ति। स्वमतसिद्धानि प्रमाणानि वर्णितानि इत्युपसंहारव्यानेनाह – 'इति चत्वारी'ति।

अर्थापत्तिनिरूपणम्

अर्थापत्तेः पृथक्प्रामाण्यविवेचनपूर्वकं
केवलव्यतिरेक्यनुमाने तदन्तर्भावः

एतदधिकप्रमाणाङ्गीकृत प्राभकरमतं निराचिकीर्षुराह–'एतेभ्य' इति। शङ्कते – 'नन्वि'ति। तदेव व्युत्पादयति – 'तथा ही'ति। फलितमर्थमाह – 'अत' इति। ननु एतत् प्रत्यक्षान्यतमान्तर्भूतं न कथमित्यत आह – 'प्रत्यक्षादी'ति। अत्रहेतुमाह – 'रात्रिभोजनस्ये'ति। परिहरति – 'मैवमि'ति। कथमित्यत आह – 'रात्रिभोजनस्य अनुमान-विषयत्वादि'ति। अनुमानविषयत्वमेव व्युत्पादयति – 'तथा ही'ति।

अभावस्य प्रथक्प्रामाण्यनिराकरणम्

गूढभिसंधिः भाट्टः प्रत्यवतिष्ठते – 'नन्वि'ति। अन्यथा अभावप्रतीतिरेव न स्यात् इत्याशयेनाह – 'तश्चे'ति। तदेव व्युत्पादयति – 'तथा ही'ति। ननु एतावता अनुपलब्धेरेव प्रमाणत्वमायातं नाभावस्येत्यत आह – 'अनुपलब्धिश्चे'ति। उक्तमर्थमुपसंहरति – 'इत्यभावप्रमाणेने'ति। आशयमविद्वान् (अविदित्वा) परिहरति – 'नैतदि'ति। अत्र युक्तिमाह – 'यदि'ति।

अभावस्य इन्द्रियग्राह्यत्वे आक्षेपः तत्परिहारश्च

अभिसन्धिमुद्घाटयति – 'नन्वि'ति। नन्वेतावता किमायातमत आह – 'न थे'ति। 'संयोगे'ति। संयोगस्य द्रव्यद्वयमात्रसमवेतत्वात् समवायस्य भावमात्रनिष्ठत्वात् इत्याशयः। ननु भूतलं घटाभाववत् इत्यादौ भूतलघटाभावयोः विशेषणविशेष्यभावस्य सत्वात् विशेषण – विशेष्यभाव एव चेन्द्रियसम्बन्ध इत्याशयेनोक्तम् – 'न सम्बन्ध' इति। अत्र हेतुमाह – भिन्नेति। तदेव स्पष्टयति - सम्बन्धो ही'ति। उपसंहरति - 'तस्मादि'ति। भिन्नोभयाश्रितैकत्वात् विशेषण - विशेष्यभावो न सम्बन्ध इत्याशयेन उपसंहरति - 'तस्मादि'-ति। कथं तर्हि सम्बन्धशब्दप्रयोग इत्यत आह 'सम्बन्धशब्दप्रयोगस्तु' इति। इन्द्रियस्य असम्बन्धार्थग्राहकत्वे अतिप्रसङ्गः स्यात् अतः अभावाख्यं प्रमाणमं अङ्गीकर्तव्यम् एवेति अभिप्रायवान् उपसंहरति - 'तथा चे'ति। इन्द्रियस्य असम्बन्धाद्यर्थग्राहकत्वे अतिप्रसङ्गः अङ्गीक्रियते अभावेच नेन्द्रियग्रह्यत्वमिति इत्यर्धाङ्गीकारेण परिहरति - 'सत्यमि'ति। अत्र हेतुमाह - भावावच्छिन्नत्वादिति। प्राप्तमेवेति। संयोगसमवायरूपप्राप्तिमदित्यर्थः अतिरिक्ताभावप्रमाणवादिनापि विशेषणविशेष्यभावोऽतिप्रसङ्गवारकत्वेन अङ्गीकर्तव्य एवेत्याह - समश्चेति।

अयं भावः। यद्यनुपलब्धिमात्रम् अभावग्राहकं स्यात् अन्धकारेऽपि घटाभावो गृहीत (गृह्येत) अतः चक्षुरादेरपि जनकत्वम् अङ्गीकर्तव्यम्। न च अधिकरणग्रहण एवोपक्षीणम् इन्द्रियमिति वाच्यम्, व्यापारेण व्यापारिणोऽन्यथासिद्ध्यभावात् अन्यथा घटा-

दिचाक्षुषज्ञानेऽपि संयोगेन अन्यथा सिद्धत्वात् इन्द्रियं करणं न स्यात्, तथा च स एवातिप्रसङ्गवारक इति।

ननु सम्भवोऽपि न कथं प्रमाणान्तरं, तथापि सम्भवति सहस्रे शतं खार्यां द्रोण इत्यादौ शतादिप्रमायाः प्रमाणान्तरजन्यत्वादिति चेन्न। सहस्रत्वादेः शतादिव्याप्यत्वेन अनुमानादेव तत्प्रमोत्पत्तेः इति। ननु तथापि ऐतिह्यम् अतिरिक्तं प्रमाणमस्तु, अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यम् ऐतिह्यं – यथा इह वटे यक्षः प्रवसति इत्यादिना एतस्य शब्द एव अन्तर्भूतत्वादिति। ननु प्रमाणादितत्त्वज्ञानात् निश्श्रेयसाधिगमः इत्युक्तं, तन्न युक्तम्। प्रमात्वग्रहं विना प्रमाणतत्त्वस्य दुर्ज्ञेयत्वात्।

प्रामाण्यनिरूपणम्

प्रामाण्यस्य स्वतस्त्व – परतस्त्व विचारः

ननु प्रमाणादि तत्त्वज्ञानात् निश्श्रेयसाधिगमः इत्युक्तं, तन्न युक्तम्। प्रमात्वग्रहं विना प्रमाणतत्त्वस्य दुर्ज्ञेयत्वात्। प्रमात्वग्रहोपायः अवश्यं वाच्य इति आह – 'इदमि'ति। इदं प्रमात्वं येनोपायेन गृह्यते तेनोपायेन इदानीम् उपोद्घातसङ्गत्या कथ्यते इत्यर्थः। यद्वा प्रसङ्गसङ्गत्या प्रमात्वस्य परतस्त्वं निरूप्यते इत्याह – 'इदमि'ति।

स्वतः प्रामाण्यवादिनं मीमांसकं निराकरिष्यमाणो लोकस्थितिं कथयति – 'जलादिज्ञान' इति। प्रामाण्यमवधार्य समर्थप्रवृत्तिजनकजातीयत्वेन लिङ्गेनेति शेषः।

'कश्चिदि'ति। 'इदं जलादिज्ञानं प्रमा न वे'ति सन्देहादित्यर्थः। अत्र नैवं विप्रतिपत्तिः ज्ञानप्रमाण्यं तदप्रामाण्यग्राहकयावज्ज्ञान-ग्रहकग्राह्यं न वा? प्रमितिः प्रमाणम् इति व्युत्पत्या प्रमात्वं पक्षः, तस्मिन् ग्राह्यप्रामाण्याश्रयीभूते अप्रामाण्यग्राहकं यावज्ज्ञा-नग्रहकं तेन तत्प्रामाण्यं गृह्यते इति साध्यार्थः। यावत्पदे दूरी-क्रियमाणे अनुमित्या प्रामाण्यग्रहस्य उभयत्रादिसिद्धत्वात् सिद्ध-साधनं स्यात् अतो। यावदिति – यावज्ज्ञानग्राहकग्राह्यमित्यर्थः। इत्येव कृते प्रमायामेवेदं ज्ञानम् अप्रमाविसंवादिजनकत्वात् इत्या-दिलिङ्गाभासे गृह्यमाणाप्रामाण्यज्ञानप्रामाण्ये बाधः स्यात् अतो प्रमाण्यग्राहकेति। तत्पदे दूरीक्रियमाणे अप्रमायामेव विसंवादिप्र-वृत्तिजनकत्वेन सल्लिङ्गेन या प्रामाण्यानुमितिः जायते तस्यां प्र-माभूतायाम् अनुमितौ तदभाववति तदभाववत्प्रकारत्वमेव प्रामाण्यं यद्वर्तते तदपि पक्षीकृतमस्ति तथा च तद्ग्राहकं यावद्ज्ञानग्राहकं तदप्रमाण्याग्रहकं न भवतीति तत्र बाधः स्यात्, एवं च पक्षीभूताश्रये अप्रामाण्यग्राहकं भवत्येवेति तत्पदेन बाधनिरासः।

अत्र विधिकोटिः ज्ञान एव प्रसिद्धा न सा (निषेध) को-टिरप्रामाण्य एव, एवं विप्रतिपत्तौ सत्यां विधिकोट्यङ्गीकर्तारं मीमांसकं पूर्वपक्षत्वेन अवतारयति अत्र 'कश्चदि'ति न प्रतिज्ञामा-त्रेण अर्थसिद्धिः अतो हेतुमाह 'स्वत एवे'ति। सर्वेषां प्रमाणानां प्रामाण्यं यतः स्वत एव निश्चीयते अत इत्यर्थः। नन्वेतदसङ्ग-तम्। न हि प्रमाण्यमात्रादेव प्रामाण्यनिश्चयो भवितु मर्हतीति अत आह – 'अस्यार्थ' इति। फलितमर्थम् उपसंहरति – 'तेने'ति। नन्वेतदसङ्गतम्। न हि परतः प्रामाण्यवादिनापि तार्किकेण ज्ञा-नग्राहकादन्येन प्रामाण्यं गृह्यते इत्युच्यते। प्रामाण्यविषयकानुमितेः ज्ञानस्यापि विषयीकरणादिति चेन्न। विप्रतिपत्तिविधिकोट्यर्थे एव

तात्पर्यात्। ननु प्रवृत्तेः पूर्वमेव ज्ञान गृह्यते इत्यत्र किं प्रमाणमित्यत आह – 'ज्ञानञ्चे'ति। जलज्ञानानन्तरं प्रामाण्याप्रामाण्यसन्देहादपि पुरुषः प्रवर्तते इतिवदत्रापि प्रवृत्तेः। पूर्वं ज्ञानं गृहीतमिति अभ्युपगन्तव्यमिति भावः।

(?) ननु एतावता प्रघट्टिकया ज्ञानग्रहकं नः न किञ्चित्करत्वं न किञ्चिदुपन्यस्तम्। उच्चते च तया ज्ञानग्राहकेण तद्गतं प्रामाण्यं गृह्यते इत्यतः प्रमाणानुपन्यासे च न मात्रम् एतदसाधकमिति उपसंहारव्याजेत प्रमाणम् उपन्यसति – 'तस्मादि'– ति। (?)

स्वमतं स्थापयित्वा परमतं दूषयति – 'नन्वि'ति। सिद्धान्तं वक्तुं प्रतिजानीते – 'अत्रोच्यते' इति। अर्थापत्तेरन्यथाभाव एव दूषणमिति वक्तुं परोक्तमनुवदति – 'तातते'ति। न मृष्यामहे – न सहामहे। तदुत्पत्त्येति। घटादितः ज्ञानम् उत्पद्यते ततो घटविषयत्वं वर्तते इत्यर्थः। दूषयति – 'इन्द्रियादेः' इति। इन्द्रियादेरपि ज्ञानजनकत्वात् विषयत्वापत्तेः इत्यर्थः। 'तेनेदमि'ति। यतो घट एव तस्य ज्ञानस्य विषय इत्यर्थः। 'ततो विषयत्वे'ति। विषयत्वोपन्यासानुकूलव्यापारो ज्ञात इति भावः। 'न तु' इति। ज्ञातो घट इति प्रत्यक्षमात्रम् अपितु विषयत्वान्यथानुपपत्तिप्रसूतार्थापत्तिश्च प्रमाणमिति भावः।

निषेधति – 'मैवमि'ति। 'युक्तिसामान्याभावादेवे'ति। अर्थापत्तेः अन्यथैवोपपत्तेरिति भावः। तदेव स्पष्टयति – 'अर्थज्ञानयोरि'ति। विपक्षे बाधकमाह – 'इतरथे'ति। स्वभावविशेषस्य अनियतत्वात् इत्यर्थः। 'ज्ञातताया अपी'ति। ज्ञाता – 'ज्ञाते'त्यनुभवस्य सत्त्वादित्यर्थः। ननु अतीतानागतादौ बाधकसत्त्वात् ज्ञाततां विनैव स्वभावादेव विषयत्वोपपत्तौ कथं विद्यमानविषये बाधकं विना प्रत्य–

क्षादिसिद्धज्ञाततां तिरस्कृत्य स्वभावादेव विषयत्वं, नह्येकत्र स्व-भाव आश्रीयते इति, न तु सर्वत्रैव तत्स्वीकारः, अतिप्रसङ्गादिति, विद्यमानविषये ज्ञाततासिद्धेः अनवस्थायाः अपि प्रामाणिकत्वात् इत्याशङ्क्य ज्ञाततास्वीकारेऽपि न स्वतः प्रामाण्यसिद्धिः इत्याश-येनाह – 'अस्तु वे'ति। तथापि तन्मात्रेणज्ञाततामात्रेण। अन्यथा ज्ञातताऽन्यथानुपपत्त्या अर्थापत्त्या अप्रमायाः अपि ग्रहणात् अप्रा-माण्यमपि गृह्यते इति भावः। प्रमारूपज्ञानव्यभिचारिणा प्रमापि तज्ज्ञातताख्यलिङ्गविशेषेण प्रमा प्रमात्वेन सहैव गृह्यते इत्यत आह – 'अथ केनचिदि'ति। एतदप्रामाण्येऽपि वक्तुं शक्यमेवेत्याह – 'एवं चे'ति।

ननु यद्यप्येवं स्वतस्त्वम् अप्रामाण्ये वक्तुं शक्यते – तथापि भट्टचरणैः अभिहितम् अप्रामाण्यं परत एव इत्यतः अप्रामाण्यस्य परतस्त्वं न प्रामाण्यस्येति गुरुवचनश्रद्धाम् अभ्रान्तः शङ्कते – 'अथैवमि'ति। वचनमात्रस्यासाधकत्वेन अप्रामाण्यमिव प्रमाण्यमपि परत एव कुतो नाभ्युपगम्यते इत्याह – 'प्रामाण्यमपि परत एव गृह्य-ताम्' इति परतः शब्दार्थमाह – 'ज्ञाने'ति।

वस्तुतस्तु – स्वरूपसम्बन्धविशेषेणैव विषयविषयिभावलक्षणेन सम्बन्धेन घटज्ञानयोः तदीयत्वादिव्यवहारः। अन्यथा इष्टो घटो नष्टः, घट इत्यादौ अनेकधर्मकल्पना स्यात् ज्ञाततावत् इत्याशयेन स्वमतसिद्धं ज्ञानग्राहकमाह – 'ज्ञानं ही'ति।

ननु ज्ञानवत् प्रामाण्यमपि मानसप्रत्यक्षेण अनुव्यवसायेन कुतो गृह्यते – ज्ञानं हि तावत् विषयनिरूप्यम् अतः अनुव्यव-सायेन व्यवसाये गृह्यमाणे धर्मधर्मिवैशिष्ट्यमपि अनुव्यवसायवि-षयोऽस्तु। अत एव पुरोवर्तिनं रजतत्वेन जानामि इति अनुव्य-वसायः। अन्यथा पुरोवर्तिनं रजतं जानामीति तदा आकारः स्यात्।

न च मनसः बहिः अस्वातन्त्र्यात् रजतत्त्वादिवैशिष्ट्यं, न तु व्यवसाये भासते इति वाच्यम्। यथैव व्यवसायरूपप्रत्यासत्त्या धर्मधर्मिणौ अनुव्यवसाये भासेते तथैव तद्ज्ञाने विरोधाभावात्। व्यवसायप्रत्यासत्तेः तुल्यत्त्वादिति ज्ञानग्राहकेण अनुव्यवसायेनैव-प्रमात्त्वग्रहोऽस्तु इति मुरारिमिश्राणां मतसिद्धान्ते प्रामाण्यं कथं न सिध्येत्, किञ्च अनुव्यवसायपर्यन्तमपि न गन्तव्यम्। उत्पाद्यमानो व्यवसाय एव स्वप्रकाशकत्त्वात् स्वं ज्ञानं च गृह्णन् प्रामाण्यमपि गृह्णा ति इति प्रभाकर मतसिद्धं स्वतः प्रामाण्यमस्तु इति पूर्वः पक्षः।

इदं जलमिति जलज्ञाने जाते तदव्यवहितोत्तरतृतीयक्षणाभ्यन्तरे 'इदं प्रमा न वे'ति संशयस्य अनुभवसिद्धतया न निराकरणीयः, ज्ञानग्रहे प्रामाण्यनिश्चयात्, अनिश्चयेन स्वतः प्रामाण्यग्रह इत्याशयेनाह - 'प्रामाण्यं पुनरि'ति। तदेवोपपादयति – 'तथा ही'ति। 'स्मृत्या व्यभिचारापत्तिरि'ति। स्मृत्या समर्थप्रवृत्तिजनकत्वेऽपि प्रमाकरणत्वरूपप्रामाण्याभावात् भावव्युत्पत्याश्रयेण प्रमात्वाभावश्चेति भावः।

पक्षसाध्यविभागं विधाय हेतुस्वरूपनिर्देशं व्याकरोति -'हेतुस्तु' इति। ननु लोके प्रामाण्यानुमापको अन्वयव्यतिरेक्यपि दृश्यते स च साध्यसिध्यादिकं विना नोपपद्यते इत्यत आह – 'अनेने'ति। प्रामाण्यानुमितिरिति दर्शयित्वा अनुवादपूर्वकं परतः प्रामाण्यार्थकथनव्याजेन उपसंहरति – 'परत' इति। इदं च यथाश्रुतं तार्किकसम्मतम्। तन्मतेऽपि ज्ञानग्राहकेणैव ग्रहणात्, तथापि ज्ञानग्राहकेण गृह्यत एवेति योजना कर्थव्या।

वस्तुतस्तु विप्रतिपत्तिनिषेधकोटौ एव अस्य तात्पर्यम्।

ननु प्रथमत एव व्यतिरेकि कथं प्रवर्ततां साध्यप्रसिद्धिं

विना व्याप्तिग्रहस्य असम्भवादिति चेन्न। स्वतः प्रामाण्यस्य दू-षितत्वेन प्राग्भावीयसंस्कारविशेषात् तद्वति तत्प्रकारकत्वं निश्चितं जलज्ञानादौ साध्यते इति कल्प्यते। अन्यथा प्रामाण्यनिश्चया-भावेन अर्थनिश्चयाभावात् क्वापि प्रथमतः निष्कम्पप्रवृत्तिः न स्यात्, अथ प्रामाण्यम् अनुमानैकगम्यं तर्हि तदनुमापके लिङ्गपक्षव्या-प्त्यादिज्ञाने प्रमाण्यसंशये सति स्वस्वविषयनिश्चयार्थं प्रामाण्या-नुमानानुसरणे कारणमुखानवस्था आपद्येत इति चेन्न। विषया-न्तरसहचारेण सर्वत्र कोटिस्मरणादि भवत्येवेति नियामकत्वात् इत्यास्तां विस्तर इति।

एतावता ग्रन्थसन्दर्भेण प्रतिपादितम् अर्थं शिष्यबुद्धिवैशद्याय कारिकया संग्रहः (संगृण्हाति - चत्वारीति)।

इति श्रीगोविन्दतनुजमहोपाध्याय - श्रीगणेश्वरविरचितायां तर्कभाषायाः टीकायां तर्कप्रबोधिन्यां प्रमाणपरिच्छेदः समाप्तः।

प्रमेयनिरूपणम्
प्रमेयभेद कथनम्

[1]सर्वेषां प्रमाणाधीनप्रतिपत्तिकत्वात् आदौ प्रमाणं निरूप्य तदनन्तरं प्रमेयं वक्तुं प्रतिजानीते - 'अथे'ति। ननु प्रमाणाधीन-प्रतिपत्तिकत्त्वात् विशेषे कथं प्रमेयस्यैव संशयाद्यपेक्षया अन्तर्हि-तत्त्वम्। न च वक्ष्यमाणद्वादशविधप्रमेयमेव हेयोपादेयभावेन मुमु-क्षूणां प्रतिपत्सितमिति वाच्यम्।तथा सति संशयादीनामप्रयोज-

1. ग - टीकारम्भे कृता प्रार्थना पुनरावृत्ता।

कत्त्वेन अनभिधानमेव स्यादिति चेन्न। अपरीक्षितं प्रमेयं निश्रेयसम् उत्पादयितुं न शक्तमिति परीक्षापरिकरत्वेन तेषां युक्तं पक्षाल्लक्षणम्। तदिह प्रमेयलक्षणाय तद्विभागोद्देशपरं सूत्रम् अवतारयति – 'अत्रे'ति। अत्र सर्वपदार्थप्रधानो द्वंद्वो बोध्यः। प्रमेयेतिपदेनोद्देशः कृतः। आत्मेत्यादिना विभागः कृतः इत्यावधारणीयम्। यद्यपि उद्देश आद्यसूत्र एव कृतः तथापि प्रमेयमिति उद्देशकपदं विना आत्मेत्यादिपूर्वप्रतीकः अपर्थवसन्न एव स्यात्। न चैवं सति स्वायत्ते शब्दप्रयोगे कथमुद्देशक – विभाजकपदयोः वचनभेद इति वाच्यम्। समुदिते प्रमेये अन्यतमस्यापि अज्ञाने नापवर्ग इति प्रतिपादनार्थं 'तु' शब्दस्यैव (शब्द एव), तदतिरिक्ते प्रमेयत्वं नास्तीति अनभिमतव्यवच्छेदाय सूत्रकारेणोपात्तः।

ननु[1] रिक्ततत्वज्ञानाभ्याम् अपवर्गसंख्या का? तथा च अपवर्गकारणतत्त्वज्ञानलक्षणं बोध्यम्। ननु एतत्प्रामाण्याद्यतिव्यापकं, तत्तत्त्वज्ञानस्य आद्यसूत्रे मोक्षहेतुत्वश्रवणादिति चेन्न। साक्षात्कारणत्वस्य विवक्षितत्वात् प्रमाणादितत्त्वज्ञानं प्रमेयतत्त्वज्ञानोपयोगि प्रमेयतत्त्वज्ञानं साक्षादेव हेतुः यद्यपि एतत् शरीरादौ अव्यापकं तत्तत्वज्ञानस्य आत्मविशेष्यकेतरभिन्नत्वप्रकारकज्ञाने प्रतियोगिज्ञानत्वेन उपयोगात्। तथापि द्वादशविधप्रमेयसंख्यनुभवात् तत्त्वज्ञानेनेति प्रमेयटीकादर्शनाच्च एकैकप्रमेयविषयतत्त्वज्ञानानन्तरं सर्वप्रमेयेषु एकं यत्तत्वज्ञानमुत्पद्यते तदपवर्गसाक्षात्कारणात् (कारणात्म) तत्वज्ञानसाक्षात्कारणम्। तथा च अपवर्गसाक्षात्कारणात्मतत्त्वज्ञाने प्रमेयतत्वज्ञानद्वारा जनकं प्रमाणतत्वज्ञानम्। अतः तद्विषयप्रमाणाद्यतिव्याप्तिवारणाय चरमपदम्, साक्षात्पदं विनापि प्रमाणादावतिव्याप्तिः स्यात्।

1. अत्र ग्रन्थपातः स्यात्।

यद्वा संसारपरम्पराकारणमिथ्याज्ञानविषयत्वं प्रमेयत्वम्। आत्मादिद्वादशविशेष्यकसमूहालम्बनज्ञानविषयत्वं वा। यद्यपि अत्र सूत्रे सुखमपि संग्रहीतुमुचितं तस्यापि हेयत्वात् तथापि दुःखपदेनैव तत्संग्रहो बोध्यः। अत्र यद्यपि शरीरादेः। गौणदुःखत्वेन शरीरेन्द्रियबुद्धीनां प्रवृत्तिदोषजनितत्वेन फलत्वे योग्यमात्राणाम् अर्थत्वे च दुःखादिपदेनैव संग्रहे जाते पुनरभिधानं व्यर्थम्, तथापि "गोवृषन्यायेन" अर्थादिपदानां समभिव्याहृतविशेषेतरविशेषपरत्वात् इति उपधेयविभागो बोध्यः, न च तर्हि तेषां दुःखत्वव्युत्पादनं व्यर्थमेव स्यादिति वाच्यम्, तेनापि रूपेण शरीरादीनाम् आत्मतत्त्वज्ञानोपयोगित्वमिति प्रदर्शनार्थत्वात्। यद्वा यैः प्रकारैः आत्मादीनां ज्ञानं मोक्षोपमोगि तदुपाधिविभा- गोऽयम्।

आत्मनिरूपणम्

एतैरेव प्रकारैः आत्मादितत्त्वज्ञानं मोक्षोपयोगीति दर्शनार्थम् अपवर्गस्य आत्मार्थत्वेन प्रमेयेषु आत्मनः प्राथम्यात् प्रथमम् आत्मलक्षणमाह – 'आत्मत्वे'ति। ननु एतत् सामान्यं देहेन्द्रियज्ञानेष्वेव समवैतीत्यत आह – 'देहेन्द्रिये'ति। बाल्यादिदशानुभूतस्य स्मृतिप्रत्यभिज्ञानत्वात् इति भावः। ननु वेदान्तिमत इव सर्वशरीरेषु एक एव किं न स्यात् इत्यत आह – 'प्रतिशरीरं भिन्न' इति। अन्यथा एकस्मिन् सुखिनि सर्वेऽपि सुखिनः स्युः इति भावः। 'विभुरि'ति कृशोऽहं दीर्घोऽहं ह्रस्वोऽहम् इत्यदिबुद्धीनाम् अप्रमात्वादिति भावः। ननु विभुत्वात् कालादिवत् नित्यानुमेय एवनेत्याह- 'मानसप्रत्यक्ष' इति। ननु आत्मनिसिद्धे अतिरिक्तानतिरिक्तविचारः

पदमादध्यात् तत्रैवेति (तत्रैव न) किञ्चित्प्रमाणमित्यत आह – 'विप्रतिपत्ताचि'ति। तदेवोपपादयति 'तथाही'ति। करिष्यमाणहेतोः स्वरूपासिद्धिवारणाय गुणत्वमादौ स्थापयति – 'बुध्यादय' इति। ग्राह्यत्वस्य केवलान्वयितया अतीन्द्रियद्रव्ये व्यभिचारवारणाय इन्द्रियेति। इन्द्रियत्त्वेन च ग्राह्यता बोध्या। अन्यथा सर्वस्यैव मनोग्राह्यतया व्यभिचारः तदवस्थ एव स्यात् तावन्मात्रे घटादावेव व्यभिचारः स्यात्। अत एकेति। एकेन्द्रियमात्रग्राह्यत्वादित्यर्थः। अन्यथा द्वीन्द्रियग्राह्यस्यापि एकेन्द्रियग्राह्यत्वेन व्यभिचारानुद्धारात्। तथापि सुखत्वादौ व्यभिचारः स्यात्, अतो नित्यत्वे सतीति। प्रभानयनगतपित्तद्रव्ययोः व्यभिचारवारणाय एतदुभयभिन्नत्वे सतीति इत्यपि बोध्यम्। यद्वा एकपदं निरवयवपरम् एवं च निरवयवेन्द्रियग्राह्यत्वात् इति हेतुर्बोध्यः।

वस्तुतस्तु एकपदं द्वीन्द्रियायोग्यपरम्। प्रभाच (प्रभायाश्च) स्पर्शगतोद्भूतत्वरूपसहकारिविरहादेव वागिन्द्रियग्राह्यत्वम्। अत एव यो घटः चक्षुमात्रेण गृहीतः न स्पर्शः तत्रापि व्यभिचारः।

यत्तु केनचिदुक्तं प्रभादौ व्यभिचारव्यावृत्यर्थं तज्जातीयत्वादिति हेतुः प्रयोक्तव्य इति। तन्न। तथापि व्यभिचारतादवस्थ्यात्। अतः किमित्यत आह – 'गुणश्चे'ति। धर्मो धर्मिणं विना न तिष्ठतीति भावः। ननु भूतान्येव तदाश्रयः कुतो न भवन्तीत्यत आह – 'तत्रे'ति। मा भूत् भूताश्रयत्वं दिगादित्रयाश्रितत्वं कथं न स्यात् इत्यत आह – 'नापी'ति। ननु स्यादेव एतत् यदि बुध्यादीनां विशिष्टगुणत्वं स्यात् इत्यत आह – 'बुध्यादय' इति। गुणत्वे सतीति सुखत्वादौ व्यभिचारवारणाय मात्रपदं वा अत्रापि बोध्यमिति परिशेषेण एभ्योऽतिरिक्तो धर्मो कश्चित् सिद्ध- इत्याह – 'तस्मादि'ति। विशेषमविलक्ष्य यत्तच्छब्दाभ्यां सामा-

न्योपादाने अन्वयव्यतिरेक्यपि संभवतीत्याह – 'अन्वयव्यतिरेकीचे'ति। पूर्वं विभुत्वाद्युक्तं नहि युक्तिरुक्ता इत्यतो युक्तिपूर्वकं बिभुत्वाद्येवाह – 'सर्वत्रे'ति। सर्वमूर्तद्रव्यसंयोग कार्योपलम्भात् इत्यर्थः। ननु सर्वमूर्तसंयोग एव किं प्रमाणमिति चेत्, मत्थम् - अस्ति तावत् ज्वलनपवनादौ अध्वतिर्यग्गतिनियमः तत्र दृष्टकारणाभावात् अस्मदाद्यदृष्टस्यैव अनन्यगत्या नियामकत्वम्। तच्च अदृष्टस्य ज्वलनादिसम्बन्धं विना न सम्भवतीत्यतः संयुक्तसमवायप्रत्यासत्तिः अवश्यं वाच्या। एवं देशान्तिवर्तिज्वलादिसंयोगात् महत्त्वे सिद्धे यवादिकल्पनायां प्रमाणाभावात् परममहत्त्वादेव सर्वमूर्तसंयोगसिद्धिः इत्यपि बोध्यम्। तत्त्वज्ञानवतः कायव्यूहकृते नानाशरीरेषु युगपदुत्पन्नानां विरुद्धाः क्रियाः सन्ति, ताश्च प्रयत्नवदात्मसंयोगं विना न सम्भवन्तीति तावत् शरीरसंयोगसिद्धौ तद्वदेव सर्वसंयोगसिद्धिः। यद्वा देवदत्तशरीरवत् इत्यनुमानादेव सर्वमूर्तसंयोगसिद्धिः। विभुत्वपरममहत्त्वपरिमाणयोः भिन्नार्थत्वभ्रमनिरासार्थमाह – 'परमे'ति।

ननु आत्मलक्षणम् अप्रमेये ईश्वरे अतिव्यापकं तस्य मोक्षकारणतत्त्वज्ञानाविषयत्वात्।

"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चे"ति श्रुतौ सामानाधिकरण्यात् यद्विषयकः साक्षात्कारः तद्विषयकं मननं मोक्षहेतुः साक्षात्कारश्च जीवमात्रगोचरो, नचेश्वरविषयः तथा दोषम् (?) इत्यादिमिथ्याज्ञाननाशद्वारापि अस्य जनकत्वम्। न च संसारमात्रगोचरम् ईश्वरगोचरं वा? "गौरोहम्" इति मिथ्याज्ञानं संसारहेतुः येन तद्ध्वंसः द्वारं स्यात्, किन्तु स्वात्मगोचरमिथ्याज्ञानमिति तत्साक्षात्कार एव मोक्षहेतुरिति भवति अतिव्यापकता आत्मलक्षणस्येति चेन्न।

ईश्वरमननमपि मोक्षहेतुः "तमेव विदित्वाऽतिमृत्युमेती"ति श्रुत्या स्वात्मज्ञानस्येव परमात्मनो वित्तेरपि तद्धेतुत्वप्रतिपादने बाधकाभावात्। "द्वे ब्रह्मणी वेदितव्ये" इत्यत्र वेदनमात्रस्य आकांक्षितत्वात् "श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च" इत्यादेरत्वयश्च परमात्ममननं च यद्यपि मिथ्याज्ञाननाशद्वारा नोपयोगि तथापि स्वात्मसाक्षात्कार एवोपयुज्यते। तथा च श्रुतिः "स हि तत्वतो ज्ञातस्वात्मसाक्षात्कारस्योपकरोतीति"। अत एव प्रमेये-

"इच्छयैव प्रमेयात्मा, सुखदुःखानि आत्मनो लिङ्गानी"ति सूत्रम्। अत्र अर्थविभागः, संसारी तदन्यश्च तत्रात्मलक्षणम् इच्छाज्ञानप्रयत्नाः, संसारिणां तु प्रत्येकमपि लक्षणानीति। ॥श्रीः॥

शरीर लक्षणम्

अपवर्गस्य अभावरूपतया प्रतियोगिनिरूपणाधीननिरूपणत्वात् प्रतियोगिदुःखनिरूपणतोऽपकर्षितस्यापि (निरूपणाधीनतया तस्यापि) हेत्वधीनतया यावद्धेत्विन्द्रिय निरूपणतोऽपकर्षि (निरूपणाधीनतया) तेषामपि नियतशरीरावच्छेदेन दुःखहेतुत्वात् शरीरस्य भोगावच्छेदकत्वात् गौरूपम् (गौरोऽहम्) इत्यादिमिथ्याज्ञानगोचरत्वात् शरीरस्य प्राथम्यात् तल्लक्षणमाह- 'तस्ये'ति। अन्त्यावयवित्वे सति इत्येतद्विशेषणं सर्वत्र देयम् अन्यथा हस्ताद्यवयवेऽतिव्याप्तिः स्यात्। ननु को भोग इत्यत आह- 'सुखे'ति।

ननु मिलितयोरनुभवो वा? प्रत्येकमनुभवो वा? नाद्यः असंभवात्, नापरः प्रत्येकाव्याप्तेरिति चेन्न। यज्जात्यालिङ्गितं

सर्वं लौकिकसाक्षात्कारविषयताव्याप्यं तस्याननुभवो भोगः, लौकिकत्वं च प्रकृते षोढासंनिकर्षमात्रजन्यत्वं, विषयजन्यत्वं वा। तथा च लौकिकसाक्षात्कारविषयताव्याप्यजातिमत्वविशिष्टानुभवस्य विवक्षितत्वात् – नोक्तदोषः । ईश्वरसाक्षात्कारमादाय घटाद्यनुभवे अतिव्याप्तिवारणाय लौकिकेति अनुभवोऽपि लौकिकत्वेन विशेषणीयः। अन्यथा सुखानुभित्यादिरपि भोगः स्यात्। आयतनशब्दार्थं व्याकुर्वन् लक्षणं स्पष्टयति – 'यदवच्छिन्ने'ति ।

"चेष्टेन्द्रियार्थाश्रयः शरीरम्" इति सूत्रानुरोधेन लक्षणान्तरमाह – 'चेष्टे'ति । करादावतिव्याप्तिवारणाय अन्त्यावयवित्वे सतीति बोध्यम्। चेष्टा यदि क्रियामात्रं स्यात् तदा घटादौ अतिव्याप्तिः स्यात् ततश्चेष्टार्थमाह – 'चेष्टात्वि'ति । ननु इदं यथाश्रुतं हिताहितप्राप्तिपरिहारफलिकायां दारुयन्त्रक्रियायाम् अतिव्यापकमिति चेन्न। स्पर्शवद्द्रव्यान्तराप्रयुज्यमानत्वे सति हिताहितप्राप्तिपरिहारफलिकायाः क्रियायाः तत्त्वात्।

वस्तुतस्तु अनित्यप्रयत्नसाक्षाज्जन्यक्रियायाः चेष्टात्वे न कोऽपि दोषः। ननु तथापि शरीरलक्षणं मृतशरीरे, उत्पन्नविनष्टनिष्क्रियशरीरे पाषाणमध्यवर्तिभेकादिशरीरे च अव्याप्तमिति चेन्न, चेष्टासमानाधिकरण – अन्त्यावयविमात्रवृत्तिजातिमत्त्वं शरीरत्वम् इति अस्य विवक्षितत्वात्। एवं विधा च जातिः मनुष्यत्वादिः सुप्रसिद्धा । अतस्तादृशजातिमत्वम् अक्रियादशायाम् अस्त्येवेति नाव्याप्तिः। एवमिन्द्रियाश्रयत्वं इति लक्षणं बोध्यम्। ननु इन्द्रियाश्रयत्वं यदि इन्द्रियसंयोगित्वं तदा घटादौ अतिव्याप्तम्। यदि समवायित्वं चेत् तदा असंभव एव स्यात्, इन्द्रियाणां स्वावयवसमवेतत्वात् तथापि उपजीव्यत्वमेव आश्रयशब्दार्थः राजाश्रयः वञ्चित इतिवत् प्रकृते चोपजीव्यत्वं शरीरस्योपघाते

इन्द्रियाणाम् अपटुत्वं तदुपचये च पटुत्वम्। यद्यपि शरीरोपय-तोपचयौ (?) बलाद्यपकर्षितकर्षात् परिमाणाद्युपकर्षादिरूपतया (?) अणुगतौ। एवम् इन्द्रियापटुत्वपटुत्वेऽपि अननुगते एव तथापि शरीरोपचयस्य धातुसामान्यादेः उपघातस्य जरारोगादेः इन्द्रिय-पटुत्वस्य सूक्ष्मग्राहकत्वस्य तदभावस्य अपटुत्वस्य विशिष्यैव नि-र्बन्धनम्। तेन इन्द्रियपटुत्वा पटुत्व प्रयोजकधातुसाम्यादिवत् अ-न्त्यावयविमात्रवृत्तिजातिमत्वं पर्यवसितं बोध्यम्। अर्थाश्रयत्वमा-त्मनि अतिव्याप्तमिति चेन्न। यदवच्छिन्ने आत्मनि अर्थाः भोग-जनकाः तत्व तदित्यर्थस्य विवक्षितत्वात् अर्थोऽत्र सुखं बोध्यम्।

इन्द्रियनिरूपणम्

शरीरसंयोगनिरूप्यत्वात् तदनन्तरम् इन्द्रियलक्षणमाह - 'शरीरसंयुक्तमि'ति। व्यर्थविशेषणताशङ्कां निराकरोतिअतीन्द्रियमि-त्यादिना अन्त्यावयवित्वेन विशेषणात् न इन्द्रियावयवेऽतिव्या-प्तिः। कति तानीति जिज्ञासायामाह - 'तानी'ति। तान्येव संग-णयति - 'घ्राणे'ति। क्रमप्राप्तं घ्राणं लक्षयति - 'तत्रे'ति। तदाश्र-यमाह - 'नासे'ति। तस्य पार्थिवत्वं स्थापयति - 'तच्चे'ति। हेत्व-सिद्धिमाशङ्क्याह - 'गन्धवत्त्वं चे'ति। ननु गन्धग्राहकत्वं नाम गन्ध-ज्ञानजनकत्वं तच्चात्मादौ अपि अस्तीति व्यभिचारः स्यादित्यत आह - 'यन्द्रियमि'ति। आत्मादेरिन्द्रियत्वाभावात् न व्यभिचार इति भावः। ननु तथापि मनसो ज्ञानमात्रजनकत्वेन तत्रैव व्यभिचार इति चेन्न, यदि (यत्) इन्द्रियम् इन्द्रियत्वेन गृह्णाति इत्यर्थस्य विवक्षितत्वात् बाह्यविषयकज्ञाने मनसि नेन्द्रियत्वेन जनकत्वमि-त्यस्यार्थस्य प्रागेवोक्तत्वात्। ननु सुखज्ञानं प्रति इन्द्रियत्वेन

मनसोऽजनकत्वात्। व्यभिचारतादवस्थ्यम् इति चेन्न। व्याप्तेरस्याः बहिरिन्द्रियपरत्वात्। रसनेन्द्रियं लक्षयति – 'रसने'ति। ननु घटादिवत् इन्द्रियानुपलब्धेः किमिन्द्रियसद्भावे प्रमाणमित्याशङ्कते – 'नन्वि'ति।

अर्थ निरूपणम्

अर्थानामिन्द्रियनिरूप्यत्वात् बुद्धिनिरूपकत्वाच्च इन्द्रियनिरूपणानन्तरम् अर्थं निरूपयति – 'अर्था' इति। इह यद्यपि गन्ध – रस – रूप – स्पर्श – शब्दाः पृथिव्यादिगुणाः तदा अर्था इति सूत्रानुरोधात् वक्तव्या एते एवार्था इति। अत एव 'भास्करे' अत्र सूत्रे पृथिव्यादीतिपदं योग्यपृथिव्यादिपरं, गुण इति योग्यधर्मपरं तेन संख्या – परिमाण – पृथक्त्व – संयोगविभाग – परत्व – अपरत्व द्रवत्व – स्नेहसंस्कार – कर्म – सामान्य – समवाय – अभावानां संग्रहः।

अत्र द्वंद्व एव समासो बोध्यः। अन्यथा उक्तपञ्चातिरिक्तानाम् अर्थत्वापत्तिः स्यात्, अत्र उद्देशक्रमप्राप्ता अर्था लक्ष्याः तदर्था इति लक्षणम् इन्द्रियग्राह्या इत्यर्थः। तेषां विभागपरः अपरभागः द्वंद्वः।

यद्यपि गुणशब्देनैव गन्धादीनां प्राप्तिः भवति तथापि 'गोबलीवर्दन्यायात्' अन्यगुणपरं गुणपदम्; भाष्यवार्तिकटीकादावपि अयमेवार्थः स्पष्ट एव। तदव्युत्पादनमेव कर्तुमुचितम्। तथापि एतद्भिन्नपदार्थनिरूपणम् एतन्निरूपणप्रयोजकम्, अत उभयनिरूपणं

करिष्यमणो अर्थपदं वैशेषिकशास्त्रपरिभाषितषट्पदार्थपरतया व्याचष्टे – 'अर्था' इति।

यद्वा शिष्यबुद्धिवैशद्याय एतन्निरूपणप्रसङ्गेन पदार्थनिरूपणं करिष्यमाणः अर्थविशेषे पारिभाषिकमपि अर्थशब्दं सामान्यपरतया व्याचष्टे – 'अर्था' इति। ते च के इत्याकाङ्क्षायाम् आह – 'द्रव्ये'ति।

ननु प्रमाणादयोऽपि एतन्निरूपणादेव निरूपिता भवन्ति तथापि एतैरपि उपाधिभिः ज्ञाता मोक्षोपयोगिन इति तेषां भिन्नत्वेनापि कथनमावश्यकमिति आक्षेपसमाधानाभ्यामाह – 'प्रमाणादय' इति। तत्र प्रथमोद्दिष्टद्रव्यलक्षणमाह – 'समवायी'ति। कति तानीति जिज्ञासायां संकलय्य दर्शयति – 'तानी'ति। नवग्रहणं स्पष्टार्थम्। विभागस्य न्यूनाधिक संख्याव्यवच्छेदफलकत्वेन विभागादेव नवसंख्यायोगित्वोपलब्धेः। एवकारश्च मीमांसकमतसिद्धातिरिक्तद्रव्यनिषेधार्थः ननु कथमत्र अतिरिक्तनिषेधः? निषेधस्य ज्ञानाज्ञानाभ्यां सिद्ध्यसिद्धिव्याघातादिति चेन्न। नवातिरिक्ते द्रव्यत्वनिषेधस्य, द्रव्यत्वेन सिद्धे अतिरिक्तत्वनिषेधस्य क्रियमाणत्वात्। अतो ज्ञातस्यैव ज्ञाते प्रतिषेधेन सिद्ध्यसिद्धिव्याघातः। एवमेव उत्तरोत्तरैवकारो व्याख्येयः।

पृथ्वीनिरूपणम्

क्रमप्राप्तां पृथिवीं लक्षयति – 'पृथिवीत्वे'ति। 'काठिन्ये'ति। एते अवयवसंयोगविशेषाः अन्येषु न सन्तीति भावः। एतेन

प्राभाकरमते काठिन्यादिकं पदार्थान्तरमिति प्रसिद्धं, तदपि दूषितमिति ज्ञातव्यम्। आदिपदात् निबिडेतर (निबिडितर) निबिडतमादिसंग्रहः। एवं च एतादृशसंयोग विशेषसमानाधिकरणद्रव्यत्वसाक्षादव्याप्यजातिमत्त्वमपि लक्षणं बोध्यम्। द्रव्यत्त्वसाक्षाद्व्याप्यजातित्वं च द्रव्यत्वव्याप्यजात्यव्याप्यत्वे सति द्रव्यत्वव्याप्यत्वम्। अयं च व्याप्यव्यापकभावो भेदगर्भो विशेषणीयः। अन्यथा पृथिवीत्वस्यापि द्रव्यत्वसाक्षाद्व्याप्यत्वं न स्यात्। द्रव्यत्वव्याप्यजातिः द्रव्यत्वमपि भवति तद्व्याप्यत्वादेव पृथिवीत्वस्य। ननु प्राणिनामुपकारं विना न कस्यापि उत्पत्तिः अस्ति अत एव तस्याः कथमुपयोग इत्यत आह – 'घ्राणे'ति। तां विभजते – 'सा चे' ति। उभयोः यथाक्रमं स्वरूपमाह – 'परमाण्वि'ति। जलगतरूपाद्यपेक्षया एतद्गतरूपादीनां विशेषमाह – 'द्विविधाया' इति। पाकजत्वं विशदयति – 'पाक' इति।

जलनिरूपणम्

क्रमप्राप्तं जलं लक्षयति – 'अप्त्वे'ति। कथमुपकुर्वन्ति इत्यत आह – 'रसने'ति। गुणानाह – 'गन्धे'ति। पूर्ववद् द्वैविध्यम् अस्तीत्याह – 'नित्या' इति। नित्यगतरूपादीनां विशेषमाह – 'नित्या एवे'ति।

तेजो निरूपणम्

तेजसो लक्षणमाह – 'चक्षु'रिति। गुणानाह – 'रूपे'ति। अन्यापेक्षया अस्य अवान्तरभेदमाह – 'तच्चे'ति। तदेव यथाक्रमं दर्शयति

'उद्भूते'त्यादिना। उद्भवानुद्भवौ गुणनिष्ठधर्मविशेषौ। गुणप्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकौ अनयोः उपाधित्वजातित्वविचारः प्रत्यक्षखण्डटीकायामनुसन्धेयः। सुवर्णं कीदृशमित्यपेक्षायामाह – 'सुवर्णन्तु' इति। असुवर्णं तु अनुद्भूतस्पर्शमेव कुतो न स्यादित्यत आह – 'अनुद्भूते'त्यादिना। चाक्षुषतां प्रति अनुद्भूतस्पर्शवत्त्वस्य प्रयोजकत्त्वादिति भावः। अभिभावकं कथयन् अभिभवशब्दार्थमाह – 'अभिभवस्तु' इति। बलवत्सजातीयसम्बन्ध एव अभिभवः। बलवत्त्वं च फलबलात् कल्प्यमिति भावः।

ननु स्यादेवम्, यदि सुवर्णस्य तेजस्त्वं सिद्धं स्यात्। प्रत्युत पीतरूपाश्रयत्वेन गुरुत्वाश्रयत्वादिना पार्थिवत्वेन अतेजस्त्वस्यैव योग्यत्वात्। अत एव न्यायलीलावत्यामुक्तम्-

"पीतिमा च गुरूत्वं च
दाहे यस्य न रक्तता।
तस्य लोकप्रसिद्धस्य
स्वर्णत्त्वं केन वार्यते"॥

इति चेन्न। असिद्योतस्य (?) लोकप्रसिद्धस्य सुवर्णस्य अत्यन्ताग्निसंयोगे पीतमेव रूपं दृश्यते न तद्विलक्षणं तच्च कथमुपपद्यताम्? असति द्रवत्वयुक्तद्रव्यान्तरसम्बन्धे पार्थिवस्य अत्यन्तानलसंयोगे पूर्वरूपविजातीयरूपजनकत्वनियमात्, आप्यसम्बन्धे (अप्सम्बन्धे) तदुपगमे च सति पटादौ तथा दर्शनात् तदिदं भासमानलोकप्रसिद्धं कनकं यदि अत्यन्ताग्निसंयोगिपार्थिवत्वे सति पूर्वरूपविजातीयरूपप्रतिबन्धकद्रवत्वयुक्तद्रव्यसंयुक्तं न स्यात् तथा (तदा) पूर्वरूपविजातीयरूपवदेव स्यात्, अग्निसंयुक्तपटत्वात्। आलोकादौ व्यभिचारवारणाय पार्थिवेति। अन्यथा पार्थिवत्वं न स्यात्। तदयं

प्रयोगः ; अत्यन्तवह्निसंयुक्त एव लौकिकसुवर्णं पूर्वरूपविजातीय-रूपप्रतिबन्धकद्रवत्त्वयुक्तद्रव्यसंयुक्तम् अत्यन्तानलसंयोगे सति पूर्व-रूपविजातीयरूपानधिकरणपार्थिवत्त्वात्, जलमध्यस्थितात्यन्ताग्निसं-युक्तपटवत् ।

यद्वा पीतं सुवर्णं पीतरूपातिरिक्तरुपोत्पत्तिप्रतिबन्धकद्रवद्रव्य-संयुक्तं नक्तंदिनम् अग्निसंयोगे पीतरूपातिरिक्तरूपानश्रयत्वात् तावत्पर्यन्तम् अत्यन्ताग्निसंयुक्तजलस्थितपीतपटवत् । न च अप्रयो-जकत्वं विरोधिद्रवद्रव्यसम्बन्धं विना पार्थिवात्यन्ताग्निसंयोगस्य वि-जातीयरूपजनकत्त्वात् । तच्च द्रवद्रव्यं न जलं स्वाभाविकद्रवत्त्वा-नाश्रयत्वात् । नच अनुद्भूतं तत् शीतलशिलातले अग्निसंयोगात् दाहदर्शनेन अनुद्भूतद्रवत्वस्य दाहाविरोधित्वात्, सनैमित्तिकद्र-वत्वाच्च । नापि तत एव पार्थिवं द्रुतपार्थिवस्य विजातीयरुपप्र-तिबन्धकत्वे घृतादावपि तथात्वापत्तेः । यद्यपि तेजोऽन्तरं न नैमि-त्तिकद्रवत्वाधिकरणं नापि विजातीयरूपप्रतिबन्धकं तथापि प्रत्यक्षद्रव-त्वेन तस्यरूपद्रवत्वे (रूपवत्वे) गन्धशीतस्पर्शाद्यभावेन पृथिवीज-लान्यत्वेन परिशेषात् तैजसत्वं सिध्यति । अत एव न्यायलीलाव-त्यामुक्तम्-

"अनुच्छिन्नद्रवत्त्वं तु वस्तुवत्प्रतिभासते ।
सुवर्णव्यवहारोऽयं तत्र शास्त्रे प्रवर्तते" ।।

वायुनिरूपणम्

क्रमप्राप्तं वायुं लक्षयति – 'वायुत्त्वे'ति तद्भेदमाह – 'त्वगिन्द्रिये'ति ।

ननु भवेदेवं किञ्चिन्मानं भवेत्। नच प्रत्यक्षमेव मानं भविष्यतीति वाच्यम्। किं तत्प्रत्यक्षं बाह्यम्? आन्तरं वा? नाद्यः अरूपद्रव्यत्वेन चक्षुस्त्वगिन्द्रियायोग्यत्वात्। घ्राणरसनश्रोत्राणां च द्रव्यग्राहकत्वात्। नान्त्यः आत्मतद्गुणान्यत्वात्। नाप्यनुमानं, लिङ्गाभावादित्यत आह– 'स्पर्शानुमेय' इति। अयं भावः स्पर्शस्य च गुणत्वेन गुणिनं विना अवस्थितिरेव न सम्भवतीति सूचनात् पृथिवी न, उद्भूतस्पर्शायाः तस्याः उद्भूतरूपवत्वनियमात्। अत एव न जलतेजसी, अनुष्णाशीतस्पर्शवत्वात् एव, इति य एव एतादृशस्पर्शाश्रयः स एव वायुः इति।

नानावस्तुप्रयत्क्ष (नव्यवस्तुप्रत्यक्ष) एव वायुः। तथाहि 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् यो, यः प्रत्यक्षस्पर्शाश्रयः सः प्रत्यक्ष एव यथा घटः। नच साधनावच्छिन्नसाध्यव्यापकम् उद्भूतरूपवत्वम् उपाधिः। एतस्य चाक्षुषतायामेव प्रयोजकत्वात् स्पार्शनप्रत्यक्षतायां महत्वे सति उद्भूतस्पर्शवत्वस्य प्रयोजकत्वात्। तच्च प्रकृते अस्त्येव। अथ वायुः यदि स्पार्शनप्रत्यक्षविषयः स्यात्। उद्भूतरूपः स्यात्। नचैवं तस्मान्न तथा तादृशस्य द्रव्यस्य रूपजनकत्वनियमादिति चेन्न। रूपवत्समवेतद्रव्यस्य तत्प्रयोजकत्वात्। घटो यदि चक्षुरितरेन्द्रियग्राह्यद्रव्यं स्यात् अरूपम् अचाक्षुषम् स्यात्। नचैवं तस्मान्न तथेति घटोऽपि अस्पार्शनः स्यात्। किञ्च बहिर्द्रव्यप्रत्यक्षतामात्रं प्रति महत्वे सति उद्भूतस्पर्शवत्वमेव प्रयोजकं रूपाद्यवान्तरसहकारिविशेषमादाय अवान्तरचाक्षुषादिकार्यविशेष इति मीमांसकपूर्वपक्षविशेषः।

अत्रोच्यते– मीमांसकमनेकर्भतावत् प्रत्यक्षं 'चलती'ति बुध्या च तदनुमानं क्रियते इयं च बुद्धिः पूर्वदेश – उत्तरदेशविभाग – संयोगाभ्यां कार्या, तयोः अप्रत्यक्षत्वे एषापि अप्रत्यक्षैव। तथा च

प्रभामण्डलादौ चलति पक्षिकाण्डादौ पूर्वदेशविभाग – उत्तरदेशसंयोगयोः अप्रत्यक्षत्त्वेन 'चलती'ति धीः तल्लिङ्गकापि न स्यात्, पूर्वोत्तरदेशयोः प्रभामण्डलयोः अनुद्भूतस्पर्शवत्त्वेन अप्रत्यक्षत्त्वात्। उपाधेरपि प्रत्यक्षत्त्वप्रसङ्गाच्चेति संक्षेपः।

वायुसाधकं परिशेषमाह – 'तथा ही' त्यादि। तद् द्वैविध्य – माह – 'स चे'ति। कार्यस्योत्पत्तिविनाशवत्त्वात् तौ अवश्यं वक्तव्यौ अतस्तौ वक्तुं प्रतिजानीते – 'तत्रे'ति। द्वयणुकस्य महत्कार्यमात्रमूलत्त्वात् आदौ तदुत्पत्तिमेव कथयति – द्वयो'रिति। भावकार्यमात्रस्यकारणत्रयजन्यत्त्वनियमात् तदवश्यं वाच्यमिति तद्विविच्य कथयति – 'तस्ये'ति। तस्य द्वयणुकस्येत्यर्थः। त्र्यणुकोत्पत्तिमाह – 'तत' इति। ननु द्वयणुकादिगतगुणादयः कथमुत्पद्यन्ते इत्यत आह – 'कार्ये'ति। 'कारणे'ति समवायिकारणगुणा इत्यर्थः। ततः कार्यगुणान् प्रत्येव कारणगुणजनकत्त्वम् अन्तः (अतः) पार्थिवपरमाणुषु अग्निसंयोगादेव रूपाद्युत्पत्तिरिति भावः उत्पत्तिं कथयित्वा विनाशप्रकारमाह – 'इत्थमि'ति। समवायिकारणनाशेन द्रव्यनाशमाह – 'क्वचिदि'ति। तदेवोपपादयति – 'यथे'ति। कार्यस्य कर्तृजन्यत्त्वनियमात् अस्मदादीनां परमाणुक्रियां प्रति कर्तृत्वासंभवात् कर्त्रपेक्षामाह – 'महेश्वरस्ये'ति। कर्तृत्वं च इच्छादिघटितमित्याह – सञ्जिहीर्षा जायत इति।

यद्यपि ईश्वरेच्छा नित्या एकाचेति सर्वदा कार्योत्पत्तिः विनाश एव वा स्यात्। तथापि अस्मादादीष्टविशेषोपग्रहादेव चिकीर्षा–सञ्जिहीर्षात्योपाधिवैशिष्ट्यम् इत्येतादृशविशेषसहकृतत्त्वकदाचित्केनैव ईश्वरेच्छा, कदाचित् चिकीर्षा कदाचित् सञ्जिहीर्षा भवतीति नोक्तदोषः। 'यथे'ति। यथा असमवायिकारणनाशेन द्वयणुकनाशः तथा समवायिकारणतन्तुनाशात् अपि पटनाशः

उभयनाशस्यापि कार्यद्रव्यनाशप्रयोजकत्वादिति भावः।

ननु तद्गत-गुणादीनां कथं नाश इत्याह – 'तद्गतानामि'ति। गुणनाशे विरोधिगुणप्रादुर्भावोऽपि कारणमित्यत आह – 'अन्यत्रे'ति। नन्वेतत्परमाणुसत्त्वेऽपि स्यात् तत्रैव न किञ्चित्प्रमाणं पश्याम इति आशयेन आशङ्कते – 'किंपुनरि'ति। सर्वत्र प्रामाणिक एव पक्षः नाप्रामाणिक इति उभयवादिसिद्धं त्र्यणुकं पक्षीकरोति – 'यदिदमि'-ति। स्वापेक्षया अल्पपरिमाणद्रव्यसमवायिकारणमित्यर्थः। 'कार्ये'ति। द्रव्यत्वादित्युक्ते कालादौ व्यभिचारः स्यात् अतः कार्येति। एतावतापि न परमाणुसिद्धिः इत्यत आह – 'यस्त्वि'ति। द्व्यणुका-दिवत् नारब्ध इत्यर्थः। ननु साधकव्याप्तेः सत्त्वात् कथमना-रब्ध इत्युच्यते? इत्याशङ्कते – 'कार्ये'ति। दूषयति – 'अनन्वे'ति। तदेव स्पष्टीकरोति – 'तथा चे'ति। उपसंहरति 'तस्मादि'ति। द्व्य-णुकोत्पत्तिप्रकारमाह – 'द्व्यणुकं त्वि'ति। ननु एक एव परमाणुः न कथं द्व्यणुकसमवायिकारणम् इत्यत आह – 'एकस्ये'ति। असम-वायिकारणाभावे द्व्यणुकमेव नोत्पद्यते इति भावः। त्र्यादीत्यादि कल्पनायामपि द्वयोः अवश्यकल्पनेति द्वाभ्यामेव द्व्यणुकोत्पत्ति-सम्भवे किमर्थमतिरिक्तस्य आरम्भकता अङ्गीकर्तव्येति भावः। त्र्यणुकोत्पत्तिप्रकारमाह – 'त्र्यणुकं त्वि'ति। 'एकस्ये'ति। पूर्वोक्तयु-क्तेरिति भावः। द्वाभ्यामारम्भे बाधकमाह – 'तद्द्वाभ्यामि'ति। तदेव स्पष्टयति – 'कार्येपी'ति।

आकाशनिरूपणम्

क्रमप्राप्तमाकाशं लक्षयति – 'शब्दे'ति। साधारणगुणानाह – 'संख्ये'ति। एकव्यक्तिमात्रवृत्ति न सामान्यमिति, अतो नाकाशत्वं

सामान्यमिति ज्ञापयितुमुक्तम् 'एकमि'ति। तदधिकरणमाकाशमिति मतनिराकरणार्थम् उक्तं विभ्विति। विभुत्वादेव आत्म [1]वन्नित्यत्वं साध्यमिति[2] भावः। "आत्मन आकाशः सम्भूतः" इति श्रुतिबलात् आकाशः अनित्य इति वेदान्तिनो मन्यन्ते। तन्मतनिराकरणार्थमुक्तं नित्यमिति। धर्मिग्राहकप्रमाणेन नित्यत्वे सिद्धे 'आत्मनः सकाशात् आकाशप्रत्ययः सम्भूतः' इति श्रुतेः अर्थः कर्तव्य इति भावः।

ननु विभुत्वस्य आत्मकालदिगतिरिक्तवृत्तित्वे किं मानम्? न तावत् प्रत्यक्षम् अरूपिद्रव्यत्वात्, नाप्यनुमानं लिङ्गाभावादित्यत आह - 'शब्दे'ति। तदेवाक्षेपयति - 'शब्दे'ति। - उत्तरमाह - 'पारिशेष्यादि'ति।

परिशेषं वक्तुं प्रतिजानीते - 'तथा ही'ति। तावदिति वाक्यालङ्कारे, क्रमार्थे वा तावच्छब्दः, तथाच आदौ गुणत्वं साधयिष्यते इति भावः। ग्राह्यत्वात् इत्युक्ते परमाणौ व्यभिचारः स्यात् अत इन्द्रियेति। तावत्युक्ते घट एव व्यभिचारः स्यात् अत उक्तम् एकेति, मात्रपदमत्र बोध्यम्। अन्यथा उक्तदोषानतिवृत्तिः स्यात् तथापि आत्मनि व्यभिचारो भवेत् - अतो बाह्येति। तथापि योगजधर्मानुगृहीतेन चक्षुरादिना परमाणुरपि योगिना गृह्यते एवेति व्यभिचारः स्यादत उक्तम् अस्मदादीति। तावत्युक्ते नयनगतपित्तद्रव्ये व्यभिचारात् अतो स्पर्शवत्त्वे सतीति। तथापि रूपत्वादौ व्यभिचारः स्यात् अत उक्तं सत्यन्तम्। ततः किमित्यत आह 'गुण' इति। परिशेषप्रकारमाह - 'नचे'ति। विशेषगुणत्वादिति द्रव्यविभाजकोपाधिद्वयसमानाधिकरण्यरहितत्वे

1. क-ख - 'आत्मनित्यत्वं' इति पाठः।
2. ग - 'बोध्यय्' इति पाठः।

सति गुणत्वव्याप्यजातिमत्त्वमेव तत्त्वमित्याहुः, तत्तो बोध्यम्, निर्दुष्टलक्षणं च 'द्रव्योपायटिप्पण्याम्'। अनुसन्धेयम्। 'सर्वत्रे'ति। सर्वत्र कार्योपलम्भादिति भावः।

कालनिरूपणम्

क्रमप्राप्तं कालं लक्षयति – 'काल' इति। 'विपरेते'ति। आदित्यक्रियाबहुत्वाबहुत्वाभ्याम् उत्पद्यमानपरत्वापरत्वानुमेय इत्यर्थः। गुणनाह – 'संख्ये'ति। एकपदं पूर्ववद् व्याख्येयम्। 'षडिन्द्रियवेद्यः कालः' इति मतं निराकर्तु-माह 'नित्य' इति। नित्यद्रव्यस्य विभुत्वाच्च इन्द्रियाग्राह्यत्वनियमादिति भावः।

ननु भवेद्देवं मनोरथो[1] यदि कालसत्त्वे प्रमाणं भवेत्। नच प्रत्यक्षमेव प्रमाणं भविष्यतीति वाच्यम्। किं प्रत्यक्षं बाह्यमान्तरं वा? नाद्यः अरूपिद्रव्यत्वात्; नापरः आत्मभिन्नद्रव्यत्वात्। नाप्यनुमानं लिङ्गाभावात्। परत्वापरत्वकारणतया ([2]अनुमानं) भविष्यतीति चेन्न। सापि समवायिकारणता निमित्तकारणता वा? नाद्यः दिक्कालयोः पञ्चगुणा इति भाष्यविरोधात्। दिग्विपरीतपरत्वापरत्वयोः जन्यद्रव्यमात्रवृत्तित्वाच्च। न द्वितीयः गुणकर्मान्यत्वात् तयोरेव तत्त्वात्, नान्त्यः अ(न्य) दृष्टादिनैव अन्यथोपपत्तेः। नापि परत्वापरत्वासमवायिकारणसंयोगाश्रयतया तत् सिद्धिः आकाशस्यैव तथात्त्वादित्याशयेन आशङ्कते – 'कथमस्ये'ति।

सिद्धान्तं वक्तुं प्रतिजानीते – 'उच्यते' इति। परत्वासमवा-

---

1. क–ख – 'मनोरथो' इति नास्ति।
2. क–ख–ग – 'अनुमानं' इति पाठः लुप्तः।

यिकारणमाह – 'सन्निहित' इति। अपरत्वासमवायिकारणकथनाभिप्रायेणाह – '(अ) व्यवहित' इति। 'दिगादेरसम्भवादि'ति। अयं भावः आकाशस्य अन्यथासिद्धत्वेन असथात्वात्। कारणस्यैव समवायिकारणसंयोगाश्रयत्वात्। अपि च ज्येष्ठे भवान्तरतपनपरिस्पन्दविशिष्टबुद्धिः, सा च विशेष्ये विशेषणसम्बन्धं विना सम्भवति। तथा च परत्वाश्रयपिण्डतपनपरिस्पन्दयोः संयुक्तसंयुक्तसमवायात्मनि परस्परासम्बन्धेन तावत् पृथिव्यादिचतुष्टयं हेतुः। तपनपिण्डाभ्याम् असंस्पृष्टत्वात् दिगेव अस्तीति चेन्न। तस्याः नियतधर्मोपनायकत्वेनैव सिद्धिः। नाप्याकाशात्मानौ विशिष्टगुणत्वात् पृथिवीवत् नियतकार्यकारणतया तत्सिद्धेश्च। अत एवोक्तं लीलावत्याम्– "यदि च गगनमात्मा वा अन्यधर्मेण अन्यमवच्छिन्द्यात् तदा काश्मीरवर्तिना कुंकुमरागेण कर्णाटकचक्रवर्तिकरकमलमपि अवच्छिन्द्यात्" न च कालेऽपि एवं प्रसङ्गः तदसिद्धौ आश्रयासिद्धेः सिद्धौ वा नियतधर्मोपनायकत्वेन एतत् सिद्धेरिति।

न च दिवाकरकर एव कथं न हेतुरिति वाच्यम्। भूमितलनिरवात् पार्थिवेष्वपि तथा व्यवहारात्। ननु सचेदेक एव तर्हि कथं वर्तमानातीतभेदस्तु व्यवह्रियते इत्यत आह – 'सा चे'ति। क्रियावर्तमानत्वादिकमेव तत्र भासते नतु स्वाभाविकमिति भावः। तदेव दृष्टान्तमुखेन स्पष्टयति – 'तथाही'त्यादिना। 'पूर्ववदि'ति। सर्वत्र कार्योपलब्धेः विभुत्वं तत एव नित्यत्वमित्यर्थः।

दिङ् - निरूपणम्

क्रमप्राप्तां दिशं निरूपयति – 'दिगि'ति। दिक्त्वं न जातिरित्यत्र

हेतुरेकेति। नित्यत्वं च पूर्ववत्। द्रव्यत्वसिद्धये गुणानाह–'संख्ये'ति। तस्यां प्रमाणमाह– 'पूर्वादी'ति। सूर्योदयाचलसंनिहितो देशः, सा पूर्वा, सूर्यास्ताचलसंनहितो देशः, सा प्रतीची। संनिधानं च संयुक्तयोगाल्पीयस्त्वं, तद्व्यत्वं (तद्बहुत्वं) व्यवधानम्।

ननु संनिहिते असंनिहिते वा सूर्यसंयोगाविशेषात् कथं स्वस्वल्पत्वोक्त्या संनिधानपदाभिधानं स्यादिति चेन्न। यतः उदयाचलास्ताचलसंनिहितयोः पदार्थयोः मध्ये यावन्तो देशा वर्तन्ते तेच व्यवहितपदार्थमध्यपातिदेशापेक्षया स्वल्पा एव तैः स्वल्पैः सर्वैः संयोगः सूर्यस्यास्ति। नोदयाचलेन। नन्वा पिण्डे एकरीतिसूर्य एव देशसंयोगाल्पीयस्त्वं तदेव संनिधानं तच्च सूर्यसमवेतमपि उपनायकसामर्थ्यात् घटादावपि भासते तत्र सूर्यवर्तितत्तत्संयोगानां घटादौ उपनायकत्वं दिश एव। नन्वेवं काल एव कथं न स्यादित्यत आह – 'तेषामि'ति। तस्य क्रियामात्रोपनायकत्वेन सिद्धेः। नन्वसाधारणं घटादिरेव निमित्तं कथं न स्यात् इत्यत आह –'पूर्वस्मिन्नि'ति। अन्यथा पश्चिमदिगवस्थितस्य पूर्वदिगवस्थितत्वव्यवहारः स्यादिति भावः। तथाच एवं प्रयोगः – "दिगितरेभ्यो भिद्यते पूर्वादिप्रत्ययविषयसंयोगोपनायकत्वात्, यदेवं नतदेवं यथा पृथिवी"।।

ननु अनया रीत्या क्रियासंयोगोपनायकतया परत्वापरत्वसाधारणकारणतया वा दिक्कालसिद्धौ सर्वोत्पत्तिमतां मिमितकारणतासिद्धिः कथं सर्वोत्पत्तिमतां निमित्तकारणतासिद्धिः कथं स्यात् सर्वजनकत्वे अन्यथासिद्धत्वात्। ईश्वरदृष्टान्तावष्टम्भेन विभुत्वेन च हेतुना तत्साधने आकाशादौ एव व्यभिचारादिति चेन्न। एकतन्तुमात्रजन्यद्रव्यगुणकर्मातिरिक्तकार्याणि अजन्येन्द्रियग्राह्यविशेषगुणरहितसाधारणाधिकरणजन्यानि कार्यत्वात्, एकतन्तुमात्रजन्यद्रव्यगुणकर्मवदिति तावत्सिद्धौ प्रमाणं,

पक्षविशेषणं दृष्टान्तप्राप्त्यर्थम्, अन्यथा अनुपसंहारित्वापत्तेः। साध्ये च अजन्येति विशेषणं दृष्टान्तः साध्यविकलो माभूत् इत्येतदर्थम्। विशेषपदादाने बाध एव स्यात्, अतस्तदुपात्तम्। आत्मैकत्वप्रत्यक्षपक्षे एतत्। अन्यपक्षे विशेषगुणाभावत्वेन सिद्धिर्भवति इत्येतदर्थम्। साधारणद्रव्याधिकरणेत्यपि कारकसिद्ध्यर्थम्। नच शब्दसुखादौ व्यभिचारः। एवं भूताधारजन्यत्वेन तेषामपि पक्षत्वात्। विशेषगुणवदाधारजन्यत्वेन कथं तद्रक्षिता आधारजन्यता इति न च वाच्यम्; घटादौ असर्वज्ञकर्तृकत्ववदविरोधात्, अत एव इहात्मनि ज्ञानं इष्टं, क्रियायां चलनत्वम् इहान्धकारेभ्योऽतिरिङ्गण (?) इत्येवमादौ अभिन्नाधारत्वात् प्रतीतिरस्ति। न च कालेनार्थान्तरम् इहाकालसंयोग इति प्रतीतौ कालभिन्नाधारतायाः प्रतीयमानत्वात् न च अजसंयोगनङ्गीकारात् कथं दिशोऽवच्छेदकत्वम् इति वाच्यम्, समुदायवत्त्वरूपसम्बन्धेनोपपत्तेः, एवं द्रव्यं वर्तते, अभावो वर्तते, गुणाः वर्तन्ते इत्यादौ सर्वत्र अविशिष्टतया वर्तमानप्रत्ययविषयो यः स एव कालो निमित्ततया सिध्यति। अस्तित्वं वर्तमानत्वम् इति चेन्न।

तद्धि सत्ताजातिर्वा स्वरूपसत्ता वा? नाद्यः अभावेऽपि वर्तमानप्रत्ययात्, नान्त्यः विजातीयेषु अभिन्नवर्तमानत्वप्रत्ययानुपपत्तिप्रसङ्गात्। प्रामाणिकत्वं तदिति चेन्न। अतीतानागतेषु वर्तमानप्रत्ययापत्तेः अतो वर्तमानत्वं यदवच्छेदकं सएव कालः। ननु कालस्यातीन्द्रियत्वात् घटे वर्तमानत्वविशेषणं कथं प्रत्यक्षे अवभासते इति चेन्न ज्ञानान्तरोपनीतस्य प्रत्यक्षभाने विरोधाभावात्। अन्यथा परमाणुद्रव्यमिति मनः करणप्रत्ययो न स्यात्, न स्याच्च सुरभि चन्दनमिति चाक्षुषप्रतीतिः उपनायकानुमानम्, एवं तु अनाश्रितानि कार्याणि तत्वाश्रितकार्याधिकरणद्रव्यजन्यानि कार्यत्वात्

तन्तुरूपवत्। अत्र तत्वाश्रितं यत्कार्यं तन्तुरूपादिकं तस्याधिकरणद्रव्यं तन्तुरेव तज्जन्यत्वे बाधात् पक्षधर्मताबलात् य एव सिध्यति स एव काल इति।

आत्मनिरूपणम्[1]

द्रव्यनिरूपणप्रसङ्गेन क्रमप्राप्तमात्मानं निरूपयति – 'आत्मत्वे'ति। ग्रन्थविस्तरभयादाह – 'स चे'ति। गुणानाह – 'तस्ये'ति।

मनोनिरूपणम्

मनसो लक्षणमाह – 'मनस्त्व'ति। 'अण्व'ति। अणुपरिमाणयोगादित्यर्थः। 'संयोगी'ति। यतो अणु अत एवात्मना संयुक्तं सत् भानं जनयति। विभुत्वपक्षे असंयोगाङ्गीकारात् ज्ञानमेव नोत्पद्यते इति भावः। ननु किमेतदन्तरिन्द्रियापेक्षया अतिरिक्तमित्यत आह – 'मन' इति। मन एव अन्तरिन्द्रियं नातिरिक्तमित्यर्थः। लक्षणान्तरमाह – 'सुखे'ति। कारणतोक्तौ सुखाद्युपलब्धिं प्रति कारणे चक्षुरादावतिव्यापकमिति भावः। 'नित्यमि'ति। मूर्तत्वेऽपि पार्थिवादिपरमाणुवत् निरवयवत्वादित्यर्थः। द्रव्यत्वसिद्धये गुणानाह – 'संख्यादी'ति। संख्यापरिमाणपृथक्त्व संयोगविभागपरत्वादित्यर्थः। तत्संयोगं विना अन्येन्द्रियाणां नार्थग्राहकत्वमित्याह – 'तदि'ति। 'अत एवे'ति। प्रसिद्धिरिति शेषः। तत्र च न

---

1. पुनरपि आत्मनिरूणम्। यथोक्तं तर्कभाषायां "इह आत्यन्तमुपयुक्तानां स्वरूपभेदेन भूयः प्रतिपादनम। यदनतिप्रयोजनं तदलक्षण मदोषाय"।

प्रत्यक्षं प्रमाणमित्याह – 'तच्चे'ति। आत्मभिन्नरूपिद्रव्यत्वादिति भावः। प्रत्यक्षाभावेऽपि अनुमानं प्रमाणमस्त्येव इत्याह – 'अपि-त्वि'ति। 'सुखादी'ति। दण्डादिकरणसाध्यत्वस्य पक्षे बाधात् यदेव पक्षधर्मताबलात् सिध्यति तदेव मन इत्यर्थः।

ननु न कथं मनो विभु? तथाहि "मनो विभु अस्पर्शद्र-व्यत्वात्, नित्येन्द्रियत्वात् प्रागभावप्रतियोगित्वेसति द्रव्यसमवा-यिकारणभिन्नद्रव्यत्वात् न च शरीरे मानावच्छेदेन (नानावच्छे-देन) दहनशीतलादिसम्बन्धेन एकदा व्युत्पत्तिप्रसङ्ग इति वाच्य-म्। एकदा नानानिमित्तोपनिपाते यौगपद्यस्य इष्टत्वात्। अत एव श्रोत्रे कर्णशष्कुल्यवच्छेदेन नानानिमित्तात् अनेकशब्दोत्पत्ति-रपि दृश्यते। अन्यथा ह्लदयाः कौलामाल्ः[1] (अयं कोलाहलः) इति प्रत्ययो न स्यात्। अत एव मनसो विभुत्वे शरीरावच्छेदे-नैव सुखोपलब्धिः स्यात् इति निरस्तम्। अथ संयोगाङ्गीकारेण असमवायिकारणस्य अधिकदेशवृत्तित्वेऽपि निमित्तसमवधानस्यैव तन्त्रत्वेन अन्यस्य अप्रयोजकत्वात्। अन्यथा अणुपक्षेऽपि सुखादिकं शरीरव्यापकत्वेन नानुभूयेत, अत एव आभिमानिकमानोरथिक-सुखेषु दुःखद्वेषेषु[2] च न देशनियम इति प्रत्यवस्थितभाट्टनिराक-रणभिप्रायेण उपसंहरति – 'तच्चे'ति।

इदमत्र आकूतं व्यासङ्गदशायां स्वस्वसम्बन्धेष्वपि इन्द्रि-येषु एकस्मादेव ज्ञानं नान्यस्मादित्यनुभवसिद्धम्। तथा च रासन-ज्ञानवतीनि मैत्रस्य स्वस्वविषयसम्बन्धानि रसनातिरिक्तेन्द्रियाणि स्वस्वविषयसाक्षात्कारहेतुसंयोगशून्यानि तदानीं स्वस्वविषयसा-क्षात्कारजनकत्त्वात् इन्द्रियासंयुक्तपटवत्। अन्यथा सकलहेतुसा-

1. ग – 'भट्टे भट्टोऽयं कोलाहलः इति पाठः।
2. क – 'ज्ञानद्वेषिषु' इति पाठः।

कल्ये[1] सर्वेन्द्रियैः युगपत् ज्ञानमुत्पद्येत । न च अदृष्टविलम्बात् विलम्बः, दृष्टसकलहेतुसाकल्ये अदृष्टविलम्बेन विलम्बाभावात्। तस्य दृष्टसकलहेतुसम्पादनद्वारेणैव कारणतावधारणात् । अन्यथा एकेन्द्रिये परिशेषापत्तिः स्यात् । न च बुभुत्सावशात् क्रमो दृश्यते, नचापि नृत्यदर्शनावसरे बुभुत्सावशात् अभिमतविषयकमेव ज्ञानमिति वाच्यम्। तस्याः स्वविषयक ज्ञानहेतुत्वात्, अन्यथा बुभुत्सिते ज्ञानानुदयप्रसङ्गः स्यात् ।

ननु अन्यज्ञानप्रतिबन्धिकैव कुतो न स्यादिति चेन्न। घटबुभुत्सायां पटज्ञानोदयत्वात् । न चैवं सति बुभुत्सायाः उपयोग एव न स्यादिति वाच्यम्। तस्याः क्रियाहेतुमनोहेतुप्रयत्नद्वारा इन्द्रियान्तरादाकृष्य अभिमते मनो निवेशयन्त्याः बुभुत्सितग्रहहेतुत्वम्, अन्यग्रहप्रतिबन्धकत्वं च ततो न तु साक्षात् । अत एव बुभुत्सात्वेऽपि मनोगोचरप्रयत्नाभावे तस्याः अकिञ्चित्करत्वम् ।

वस्तुतस्तु विशेषाभावात् तामिव चरममपि ज्ञानं जनयेत् अविशेषात् । न च एकमपीत्यनेकज्ञानोत्पत्तिः ज्ञानमात्रानुत्पत्तिर्वा । नैकविषयज्ञानोत्पत्तिरिति अनुमानानाम् अनुकूलतर्काभावात् अप्रयोजकत्वमिति बाधकमङ्गीकर्तव्यमिति । तथा च युगपत् सुखदुःखानुभवः क्रमेणैवानुभूयते इति अङ्गीकर्तव्यम् ।

"एकदा शतपत्रपत्रशतं भिन्नम्" इत्यादाविव न काले साक्षाद्विविच्च भेदो गृह्यते। अत एव पञ्चावधानस्यैव सर्वेषां युगपद्ज्ञानं भवेदिति निरस्तम्। तत्रापि क्रमानुमानात् ।

ननु एतावता मनसो मूर्तत्वमायातम्, तच्च अवयवित्वेऽपि सम्भवति अतः कथं परमाणुत्वं सिद्धमिति चेन्न। अप (उक्त) युक्तिभिः अपरममहत्त्वे सिद्धे तज्जन्यानुपलब्धेः अनवयवत्वे सति

1. क-ख - 'हेतु' इति नास्ति ।

अवयवजन्यतायां प्रमाणाभावात् परमाणुत्व एव पर्यवसानात् इत्यास्तां विस्तर इति मनोऽणुत्ववादः। श्रीः।

गुणनिरूपणम्

द्रव्यपदार्थं निरूप्य गुणपदार्थं निरूपयिष्यन् वृत्तवर्तिष्यमाणयोः सङ्गतिं कथयति – 'द्रव्याणी'ति। गुणसामान्यलक्षणमाह – 'सामान्ये'ति। आद्यपदं सामान्यादित्रिकातिव्याप्तिवारणाय, द्रव्यकर्मणोः अतिव्याप्तिवारकं चापरपदम्।

ननु असमवायिकारणत्वं सामान्यादेः सर्वदा न संभवतीति तत एव तद्व्यवच्छेदे सामान्येतिपदं व्यर्थमिति चेन्न। लाघवेन असमवायिकारणपदस्य समवायिकारणभिन्नः इत्यस्यैवार्थस्य विवक्षितत्वात्। गुणत्वजातिरपि लक्षणं बोध्यम्। गुणस्य धर्मत्वात् धर्म्यपेक्षायामाह – 'सचे'ति। तं विभजते – 'रूपे'ति। रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगाः मूर्तगुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दास्तु अमूर्तगुणाः, संख्यापरिमाणपृथक्त्वं संयोगविभागाः उभयगुणाः। संयोगविभागद्वित्वद्विपृथक्त्वादयो अनेकाश्रिताः। शेषास्तु एकैकद्रव्यवृत्तयः, रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म – भावनाशब्दाः विशेषगुणाः, संख्यापरिमाणपृथक्त्वसंयोगविभाग – परत्वापरत्वनैमित्तिकद्रवत्वगुरुत्ववेगाः सामान्यगुणाः शब्दस्पर्शरूपरसगन्धाः बाह्येन्द्रियमात्रग्राह्याः। संख्यापरिमाणपृथक्त्वसंयोगविभाग परत्वापरत्वद्रवत्वस्नेहवेगाः द्वीन्द्रियग्राह्याः। बुद्धिसुखदुखेच्छाद्वेषप्रयत्नास्तु अन्तःकारणग्राह्याः। गुरुत्वनवत्वधर्माधर्मभावनाः ह्यतीन्द्रियाः। अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वपृ-

थक्त्वगुरूत्वद्रवत्वस्नेहवेगाः करणपूर्वकाः। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न धर्माधर्मभावनाशब्दतूलपरिमाणोत्तरसंयोगनैमित्तिकद्रववत्वपरत्वापरत्पाकजाः संयोगजाः, संयोगविभागवेगाः कर्मजाः। शब्दोत्तरविभागविभागज परत्वापरत्वद्वित्वपृथक्त्वादयो बुध्यपेक्षाः । रूपरसगन्धस्पर्शशब्दपरिमाणैकत्व एकपृथक्त्वस्नेहाः समानजातीयारम्भकाः। सुखदुःखेच्छाद्वेषप्रयत्नास्तु असमानजातीयरम्भकाः संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञान धर्माधर्मसंस्काराः समानासमानजातीयारम्भकाः। बुद्धिसुखदु.खेच्छाद्वेषभावनाशब्दाश्च स्वाश्रयसमवेतारम्भकाः। रूपरसगन्धस्पर्श परिमाणस्नेहप्रयत्नाः परत्रारम्भकाः। संयोगविभागसंख्यैकपृथक्त्व गुरूत्वद्रवत्ववेगधर्माधर्मास्तु उभयत्रारम्भकाः। गुरुत्वद्रवत्ववेगप्रयत्न धर्माधर्मसंयोगविभागशेषाः क्रियाहेतवः। रूपरसगन्धानुष्णस्पर्शसंख्यापरिमाणैकत्व एकपृथक्त्वस्नेहशब्दानाम् असमवायिकारणत्म्। बुद्धिसुखदुःखच्छाद्वेषप्रत्यत्नधर्मभाननानां निमित्तत्वम्। संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानाम् उभयथा कारणत्वम्। परत्वापरत्वद्वित्वपृथक्त्वादीनाम् अकारणत्वम् । योसं-गविभागशब्दआत्मविशेषगुणानां प्रादेशिकत्वं, शेषाणामाश्रयव्यापित्वम्। अपाकजरूपरसगन्धस्पर्श परिमाणैकत्वैकपृथक्त्वगुरुत्वसांसिद्धिकद्रवत्वस्नेहानां यावद्द्रव्यविभावित्वम् इति शिष्यबुद्धिवैशद्याय संक्षेपतो गुणभाष्यमेव लिखितम्। विस्तरभयात् च आक्षेपसमाधाने नोक्ते इति बोध्यम्। अस्य विशेषतो विचारो 'गुणकिरणावलीटीकायाम्' अनुसान्धेयः सूरिणा।

तत्र प्रथममुद्दिष्टस्य रूपस्य लक्षणमाह- 'तत्रे'ति। चक्षुर्मात्रग्राह्यो जातिविशेषो यस्येति बहुव्रीह्यनन्तरं कर्मधारयो विधेयः मात्रपदाभावेगुणत्वमादाय अतिप्रसङ्गः स्यात्, अतः तदुपात्तम्।

विवक्षितविवेकेन रूपत्वमेवोक्तं भवति। तथाच तदेवोपलक्षणम् उक्तं भवति। चक्षुर्मात्रग्राह्यो विशेषगुणो रूपमिति पाठे विशेषपदं संयोगातिव्याप्ति वारकं, ग्रहणं च लौकिकसाक्षात्काररूपं बोध्यम्। आश्रयमाह–'पृथिव्यादी'ति। तदवान्तरभेदमाह – 'तदि'ति। पृथिवीरूपस्य विशेषमाह – 'पाकजं चे'ति तेजोरूपमाह– 'शुक्लमि'ति। भास्वरत्वं नाम शुक्लत्वावान्तरजातिविशेषः परप्रकाशकत्वव्यंग्यः।

ननु एतदसङ्गतं, सुवर्णरूपस्य अतथात्वात्। न च उपष्टम्भकपार्थिवरूपेणाभिभवात् न तथेति वाच्यम्। अन्यरूपस्य तेजोरूपाभिभावकत्वा भावत्। अन्यथा आलोकेति। घटादिरूपेण तद्रूपाभिभवे तस्यापि भास्वरत्वं न स्यात्।

यत्तु सुवर्णरूपमनुद्भूतम् अतो न भास्वरमिति, तन्न। तथासति तद्ग्रहणमेव न स्यात्। [1]महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वमेवास्य प्रत्यक्षतायां प्रयोजकमित्युक्तत्त्वात्। अत एव चक्षुः इन्द्रियम्। किञ्च वह्नेः अरुणनीलादिरूपोपलब्धेः। न शुक्लमेव रूपं तेजस्वीति। न च इन्धनाद्युपाधिवशात् तथेति वाच्यम्। तदग्रहेऽपि दीर्घज्वालायां लौहित्यादिप्रतीतेः। दिग्दाहादौ च उपाधिसम्भावनाभावाच्चेति।

अत्रोच्यते – अन्यतेजोरूपस्य पार्थिवरूपानभिभाव्यत्वेऽपि अत्यन्ताग्निसंयोगेनापि अनुच्छिन्नद्रवत्वादिकरणस्य तेजसः फलबलेन रूपाभिभवः कल्प्यते। अत्र एवोक्तं किरणावल्याम्–

> "आरोपे सति निमित्तानुसरणं न तु
> निमित्तमस्तीति आरोपः"।

यच्चोक्तं वह्निरूपेण शुक्लत्वमिति तदपि न तेजस्त्वं शुक्ले-

1. क – 'समाधिकरण' इति पाठः।

तररूपवदवृत्ति तेजस्संयोगाजन्यरूपवन्निरवयववृत्तिद्रव्यत्वभिन्नद्रव्यत्वव्याप्यजातित्वात् जलत्ववत् इत्यनुमानेन तेजसः शुक्लेतररूपाभाववत्त्वे सिद्धे फलबलात् अत्रापि कश्चिद्रूपाभिभावकः उपाधिः कल्प्यते।

जलरूपमाह– 'तदेवे'ति। नन्वेतत् जलस्य अन्यतो व्यावर्तकमिति अभिप्रायेण उच्यते, आहोस्वित् साधारणतया वा? नान्त्यः 'अभास्वरस्य' इत्येतस्य विशेषणस्य वैयर्थ्यापत्तेः। रूपमस्तीत्येव ब्रूयात्, नाद्यः स्फटिकादौ अतिव्याप्तेः इति चेन्न। अभास्वरापाकजशुक्लरूपभिन्नरूपसमानाधिकरणद्रवत्वव्याप्यजात्यनधिकरणत्वे सति रूपवत्त्वस्य विवक्षितत्वात् ।। श्रीः।।

रसं लक्षयति– 'रस' इति। गुणपदं रसत्वादि जात्यतिव्याप्तिवारणाय आश्रयमाह– 'पृथिवी'ति। पृथिवीरसस्य विशेषमाह– 'तत्रे'ति।

ननु कथं रसस्य पृथिव्यामितरभेदसाधकत्वं, रसमात्रस्य अतिव्यापकत्वात्। आम्लादिविशेषितस्य च अव्यापकत्वादिति चेन्न। आम्लरससमानाधिकरणद्रव्यत्वव्याप्यजातिसमानाधिकरणरसवत्वस्य विवक्षितत्वात्।

जलवृत्तिरसमाह– 'अप्सु' इति। ननु एतदपि असाधारणधर्मतात्पर्यकमेवाभिधानं तथा सति शर्करायामतिव्याप्तमिति चेन्न। मधुररसेतररससमानाधिकरणद्रव्यत्वव्याप्य जात्यनधिकरणत्वे सति रसवत्वस्य विवक्षितत्वात्। श्रीः।

गन्धलक्षणमाह– 'गन्ध' इति। तदवान्तरभेदमाह– 'सुरभी'ति। ननु कथमयं पृथिव्यामसाधारणः जलादावपि प्रतीयमानत्वात् इत्यत आह– 'जलादावि'ति।

ननु कथमयं पृथिव्या इतरभेदसाधकः, सुरभ्यसुरभ्यवयवा-रब्धे अवयविनि सुरभिर्वा स्यात्, असुरभिर्वा चित्रगन्धो वा? नाद्यौ विनिगमकाभावेन परस्परविरोधस्य दुष्परिहरत्वात्, नान्त्यः गुणविरोधित्त्वेन आरम्भकस्यैव अभावात्। तथा च तादृशो यदि निर्गन्ध एव अङ्गीकर्तव्यः। न च एवं सति विरुद्धगन्धवदवय-वारब्ध द्व्यणुकादिपरं परारब्धे स्थूलावयविनि सर्वदा गन्धप्रतीतिर्न स्यादिति वाच्यम्। इष्टापत्तेः। अत एव इन्द्रनीलादौ न गन्धप्रतीतिरिति। भागासिद्धो गन्धो नेतरभेदसाधक इति चेन्न। सुरभिसमानाधिकरण द्रव्यत्त्व साक्षाद् व्याप्य जात्यधिकरणत्त्व-स्य इतरभेदसाधकस्य विवक्षितत्त्वात्॥ श्रीरस्तु॥

स्पर्शलक्षणमाह – 'स्पर्श' इति। आश्रयमाह – 'पृथिव्यादी'ति। तदवान्तरभेदमाह – 'स चे'ति। त्रैविध्यमाह – 'तत्रे'ति। तत्र तावत् आश्रयविशेषमाह – 'शीत' इति।

ननु एतच्छीखण्डक्षोदे अतिव्यापकं, न चायं सघर्षकजलस्य (घर्षकजलस्य) वायोर्वेति वाच्यम्। पूर्वं तत्र तथा अनुपलम्भात्। न च वाच्यं वायुना श्रीखण्डसम्बन्धेन श्रीखण्डस्य एव नैसर्गिको व्यज्यते इति। वैपरीत्यस्यापि वक्तुं शक्यत्त्वादिति चेन्न। श्रीखण्डक्षोदेन घर्षकजलस्यैव प्रकृष्टं शैत्यम् अभिव्यज्यते। यद्वा श्रीखण्डान्तर्वर्तिजलस्यैव घर्षणात् बहिर्भूतः शैत्यातिशय उपलभ्यते। अदृष्टश्रीखण्डस्पर्श विजातीयस्पर्शानुभवात् द्रव्यान्तरात् पृथिव्यां शैत्योत्पादकस्य अन्यत्र क्वापि अदर्शनात्। 'उष्ण' इति। प्रभाया अपि भास्वरत्त्वेन तेजस्त्वसिध्यौ तेनैव उष्णस्पर्शोऽनुमातव्यः। सोऽपि प्रत्यक्षेण अनुपलम्भात् अतीन्द्रिय एव कल्प्यते, तेजोमात्रव्यापकसाधारणोष्णस्पर्शः सिध्यतीति भावः। 'अनुष्णे'ति। पाकजत्त्वेन विशेषितो वने विपरीतवायोरित्यर्थः।

ननु पृथिवीस्पर्शस्य पाकजत्वे न किञ्चित्प्रमाणं, नहि यथा पार्थिवरूपरसगन्धाः पाकेन पूर्वापेक्षया विलक्षणतया प्रतीयन्ते, तद्वत्प्रकृते पाकानन्तरं वैलक्षण्यम् अस्ति प्रतीतिरस्ति। न च पार्थिवगुणत्वेन रूपादिदृष्टान्तोपष्टम्भेन तदनुमानं स्यादिति वाच्यम्। तस्य संख्यादावेव व्यभिचारात्। न च सर्वकीटकण्टकादीनां स्पर्शे सति दुःखविशेषो जायते। न च स्पर्शस्य साधारण्येनोपपद्यते। अतः पाकजोऽङ्गीकर्तव्य इत्यपि समीचीनम्। संयोगविशेषेणैव अन्यथासिद्धेरिति चेन्न। अस्ति हि त्वगिन्द्रियेण परामर्शेषु (परामृष्टेषु) फलवत्ता (पत्ता) दिषु तेजस्संयोगानन्तरं सुकुमार कठिनतरतमादिधीः सर्वलोकप्रसिद्धा, तस्याश्च न निबिडशिथिलसंयोगौ, विषयौ तयोः द्वीन्द्रियग्राह्यतया चक्षुषापि तद्ग्रहणानुपपत्तेः। ओमिति चेन्न। चक्षुषा तद्ग्रहेऽपि संशयस्य अनुभूयमानत्वात्। प्रयोगोऽपि पृथिवीस्पर्शः पाकजः पृथिवीविशेषगुणत्वात् गन्धवत्। न च विशेषगुणत्वे पाकजत्वं, तेन च विशेषगुणत्वम् इति अन्योन्याश्रयः। परस्परं प्रति परस्परस्य अप्रयोजकत्वात् अन्यथा जलादौ विशेषगुणो न स्यात् रूपादीनां चतुर्णां प्रत्यक्षप्रयोजकमाह–'एते' इति।

ननु कठिनसुकुमारतदवयवारब्धावयवी किं कठिनस्पर्शवान् आहोस्वित् सुकुमारस्पर्शवान् स्यात् चित्रस्पर्शवान् वा अस्पर्शवान् वा? नाद्यौ परस्पर कलहस्य दुष्परिहरत्वात्, न तृतीयः गुणविरोधेनारम्भकानुपपत्तेः। चित्रे प्रमाणाभावाच्च। अन्यथा चित्रगन्धचित्ररसयोः अपि आपत्तेः। न चतुर्थः स्पार्शनप्रत्यक्षत्वाभावप्रसङ्गात्। त्वगिन्द्रियस्थस्पर्शग्रहपुरस्कारेणैव तस्य ग्रहणम्। अन्यस्पर्शस्य अन्यत्राध्यक्षतायाम् अप्रयोजकत्वात्, अन्यथा- अतिप्रसङ्गात्। न च स्पर्शवत्समवेतत्वमेव स्पार्शनप्रत्यक्षायां प्रयोजकं, तथा च अवयवस्पर्शस्य अवयविप्रत्यक्षतायां प्रयोजकत्वमित्यङ्गीक्रियमाणे

नातिप्रसङ्ग इति वाच्यम्, लाघवेन महत्त्वसमानाधिकरण-उद्भूत स्पर्शवत्त्वस्यैव प्रयोजकत्वात्। न च तथा सति चित्रस्पर्शस्य अधिकस्य सिद्ध्या गौरवमेव कथं न स्यादिति वाच्यम्। लाघवेन स्पर्शवत्त्वस्य अवच्छेदकत्वसिद्धौ तदुत्तरकाले चित्रस्पर्शसिद्धिरिति फलमुखगौरवत्वेन अदोषत्वात्। अन्यथा नीलपीतत्वादि विरुद्ध-रूपवत् अवयवारब्धावयविनि चित्ररूपं न सिध्येत्।

ननु चित्रगन्धादौ का वार्ता? कुशलैव। घ्राणसमये द्रव्याग्राहकत्वेन तस्य द्रव्यस्य निर्गन्धत्वे नीरसत्वे न किञ्चिदपचितमिति दिक्।

अथेदम् इदानीं विचार्यते। रूपादिपाकजत्वं परमाणावेव आहोस्वित् अवयविनि। तथाहि – वह्निनिक्षिप्तादीनां घटादीनां पूर्वरूपविजातीयरूपमुपलभ्यते। तत्र पाकस्यैव अन्वयव्यतिरेकाभ्यां कारणत्वम्। पाकश्च तेजस्संयोग एव। तथा सति पार्थिवरूपरस-गन्धस्पर्शादीनां पाकजत्वं सिद्धम्।

अत्र वैशेषिकाः तेजस्संयोगे सति नोदनात् अभिभूताद्वा घटादिद्व्यणुकपर्यन्तावयवि समवायिकारणेषु कर्म जायते। तेन तत्तदारम्भकसंयोगनाशे सति द्व्यणुकपर्यन्तावयविनाशे परमाणव एव पच्यन्ते। तदनन्तरं भोजकादृष्टवशात् पुनः द्व्यणुकादिक्रमेण घटोत्पत्तिः, कारणगुणक्रमेण च रूपाद्युत्पत्तिः, कालसौक्ष्म्येन विलम्बाननुभवः। 'एकदा शतपत्रशतं भिन्नमि'त्यादिवदिति पीलु-पाक एवेति।

तन्न युक्तिसहम्। घटादेरविनाशेऽपि तेजस्संयोगादिना रूपादेरेवनाशस्वीकारे दोषाभावात्। नाभ्यन्तरवर्तिभागे तेजोगमनासम्भवेन तत्र पूर्वरूपविजातीयरूपाद्युपलब्धेः अकामेनापि पीलादेव

(पीलावेव) पाकोऽङ्गीकर्तव्य एवेति वाच्यम्। घटाभ्यन्तरवर्ति-घृततैलादिश्रवणदर्शनेन अवयविमात्रस्य सच्छिद्रत्वात्। अत एव सच्छिद्राण्येव अवयविद्रव्याणीति सुप्रसिद्धम्। तथापि अत्यन्तमहत्तराभ्यन्तरवर्तिभागे कथं पाक इति सुहृद्भावेन पृच्छत (पृच्छ्यते) इति चेन्न। अन्तः स्थितानन्ततण्डुलानां भस्मीभावात्[1] कल्प्यते (कल्पिता) तेजोगतिः न केनापि प्रतिरोद्धुं शक्यते इति। एवं च सति पाकोत्तरिते घटे स एवायं घट इति प्रत्यभिज्ञा स्यात्। न च सूत्र्यपनीतत्र्यणुके यथा प्रत्यभिज्ञा तथा प्रकृतेऽपि स्यादिति वाच्यम्। तत्र समवायिकारणनाशेन परिमाणनाशेन, परिमाणनाशस्य च द्रव्यनाशैकसाध्यत्वेन घटादिनाशस्य उभयमते समाधेयत्वात्। तस्मात् पिठरेऽवयविनि पाक इति। स एव असमवायिकारणमिति समीचीनः पक्ष इति पिठरपाकसिद्धिः।

संख्यालक्षणमाह – 'एकादी'ति। व्यवह्रियते हानोपानादिकं क्रियते येन स व्यवहारः। एकत्वादिप्रकारकमेकं द्वि (द्वे) त्रीण्यादि (त्रीणीत्यादि) प्रकारज्ञानं तस्य विषयतया यो हेतुः सा संख्येत्यर्थः। तथा च प्रत्यक्षमेव प्रमाणमुपन्यस्तं भवति। तथाहि–नहि एकादिज्ञानं निर्विषयम् 'अहं[2] मौनी' इत्यादिवत् व्याघातात्। नापि घटत्वनिबन्धनं पटेऽपि तथा व्यवहारात्। तथा च एकादिप्रत्यक्षासाधारणविषयो गुणः सा संख्येति लक्षणं वेदितव्यम्।

यद्वा व्यवह्रियते अनेनेति व्यवहारः शब्द एवोच्यते। तथा च एकादिपदप्रवृत्तिनिमित्तं संख्येति लक्षणं बोध्यम्।

यद्वा एकमात्रवृत्तिवृत्तित्वे सति पृथक्त्वान्यानेकवृत्तिगुणत्व-

---

1. ग – 'भस्मीकारात्' इति पाठः।
2. क-ख – 'अपां योनी' इति पाठः।

व्याप्य जातिमत्त्वम्, व्याप्यजयवृत्तित्वे सति अव्याप्यजयवृत्तिवृत्तिपृ-थक्त्वत्वान्यगुणत्वव्याप्यजातिमत्त्वं संख्यात्वमेव वा लक्षणं बोध्यम्।

अनुमानं चापि प्रमाणमत्र। तथाहि- सोऽयं घटादावेकप्रत्ययः, घटघटत्वाद्यतिरिक्तविषयः तत्प्रत्ययनिमित्तव्यतिरेकेणापि घटादौ जायमानत्वात्। वस्त्रचर्मकम्बलेषु नीलप्रत्ययवदेतेन स्वरूपाभेदः एकत्वं स्वरूपभेदस्तु द्वित्वमिति प्रत्यवस्थितो [1]भूषणकारो निराकृतः।

स्वरूपाभेदो हि घट एव। तथा च एकमिति साधारणप्र-त्ययो विजातीयेषु घटादिषु न स्यात्। अतिरिक्तैकत्वाङ्गीकारे तु एकत्व तथा अनुगतीकृतैकत्वेनोपपद्यते। एवं स्वरूपभेद एव यदि द्वित्वं तदा त्र्यादिषु द्वित्वप्रत्ययः स्यात्। तदा घटमानये-त्युक्ते घटत्वादाधिवकिमेकम् अनेकं वेति न सन्दिह्येत। एकमानय इत्युक्ते घटं पटं वेति परावृत्य न पृच्छेत्।

ननु संख्या पदार्थान्तरमेव। तथाहि- न तावद्द्रव्यं गुणवृ-त्तित्वात्, अत एव न गुणकर्मणी। न च चतुर्विंशतिगुणाः पञ्च. कर्माणीति प्रतीतेः भ्रमत्वात् स्वरूपासिद्धो हेतुरिति वाच्यम्। बाधकाभावेन भ्रमत्वस्यैव वक्तुमशक्यत्वात्, अन्यथा अतिप्रस-ङ्गात्। नापि सामान्यादित्रयान्यतमेष्वपि (त्रयान्यतमम्, तेष्वपि) प्रतीयमानत्वात्। नाप्यभावः, विधिमुखप्रत्ययवेद्यत्वात् इति प्रत्य-वस्थितः अनन्तपदार्थवादिप्राभाकरः इत्थं निरसनीयः।

द्वित्वादिकम् अपेक्षाबुद्धिजन्यं ध्वंसप्रागभावप्रतियोगित्वे सति आत्ममात्रवृत्तिगुणान्यत्वे सति नियमेनैकप्रतिपत्तेः वेद्यत्वात् द्विपृ-

---

1, न्यायसारः – भासर्वज्ञकृतः,
न्यायसारव्याख्या – भासर्वज्ञकृतम्,
अतोऽत्र भूषणकारः भासर्वज्ञः।

थकत्ववदिति आद्यसत्यन्तेन ज्ञानप्रागभावादिना न व्यभिचारः। द्वितीयसत्यन्तेन सुखादिना न व्यभिचारः। नियमेनेति विशेषणात् न घटादिना व्यभिचारः। आत्ममात्रवृत्ति भिन्नमेव द्वित्वं पक्षो बोध्यः। अतो न भागासिद्धिः। न च द्वित्वादिकं नित्यमेव, अपेक्षाबुद्ध्या परं व्यज्यत इति वाच्यम्। द्वित्वव्यञ्जकापेक्षाबुद्ध्या त्रित्वादिकमपि व्यज्येत। किञ्च द्वित्वं यदि अपेक्षाबुद्धिजन्यं न स्यात् रूपवत्पुरुषान्तर विज्ञानविषयो न स्यात् किन्तु पुरुषान्तरेणापि प्रतीयेत बुद्धिजन्यत्वे तु यद्यपेक्षाबुध्युत्पद्यते (यदीयापेक्षाबुद्धया उत्पद्यते) तेनैवोपलभ्यते इति नियमः स्थिरो भवति। एवञ्च [1]संख्यागुणः अपेक्षा बुद्धिजन्यत्वात् द्विपृथक्त्वादिवत् इति।

ननु एकत्वं सत्तावज्जातिरस्तु बाधकं विना एकमिति अनुगतमतेः जातिविषयत्वात्। गुणविषयत्वे परम्परासम्बन्धेन एकत्ववृत्तिजातिः, तन्निमित्तं वाच्यम्। तद्वरं जातिविषयैव लाघवात्। न च सत्तायाः समव्यन्यूनानतिरिक्तविषयकत्वं जाति बाधकम् एकत्वमेव जातिः सत्ते व गुणः इति इत्यस्य वैपरीत्यस्य ब्रह्मणापि वारयितुमशक्यत्वात्। न च द्वित्वासमवायिकारणतया गुणत्वसिद्धः तस्या एकपृथक्त्वेनापि अन्यथासिद्धत्वात् इति चेन्न। एकत्वान्यगुणविषयकशाब्दैकप्रत्ययः गुणविषयकः एकप्रत्ययत्वात् प्रत्यक्षैक प्रत्ययवत्, एतस्य स्वरूपादिविषयकप्रत्ययत्वाच्च शाब्दस्य तदविषयकप्रत्ययत्वात् पक्षधर्मताबलादेकत्वे गुणत्वं सिद्ध्यति।

यद्वा द्वित्वम् एकमात्रवृत्तिगुणत्वव्याप्यजातिमत्, अपेक्षाबुद्धिजन्यत्वात् द्विपृथक्त्वत्ववत्। न च अप्रयोजकत्वम् एकत्वस्य जातित्वे द्वयमेकं तत्सदितिवत् द्वयमेतदेकमिति प्रत्ययापत्तेरिति।

---

1. ग – 'संख्यादिगुणः' इति पाठः।

सा च पुनः एकद्रव्या च अनेकद्रव्या च इति अभिप्रायेणाह – 'एकत्वे'ति। एकत्वरूपा आद्या द्वित्वादिपरार्धपर्यन्ता तु अपरेत्यर्थः। तत्राद्या द्विधेत्यभिप्रायेणाह – 'तत्रे'ति। किं नित्यं किमनित्यम् इत्यत आह – 'नित्ये'ति। कार्यरूपस्य कारणमाह – 'स्वाश्रये'ति। एकत्वापेक्षया द्वित्वस्य विशेषमाह – 'द्वित्वमि'ति। कारणान्याह – 'तच्चे'ति।

ननु एकत्ववत् द्वित्वादिकमपि कारणगुणेभ्य एव जायते अपेक्षाबुद्ध्या परं व्यज्यते एवेति किं न स्यादिति चेन्न। द्व्यणुकादौ हि कारणगुणेनोत्पद्यमानं द्वित्वादिकम् एकत्ववदेकद्रव्यं प्रसज्येत। द्वाभ्यामवयवाभ्याम् आरब्धे द्रव्ये त्रित्वादिकं च नोत्पद्यते कारणाभावात्। न च यथा कारणाकारणसंनियोगात् संयोगोत्पत्तिः तथा [1]कारणाकारणगतैकत्वेभ्यः एषामुत्पत्तेः [2]अविरोध इति वाच्यम्। तद्वदैवेतेषां कारणमनाधारः स्यात्। तथा च कारणपरमाणुभ्यां द्व्यणुकस्य त्रित्वव्यवहारो न स्यात्। अपि च नित्यद्रव्येषु उत्पाद्यमानं द्वित्वादिकं न नित्यं नित्यमेकमनेकानुगतं सामान्यमिति सामान्यलक्षणयोगात् गुणत्वव्याघातात्। नाप्यनित्यं सदा उत्पत्तिप्रसङ्गात्। अपेक्षणीयान्तराभावात् अविनाशप्रसङ्गो वा स्यात्, कारणनाशविरोधिगुणोत्पत्त्यन्तराभावात्-तस्मादिति उक्तम्, यदपेक्षाबुद्धिनिमित्तं तद्विनाशश्च विनाशक इति प्रक्रिया। नचैवं तथापि 'द्वे द्रव्ये' इति ज्ञानात्पूर्वं द्वित्वाश्रयाश्रितैकत्वद्वयविषयिणी समूहालम्बनरूपा इदमेकमिदमेकमित्यपेक्षाबुद्धिः उत्पद्यते तां सहकारिणीमासाद्य ताभ्यामेकत्वाभ्यां स्वाश्रये द्वित्वमारभ्यते। तत्र च ते असमवायिकारणे सा च निमित्तकारणं

1. क – 'कारणा कारणगत' इति लुप्तः पाठः।
2. ग – 'एव' इत्यधिकः पाठः।

तदनु द्वित्वत्वसामान्यज्ञानं तदेव अपेक्षाबुद्धेः विनश्यत्ता। तदनन्तरं द्वित्वताविशिष्ट द्वित्वज्ञानं तस्या नाशश्च तदनन्तरं द्वित्व नाशो द्वे द्रव्ये इति ज्ञानोत्पत्तिश्चेति। न च प्रत्यक्षविशिष्टज्ञाने विशेषणमपि कारणं, प्रकृते च द्वित्वाख्यविशेषस्य ध्वस्तत्वात् कथं तद्विशिष्टज्ञानमिति वाच्यम्। तद्ध्वंसेऽपि पूर्वरूपसत्त्व-कारणत्वस्य सत्त्वात्, अन्यत्र बुद्धेः द्विक्षणावस्थायित्वेऽपि फलबलात् अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वं कल्प्यते।

यद्वा द्वित्वोत्पत्त्युत्तरं द्वित्वतासामान्यज्ञाने द्वित्वे द्वित्वतावैशिष्ट्यं तद्वैशिष्ट्यं च द्रव्ये एकदैव भासते, विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति एवं विशिष्टवैशिष्ट्यमिति प्रत्यक्षखण्ड टीकादौ उक्तत्वात्। एवं त्रित्वाद्युत्पत्तिः इत्यत आह–'एवं त्रित्वे'ति। तत्रापि त्रित्वाद्याश्रयाश्रितानि एकत्वान्येव समवायिकारणानि। अपेक्षाबुद्धिः निमित्तकारणमिति भावः।

ननु द्वित्वत्वसामान्यज्ञानात् अपेक्षाबुद्धेः नाश इति यदुक्तं तन्न पेशलम्। बुद्धेः बुद्ध्यन्तरनाशकत्वस्य प्रमाणमन्तरेण वक्तुमशक्यत्वादिति चेन्न। विद्युत्संन्निपातादिषु तावत् प्रत्यक्षसिद्धम् अशुतरविनाशित्वं प्रतिनियतविषयत्वेन क्रियासन्तानादौ आशूत्पादश्च एवं प्रतिक्षणं निमेषानिमेषसन्ततौ स्थिरविषयास्वपि बुद्धिषु आशूत्पादनाशौ प्रत्यक्षसिद्धौ अन्यथा उन्मील्यनिमीलितनयनानामपि रूपसाक्षात्कारः स्यात्। नचैषापत्तिः संशयानुपपत्तेः, नाशश्च उत्तरोत्तरज्ञानात् पूर्वस्य तदभावे संस्कारादपि। तद्यथा सुषुप्तिपूर्वकालीनस्य नाशः संस्कारादेव तस्य ज्ञानानुत्पादकत्वात्। निर्विकल्पकस्य च ज्ञानमात्रादेव तस्य संस्कारजनकत्वात् क्वचिभोभयोरपि प्रत्येकं सामर्थ्यावधारणात्। एवं द्वित्वादिकमपि यदि उत्पादविनाशि न स्यात् तदा कालान्तरेष्वपि अपेक्षाबुद्धिनिमित्त-

मन्तरेण गुणान्तरवदुपलभ्भेत। न च अभिव्यक्तय तदपेक्षा तस्याः कारणत्वेन साधितत्वात्। यदि अपेक्षाबुद्धेः द्वित्वोत्पादकत्वे तद्-व्यञ्जकत्वेच बाधकाभाव : व्यञ्जकासत्वादेवोत्तरकालम् अज्ञान-मिति वक्तुं शक्यत एव। तथापि अपेक्षाबुद्धिसत्वे तदतिरिक्तका-रणक्षमवधानस्य च अक्षुण्णत्वेन द्वित्वान्तरोत्पादात् आवश्यकत्वेन तेनैव व्यवहारोपपत्तौ पूर्वद्वित्वस्य अनुपलब्धि बाधितत्वेन तस्य विनाश एव कल्प्यते।

प्रमाणं चात्र द्वित्वं निमित्तविनाशविनाश्यम्, अश्रयनाश-विरोधि गुणोत्पादाभावे सति गुणस्य सतो विनाशित्वात् चरम-ज्ञानवत्। न च ईश्वरापेक्षाबुद्धिजपरमाणुद्वित्वे त्रित्वम् उत्पद्यते इति कथं न विचित्रमिति वाच्यम्। गुणो गाणानङ्गीकारात्, एक-त्वेषु त्रित्वादेरभावात् द्वाभ्यां द्रव्याभ्यां द्वित्वं त्रिभिद्रव्यैः त्रि त्वमिति समवायिकारणविशेषात् विशेषः अस्त्येवेति चेन्न। संख्यो-त्पत्तेः पूर्वम् अविशेणात्। न च असमवायिकारणेष्वेव कश्चित् विशेषोऽस्ति, न एव द्वित्वाद्युत्पत्तिनियामक इति वाच्यम्। तथा सति तत एव द्रव्ये द्वित्वादिव्यवहारोपपत्तौ दत्तजलाञ्जल्येव द्वि-त्वादि स्यात्। निमित्तकारणापेक्षाबुद्धिविशेषात् विशेष : आस्ता-मिति चेन्न। विषयविशेषमन्तरेण तस्या अपि विशेषाभावात् अ-दृष्टविशेषादेव विशेषः अस्त्विति चेन्न। दृष्टकारणमात्रं विलु-प्येत। तथातिरिक्तमिदम् उच्यते यददृष्टविशेषः नियामको नेति कथमन्यथा अग्नौ ऊर्ध्वगतिनियमः, पवने वा तिर्यग्गतिनियम इति चेन्न। तत्राग्नित्वपवनत्वे दृष्टौ उपाधी आश्रित्य अदष्टनियाम-कत्वं, प्रकृते च न कोऽपि धर्मोऽस्ति। तथा सति एवं द्वित्वाद्यु-त्पत्त्यनियमे परस्परकलहेन नैकम् उत्पद्येत इति।

अत्रोच्यते - तद्वति तस्य अनुत्पत्तिनियमात् स्वप्रागभावः

स्वं प्रति कारणम्। तथा च यथा पाकजस्थले समवाय्यसमवायिनिमित्तकारणानां साम्येऽपि तत्तत्प्रागभावघटितसामग्रीभेदेन रूपादिकार्यं विचित्रम्। तथा तत्रापि प्रागभावघटितसामग्रीभेदमादाय द्वित्वादिकार्यं विचित्रम्।

वस्तुतस्तु एकत्वापेक्षाबुद्ध्योः निमित्तसमवायिकारणयोः अविशेषेऽपि समवायिकारणभेदादेव कार्यभेदः, तद्भेदस्य उभयवादिसिद्धत्वात्। अत एव पाकजवत् यथा त्रित्वाद्युत्पत्तिः तथैव कथं द्वित्वाद्युत्पत्तिः कारणतौल्यादिति परास्तम्। यावति द्वित्वप्रागभावः तावत्येव द्वित्वम्। एवं त्रित्वाद्युत्पत्तावपि प्रागभावस्य नियामकत्वात्।। श्रीः।।

क्रमप्राप्तं परिमाणं लक्षयति – 'परिमाणमि'ति। अत्रापि व्यवहारो ज्ञानं शब्दश्च पूर्ववद् व्याख्येयः। एवं च हस्तवितस्त्यादिभेदवत् उपलभ्यते तदेव परिमाणमिति। प्रत्यक्षमपि प्रमाणम् उपन्यस्तं भवति। नचैतत्प्रत्यक्षं द्रव्यस्वरूपानतिरिक्तविषयमिति वाच्यम्। द्रव्यग्रहेऽपि परिमाणे सन्देहात्। आलोकेन्द्रियसंनिकृष्टं द्व्यणुकं चाक्षुषधीनिमित्त गुणाभाववत् अचाक्षुषद्रव्यत्वात् वायुवदित्यनुमानं महत्वे बोध्यम्।

ननु परिमितमित्यनुगतव्यवहारात् सामान्यमेव कथं परिमाणं न भवेत् इति चेन्न। सातिशयत्वात्, अतिशयस्य क्रियागुणमात्रवृत्तित्वेन सामान्यावृत्तित्वात् द्रव्यत्वेन सामान्यानतिरिक्तवृत्तित्वात् महत्वस्यापि जातित्वे पृथिवीत्वादिना परापरभावानुपपत्तेः। लक्षणं तु मानव्यवहारासाधारणकारणगुणत्वम्, कालवृत्तिवृत्तित्वे सति एकवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्वं, परिमाणत्वं जातिरेव वा बोध्यम्।

लक्षणप्रमाणाभ्यां सिद्धस्य परिमाणस्य अवान्तरभेदमाह– 'तच्चे'ति।

तदेव स्पष्टयति – 'अणिव'त्यादिना। तदेवतन्नित्यमनित्यं च नित्यानां नित्यम् अनित्यानामनित्यम्।

ननु भवेदेवं यदि अणुत्वस्य परिमाणावान्तरभिन्नतायां किञ्चित्प्रमाणं स्यात्, परमाणुद्वयणुकादौ अणुत्वव्यवहारस्य महत्त्वाभावेनैव अन्यथासिद्धिरिति चेन्न। द्रव्यत्वेन परिमाणानुमानात् द्वयणुकात् परमाणोः अपकर्षाश्च। न च अभावे अपकर्षः सम्भवति।

इदमत्रावधातव्यम् – यथा महत्त्वं प्रकृष्यमाणं परममहत्त्वकाष्ठायां पर्यवसन्नम्, एवं दीर्घत्वमपि। एवमेव यथाणुत्वमपकृष्यमाणं परमाणुत्वकाष्ठामाप्नोति तथा ह्रस्वमपि। तथा च आकाशपरमाण्वोः दीर्घत्वह्रस्वेस्त एवेति तत्र नित्यस्य कारणचिन्ता विरुद्धा। अतः कार्यपरिमाणस्य कारणं निरूपयति – 'तत्रे'ति। संख्यापरिमाणप्रचयाः योनिः कारणं यस्य तत्तथोक्तम्। संख्याकारणस्य स्थलमाह – 'द्वयणुके'ति। योनिशब्दस्य लोके अन्य एवार्थो दृष्टः, अतः प्रकृतोपयोग्यर्थमाह – 'संख्ये'ति। स्थलान्तरमाह – 'त्र्यणुके'ति। न च ईश्वरबुद्धिः सर्वविषयत्त्वात् परमाण्वेकत्वं द्वयणुकैकत्वान्यपि गोचर इति (गोचरयति) कथमस्य अपेक्षाबुद्धित्वम् इति वाच्यम्। अनन्यगतया अदृष्टस्यैव नियामकत्वात्।

ननु कारणाणुपरिमाणमेव न कथं कार्यजनकमेवेति चेन्न, तस्य पारिमाण्डल्यात्। रूपाद्यन्यतमं तथा तस्य प्रत्येकव्यभिचारात्। तथाहि रूपस्य व्यभिचारो वायौ रसस्य तेजसि गन्धस्य अबादिषु, गुरुत्वस्य अनलादौ, स्नेहस्य जलव्यतिरेके, स्पर्शसंयोगप्रकर्षस्य परिमाणप्रकर्षाप्रयोजकत्वात् स्पर्शसंयोगप्रकर्षस्य परिमाणप्रकर्षाप्रयोजकत्वात्। स्पर्शसंयोगौ न भवत एव कारणं, विभागोऽपि

कारणे वर्तमानं परिमाणाश्रयं निघ्नन् कार्यविरुद्ध एव वेगरहितकारणजन्यकार्यपरिमाणव्यभिचारात् वेगोऽपि अकारणमेव। परत्वापरत्वयोश्च प्रतिपुरुषं भिन्नत्वेन असङ्गतत्वात् तदुत्कर्षस्य कार्योत्कर्षाननुविधायितया तेऽपि तथैव बुद्ध्यादीनां चासम्बन्ध एव। अतः कारणैकार्थसमवेतत्वेन अनुविधीयमानप्रकर्षान्वयव्यतिरेकितया पर्यवसन्नं त्रयमेव। तथा च परमाणौ द्व्यणुके च महत्वप्रचयः असम्भव इति न संख्यैव परिशेषात् कारणम्।

प्रयोगस्तु द्व्यणुकपरिमाणं द्वित्व संख्यायोनिजन्यम् अणुत्वात् यन्नैवं (तन्नैवम्,) यथा घटगतपरिमाणम्। द्व्यणुकपरिमाणं बहुत्वसंख्यायोनिपरिमाणप्रचयजन्यं जन्यमहत्वात्। यन्नैवं तन्नैवं यथा अणुपरिमाणं, विपक्षे बाधकतर्कश्च कारणगुणानुपपत्तौ कार्योनुपपत्तिरेव। परिमाणकारणस्थलमाह – 'चतुरणुकादी'ति। न च अवयवबहुत्वमेव सर्वत्रैव न कुतः चतुरणुकादिमहत्वारम्भकमिति वाच्यम्। समानसंख्यारब्धे अतिशयदर्शनात्, द्वाभ्यामवचिताभ्यां महद्भ्यामारब्धे द्रव्ये कारणमहत्वस्यैव आरम्भकत्वात्। प्रचयकारणस्थलमाह 'तूले'ति। तूलेत्युपलक्षणम्। नन्वेतदेव विवक्षितम्।

ननु तूलखण्डपरिमाणोत्पत्तौ यद्यपि संख्याकारणत्वप्रसङ्ग एव (न) द्वाभ्यां तूलपिण्डाभ्यामारब्धं यत्तूलं तत्र बहुत्वस्य असम्भवात्। तथापि महत्वे अन्यथासिद्धः केन वारणीयेति चेन्न। महत्वस्य सतोऽपि प्रचयापेक्षत्वात् न केवलस्य जनकत्वं, तथा च तूलपरिमाणे द्वयोरपि अकारणत्वम् इति रहस्यम्। नित्यपरिमाणमाह – 'परमाण्वि'ति। महत्वाणुत्वे इव दीर्घत्वह्रस्वत्वे अपि बोध्ये।

ननु महत्वाणुत्वापेक्षया अतिरिक्तधर्मत्व (दीर्घत्व) ह्रस्वत्वयोः किं प्रमाणम्? ननु महत्वदीर्घम् आनीयताम् इति व्यवहार

एव प्रमाणम्, नह्युभयोरभेदे एवं व्यवहारः सम्भवति घटेषु कुम्भमानीयतामित्यपि स्यादिति वाच्यम्। व्यवहारमात्रस्य असाधकत्वात् अन्यथा महत्त्ववर्तुलं चतुरस्रत्रिकोणं च आनयेति व्यवहारेणैव तेषामपि सिद्धिः स्यादिति चेन्न, महत्त्वदीर्घत्वयोरभेदे इदमस्माद्दीर्घं न महदिति व्यवहारो लुप्येत। वर्तुलत्वादीनां च लाघवेन महत्त्वविशेषत्वमेव। न च तथापि महत्त्वकारणातिरिक्तदीर्घत्वकारणानुपपत्तौ कथं भेदइत्यत्र किमुतरमिति वाच्यम्। प्रागभावभेदेन भेदमेव गृहाण, एतश्चतुष्टयं कार्यपरिमाणम् आश्रयनाशादेव नश्यति। न च मीमांसकमतवत् सत्येवाश्रये यथा शरीरादिपरिमाणम्। कुत एतदिति चेन्न। परिमाणनाशे परिमाणेतरोत्पत्तौ च आश्रयोत्पत्त्याश्रयनाशौ विना अन्यकारणाभावादिति ।। श्रीः ।।

पृथक्त्वलक्षणमाह – 'पृथक्त्वं त्वि'ति। व्यवहारः शब्दः पूर्ववद्व्याख्येयः। तथा च इदमस्मात् पृथक्, इदमस्मादितरत् इदमस्मादर्थान्तरमिति ज्ञानशब्दाभ्याम् अन्यतरासाधारणकारणगुमत्त्वम्| अवधिव्यंग्यत्वे सति एकमात्र गुणवृत्तिवृत्यनेकवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणं बोध्यम्।

ननु अन्योन्याभावे नैव कथम् अन्यथासिद्धिः गुणत्वे गुणादिषु पृथक् इति व्यवहारो लुप्येतेति चेन्न। 'घटः पटो न' इत्यतः 'घटः पटात् पृथक्' इति व्यवहारभेदे अनुभवः साक्षी। न च व्याकरणबलात् उपपदविभक्तित्वात् इयं प्रतिपादिकमात्रार्था ननु अवधित्वार्थेति वाच्यम्। 'अन्यारदितर' इत्यत्र अन्यशब्दस्य अर्थपरत्वात्, तथा च अन्यशब्दतुल्यार्थाया नञोऽपि प्रयोगे पञ्चमी स्यात्। 'अन्य' 'इतर' 'पृथगि'त्यादिशब्दानां योऽर्थः सः पृथक्त्वं गुण आख्येयः। अत एव गुणादिषु गौणो व्यवहारः। एतेनैव

धर्ममेव तदिति प्रत्युक्तम्। अस्तु तर्हि घटादिवत् सामान्यविशेष एव पृथक्त्वमित्यपि न च वाच्यम्, जातिसङ्करप्रसङ्गात्। घटावधिपृथक्त्वस्य घटावृत्तित्वात्, पटावधिपृथक्त्वस्य पटावृत्तित्वात्। तदुभयस्य मिथोऽत्यन्ताभावसमानाधिकरणस्य लोष्टादौ (लोष्टादौ) सङ्कीर्णत्वात्। न च पृथिवीत्वादेः व्यापकमेव तदिति वाच्यम्। द्रव्यत्वेन सत्तया सह अन्यूनानतिरिक्तव्यक्तिवृत्तित्वात्। एतच्च संख्यावत् एकद्रव्यं च अनेकद्रव्यं च तद्वदेवोत्पद्यते नश्यति चैवेति ॥ श्रीः ॥

क्रमप्राप्तं संयोगं लक्षयति—'संयोग' इति। इदमनेन संयुक्तमिति असाधारणतया बुद्धिर्विपर्ययः, 'संयुक्त' इति प्रयोगासाधारणकारणं संयोग इत्यर्थः। एतदुपलक्षणम्। विभागत्वानधिकरणत्वे सति अनेकवृत्तिमात्रवृत्तिगुणत्वभिन्नगुणत्वव्याप्यजातिमत्त्वं पार्थिवपरमाणुविशेषगुणासमवायिकारणवृत्तिगुणत्वभिन्नगुणत्वव्याप्यजातिमत्वं वा संयोगित्वमित्यपि लक्षणं बोध्यम्। द्वयाश्रयोऽनेकवृत्तिरित्यर्थः, तत्वं च स्वाश्रयान्योन्याभावसमानाधिकरणत्वम् अव्याप्यवृत्तिः स्वात्यन्ताभाव समानाधिकरण इत्यर्थः।

नन्वत्र सर्वत्र स्वात्यन्ताभावेन सह अप्रतियोगिनः सहोपस्थान (सहानवस्थान) रूपविरोधस्य दृष्टत्वात् कथमेवं पवेदिति चेन्न। 'मूले वृक्षः कपिसंयोगवान् शाखायां न' इत्यनुभवबलात्। न च मूलस्थशाखैव संयोगतदभावाधिकरण इति वाच्यम्। वृक्षादिकरणत्वेनापि प्रतितेः। एव न क्वपि दृष्टमिति चेन्न। तेजसि औष्ण्यवत् स्वभावस्य नियन्तु मशक्यत्वात्। न च वाच्यं, मूलशाखा एव तदाश्रया, वृक्षादिकरणत्वेन प्रतीतेः भ्रमत्वमस्तु। तथा च दृष्टविरोधो न वा स्वभावकल्पनामिति। नहि मूलं शाखां वा अव्याप्यसंयोगः प्रतीयते। तथा च तयोरपि

अवच्छेदकमवयवान्तरं कल्पनीयम्। तत्रापि अवच्छेदकान्तरमिति क्रमेण द्व्यणुकपर्यन्तधावने अतीन्द्रियवृत्तित्वेन संयोगस्य अतीन्द्रियतैव स्यादिति। असमवायिकारणभेदात् कार्यभेदमाह – 'स त्रिविध' इति। स्पष्टमन्यत्। एवं त्रिविधस्यापि संयोगस्य समानाधिकरणात् विभागात् विनाशः। निष्क्रियद्रव्यनाशे आश्रयनाशात् विनाशः इति ।। श्रीरस्तु ।।

विभागलक्षणमाह – 'विभाग' इति। 'इदमनेन विभक्तम्' इति प्रतीत्यसाधारणकारणमित्यर्थः। द्रव्यासमवायिकारणावृत्तित्वे सति एकमात्रवृत्त्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यपि लक्षणं बोध्यम्।

ननु संयोगाभाव एव विभागोऽस्तु, अलम् अधिकगुणकल्पनया इति चेन्न, विकल्पासहत्वात्। तथाहिकिमन्योन्याभावः आहोस्वित्संसर्गाभावः। नाद्यः संयुक्तयोः विभक्तप्रतीत्यापत्तेः नान्त्यः गुणादावपि विभक्तप्रतीत्यापत्तेः। अस्तु तर्हि संयोगध्वंसः एव तन्निमित्तमिति चेन्न। एकस्मिन् संयोगिनि विनष्टे अपरस्मिन् विभक्तप्रतीत्यापत्तेः। नहि द्वयोरेकस्मिन् विनष्टे अपरस्मिन् विभक्तमतिरस्ति कस्यचित्। किञ्च एकध्वंसवति संयोगाश्रये विभक्तप्रतीतिः स्यात्।

ननु विद्यमानद्रव्यद्वयाधिकरणसंयोगत्वावच्छिन्न संयोगध्वंसः स्वसमानाधिकरण संयोगसमानकालीनसंयोगध्वंस एव वा तन्निमित्तमस्तु इति चेन्न। विद्यमानत्वाद्यप्रतीतवपि विभक्तप्रत्ययात्। किञ्च विभागभावः संयोगः किमिति न स्यात्, तथा च विनिगमकाभावात् उभयसिद्धिः। किञ्च विभक्तप्रत्ययस्य ध्वंसविषयत्वे इदमस्माद्विभक्तमिति प्रतीयमानावधित्वं भज्येत, तद्ध्वंसस्य सप्रतियोगिकत्वेऽपि स्वावधिकत्वाभावात्। अपि च सत्याश्रये विरो-

धिगुणमन्तरेण न संयोगनाशकं किञ्चिदस्ति। तथा च अन्येषाम-विरोधित्वात् विभाग एव पर्यवसन्नो विरोधिगुणः।

ननु नेयं श्रुतिः। यत् सत्याश्रये विरोधिगुण एव नाशक इति। तथा च अन्वयव्यतिरेकाभ्यां कर्मैव नाशकमस्तु संयोगस्येति चेन्न। यथा अग्निसंयोगानन्तरं तूलनाशो दृश्यते यथा च इन्धननाशानन्तरम् अग्निनाशो, दृयते तत्र उभयत्र अग्निसंयोगेन्धन-नाशौ न साक्षात् नाशकौ, किन्तु अवयवावयविभागादिक्रमेण न साक्षात् किन्तु विरोधिगुणोत्पादकतया।

ननु कथमयं निर्णयः? उच्यते – जगति गुणकर्मनाशे आश्रयनाशविरोधिकर्मयोः (धर्मयोः) एव विनाशकत्वं नान्यस्य, विरोधिधर्मश्च समानाधिकरण एव अन्यथा अतिप्रसङ्गात्। एवं च ययोरेव विरोधधर्मः स एव विभागः, कर्मणश्च उत्पादकजातीयत्वेनविरोधित्वाभावात्। किञ्च वंशदलद्वये अतिसंघट्टमाने यः शब्दः उत्पद्यते तदसमवायिकारणतया विभागसिद्धिः। न च कर्मैव असमवायिकारणमिति वाच्यम्। कार्यकारणोभयनिरूपित सम्बन्धार्थसमवेतत्वाभावात्।

प्रयोगस्तु "संयोगत्वं द्विवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्य-जातिभिन्नप्रमेयत्वात्, घटवत्"।

'संयोगपूर्वक' इति। संयोगः पूर्वो यस्येत्यर्थः। गुणभाष्ये विभागलक्षणं प्राप्तिपूर्विकाप्राप्तिरिति। किरणावल्याम् एतद्व्याख्यानं कृतम्। प्राप्तिविरोधिगुण इति अत एव हिमवद्विन्ध्यौ विभक्ताविति धीः न विभागविषया, किन्तु संयोगाभावविषयैव तदवान्तरभेदमाह – 'स चे'ति। स्पष्टमन्यत्। नाशस्त्वस्य सत्येव आश्रये उत्तरसंयोगादेव तथाहि – विद्यमानाश्रयकविभागनाशकोत्तरसंयो–

गजन्यः, तवातैव कृतकर्तव्यत्वात कर्मवदिति संक्षेपः ।। श्रीरस्तु ।।

क्रमप्राप्ते परत्वापरत्वे लक्षयति – 'परत्वे'ति । यद्विशिष्टे द्रव्ये परमित्यभिधानं प्रतीतिर्वा, तत्परत्वम्, यद्विशिष्टे द्रव्ये अपरमित्यभिधानं प्रत्ययो वा तदपरत्वम् इत्यर्थः । तदवान्तर-भेदमाह – 'तत्त्व'ति । द्विविधे दर्शयति – 'दिक् कृते'ति । दिक् सं-योगासमवायिकारणजन्ये दिक् कृते, कालसंयोगसमवायिकारणजन्ये कालकृते इत्यर्थः । अनुगृहीतेन सहकृतेनेत्यर्थः । 'तदि'ति । संयु-क्तसंयोग भूयस्त्वमित्यर्थः ।

ननु संयुक्तसंयोगाल्पीयस्त्वभूयस्त्व एव परापरव्यवहारका-रणे भवेतां, किम् अतिरिक्तगुणकल्पनया । अत एव संयोगाल्पत्वं संनिकृष्टत्वम् अपरत्वं च पर्यायोऽस्तु । एवं च संयोगभूयस्त्वमेव असंनिकृष्टत्वं परत्वं च उच्यतामिति । चेन्न । प्रमातर्यपि परापर-व्यवहारप्रसङ्गात् । भवति मत्तो मल्लिकार्जुनः परः नतु तस्मा-दहं परः इति न च परत्वापरत्वोत्पत्तिः न कथम् आत्मनीति वाच्यम् । यथा भेर्याकाश संयोगः आकाश एव शब्दं जनयति नतु भेर्यां तथा इहापि संयोगबहुत्वात् विशेषे अपि प्रमेय एव पर-त्वापरत्वोत्पत्तिः न प्रमातरीति ।

अन्ये तु एवं समाधानमाहुः । यदि संयोगाल्पत्वबहुत्व एव तथा स्यातां, तदा एकदिगवस्थितयोः द्वयोमध्ये एकस्य घन-तरालोकवर्तिनः संयोगभूयस्त्वेन यदपरत्वं प्रतीयते [1]विदेशालोक-वर्तिनो यत्परत्वं प्रतीयते तद्विरुध्येत इति कालकृतयोः परत्वा-परत्वयोः उत्पत्तिमाह – 'काले'ति । 'अनियतदिगवस्थितयो'रिति दिक्-कृतात् विशेषं दर्शयितं तत्रापि पिण्डस्य समवायिकारणत्वं का-

1. ग – 'बिरलालोकवर्तिनः' इति पाठः ।

लपिण्डसंयोगस्य असमवायिकारणत्वम् अपेक्षाबुद्धेः निमित्तत्वम् इति। अल्पतरकालत्वं चात्र अल्पतरतपनपरिस्पन्दान्तरितजन्यत्वं प्रचुरतरकालत्वम्। विनाशस्तु अनयोः अपेक्षाबुद्धिसंयोगद्रव्यनाशेभ्यः इति दिक् ।। श्रीः ।।

गुरुत्वं लक्षयति – 'गुरुत्व'मिति। आद्यपतनासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः। लौकिकसाक्षात्कारविषयमूर्तगुणवृत्तिगुरुत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यपि लक्षणं बोध्यम्। पतनञ्च अधोसंयोगजनकः क्रियाविशेषः। आश्रयमाह – 'पृथिवी' इति। ननु धूमादौ एतन्नास्तीति चेन्न। अलं धूमदशाया तत्रापि प्रतीतेः। न च धूमे यदि गुरुत्वं स्यात् तदा नियतोर्ध्वगतिः स्यादिति वाच्यम्। गुरुत्वापकर्षात् वह्निकारणवायुनोदनाद्वा वह्न्यूर्ध्वगमनवत्, अदृष्टविशेषात् वा।

ननु लौकिकसाक्षात्कारविषयत्वम् असिद्धं यतो अधोभागवच्छेदेन त्वगिन्द्रियेण गुरुत्ववत् इदमिति गृह्यते एव। कथम् अन्यथा हस्तेनोन्नीयमानस्य हिरण्यादेः एतावदिदमिति सार्वलौकिकप्रतीतिरिति। चेन्न। यदि त्वगिन्द्रियं गुरुत्वग्राहकं स्यात् तदा उपरिभागावच्छेदेन अपि[1] गृह्णीयात् अविशेषात् कथं तर्हि हस्तेनोन्नीयमानस्य प्रतीतिः हस्तस्यैव उन्नमनेन तदनुमानात्। एवमन्यत्रापि गुरुत्वस्य अनुमानोन्नेयत्वं दृष्टम्, यथा तुलाफलकेन उन्नीयमानस्य धान्यादेः स्पर्शव्यतिरिक्तगुणस्य स्पर्शेन्द्रियग्राह्यस्य चाक्षुषतोपलब्धेः। सम्मतिमाह – 'यथोक्तिमि'ति। सति असमवायिकारणत्वे सूत्रकार गुरुत्वस्य पतनं तच्चापरकारणगुणपूर्वकं परमाणौ नित्यमाश्रयनाशादेव नश्यत इति ।। श्रीः ।।

[2]क्रमप्राप्तं द्रवत्व लक्षयति – 'द्रवत्वमि'ति। पतनसमवेतसम-

1. क – 'अपि गृह्णीयात अविशेषात् कथं' इति भागः लुप्तः।
2. क – 'क्रमप्राप्तं' इति पाठः नास्ति।

वेतत्वरहिततेजः सममेव समवेतत्वरहितसामान्यगुणसमवेतगुणत्व साक्षाद्व्याप्यजातिमत्वमिति लक्षणं बोध्यम्। एतादृशी च जातिः द्रवत्वत्वमेव। आश्रयमाह – 'भूतेज' इति। तद्द्विविधमित्यभिप्रायेणाह – 'भूतेजसो'रिति। आद्यस्य अग्निसंयोगासमवायिकारणकता द्वितीयस्यावयविनि कारणगुणासमवायिकारणकता परमाणौ नित्यता। ननु तैले कथं सांसिद्धिकद्रवत्वं वर्तते इति चेन्न। अवष्टम्भकजलभागस्येति तत्वम्। कथं तर्हि दहनानुकूलता पार्थिवभागमाहात्म्यात् स्नेहोत्कर्षाद्वा। जलान्तरेण तथा स्नेहोत्कर्षः। कथमेतज्ज्ञायते इति चेन्न। फलबलादेवेति। पर्यायशब्दमुखेन स्नेहलक्षणमाह – 'स्नेह' इति। स्निग्धोऽयमिति व्यवहारः असाधारणकारणम् इत्यर्थः। गन्धवद्वृत्यवृत्तिरसवद्वृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं स्नेहत्वमिति लक्षणं बोध्यम्। अथ त्वपामेव विशेषगुणः संग्रहमृद्वादि (मृजादि) हेतुः सक्तुसिकतादीनां पिण्डीभावप्रयोजकः संयोगविशेषः संग्रहः – मृजा [1]चोद्वर्तनादिसाध्यशरीर शुद्धिः।

ननु घृतादावपि स्नेह प्रतीतेः कथं जलस्यैव अयमिति चेन्न। परम्परासम्बन्धात् जलभागस्यैव स्नेहः। न च द्रवत्वप्रतिबन्धिग्रहः तस्य नैमित्तिकत्त्वेन अजलीयत्त्वात्॥ श्रीरस्तु॥

शब्दलक्षणमाह – 'शब्द' इति। श्रोत्रग्राह्यगुणत्वम्, आकाशविशेषगुणत्वं चेत्यर्थः। श्रोत्रग्राह्यत्वं न सम्भवति शब्दस्य अतः प्रथमलक्षणमसम्भवि इत्याशयेनाशङ्कते – 'नन्वि'ति। युक्तिमाह– 'यावती'ति। परिहरति – 'सत्यमि'ति। ननु भेरी शब्दाह्नये कथं भेरीशब्द मया श्रुत इति प्रतीतिरित्यत आह – 'भेरी'ति। आकाशस्य शब्दसमवायिकारणत्वे सिद्धे निमित्तासमवायिकारणं विभजते– 'भेरीशब्दे'ति। विभागासमवायिकारणतास्थलमाह – 'एवं वंश' इति।

---

1. क–ख – 'साध्य' इति पाठः नास्ति।

प्रतिपादितसंयोगविभागयोः शब्दासमवायिकारणत्वे पूर्वाचार्यसम्मतिमाह – 'तथा चोक्तम्' इति। असमवायिकारणनिमित्तकारणवत् समवायिभ्रममपाकरोति – 'आद्यादीनामि'ति। स्नेहादिगुणपदस्य (गुणत्रदस्य) न चिरावस्थायित्वम् इत्यभिप्रायेणाह – 'कर्मे'ति। यद्यपि कर्मणि एव त्रिक्षणावस्थायित्वं न ज्ञानशब्दयोः, तथापि मतविशेषेणोक्तम्। विनाशकारणमाह – 'तत्रे'ति। अन्त्यस्य उपान्त्यनाश्यत्वं न सम्भवतीत्याशङ्कते – 'इदमि'ति। अत्र युक्तिमाह - 'उपान्त्येने'ति। उपान्त्येनान्त्यनाशजननासंभवात् इत्यन्वयः कार्यः। कथंभूतेन उपान्त्येन अन्त्यस्य द्वितीयक्षणानुगामिना अन्त्यवत् तृतीयक्षणे च असतार्थादन्त्यस्यैवात्र हेतुमाह – 'त्रिक्षणावस्थायित्वादि'ति एवञ्च अन्त्यनाशपूर्ववर्तित्वं नास्त्युपान्त्यस्येति भावः। तर्हि कथम् अन्त्यनाशः स्यात् इत्यतआह – 'तस्मादि'ति। अन्त्यनाशस्य पूर्ववर्तित्वम् अस्त्येवेति भावः। एतच्च यन्मते त्रिक्षणावस्थायित्वं तन्मतेनोक्तम्।

वस्तुतस्तु शब्दस्य द्विक्षणावस्थायित्वमेव। तथाहि शब्दस्य विरोधिद्वयमेव कार्यं कारणञ्च विरोधित्वं चात्र वध्यघातकभाववत्वम्। तथा च आद्यक्षणे शब्दोत्पत्तिः, द्वितीयक्षणे चोत्पन्नस्य स्थितिः, तथैव च शब्दान्तरमुत्पद्यते स च द्वितीयः शब्दः स्वस्थितिक्षणे स्वकारणपूर्वशब्दं विघटयति, अपेक्षणीयान्तराभावात्, यदि च तथा न नाशयेत् तथोत्तरमपि न नाशयेत् अविशेषात् अन्त्यशब्दस्तु कारणेनैवोपान्त्येन। तथाहि उपान्त्यः स्वस्थितिक्षणे अन्त्यशब्दं जनयति स च उत्पन्न एवैनं हन्ति अयमपि च तथैव[1] हन्ति नाशकान्तराभावात्।

ननु उत्पादकस्य नाशकत्वं न श्रुतं, न च दृष्टं तथासति

1. न – 'तं' इति अधिकः पाठः।

उत्पादकविनाशौ युगपत् स्यातामिति चेन्न। एकस्य उत्पादकत्वेऽपि अत्यन्तशब्दसहकृतनाशकत्वात् विरोधात्। तथा चोक्तं गुणकिरणावल्याम् - "पाकजक्रियायामेकस्यैव विनाशोत्पादकत्वे यथोपान्त्यस्य वेति" एवं च सति क्षणिकोऽन्त्यः शब्दः स्यादिति चेन्न, इष्टापत्तेः। तथा च न्यायलीलावत्यां कर्णावच्छेदकश्चोपाधिः अन्त्यः शब्द एवेति त्रिक्षणावस्थायित्वं चेति। मूलं तु आशुतरविनाशित्वम् इत्येवं परं बोध्यम्।

वर्णात्मकशब्दस्योत्पत्तिः इत्थं स्मृत्युपेक्षा (स्मृत्युक्ता) आत्ममनः संयोगात्, वर्णोच्चारणाच्च, तदनन्तरम् औदार्यवायोः प्रयत्नवदात्मसंयोगात्, कर्मत्वेन कर्मणा ऊर्ध्वं गच्छन् वायुः कण्ठतात्वादीन् समभिहन्ति, ततः कण्ठतात्वादिसमभिघातनिमित्त कण्ठकाशसंयोगात् असमवायिकारणात् अकारकवर्ग- हकार- विसर्जनीयानां निष्पत्तिः। एवमेव अन्यवर्णात्मकानाम् उत्पत्तिः बोध्या। विनाशस्तुध्वन्यात्मकशद्ववदेव।

ननु स्यादेवं यदि शब्दनित्यतायां प्रमाणं स्यात्, तथा च संयोगजत्वादि व्युत्पादनं शिशुप्रतारणमेव इत्यत आह - 'विनाशित्वं चे'ति अनुमानं वक्तु प्रतिजानीते - 'तथाही'ति। प्रतिज्ञातार्थमाह - 'शब्दोऽनित्य' इति। किमत्र साध्यं तत्राह - 'शब्दस्ये'ति। ततो नित्यलक्षणं कुर्वन् माध्यमाह - 'अनित्यं चे'ति। विनाशप्रतियोगित्वमित्यर्थः। प्रकृतानित्यत्वलक्षणं प्रतिक्षिपति - 'नत्वि'ति। ध्वंससमानाधिकरणसत्तासम्बन्ध इत्यर्थः। वचनमात्रात् न परकृतलक्षणदूषणम् अतो दूषणमाह - 'प्रागभाव' इति। किमत्रहेतुस्वरूपं तत्राह- 'सामान्यवत्त्वे'ति। पदकृत्यमाह - 'प्रत्यक्षे'ति। तेनैवेति। आत्मनैवेत्यर्थः। 'योगी'ति। योगजधर्मसहकारित्वात् योगिनो बहिरिन्द्रियेण आत्मानं गृह्णन्तीत्यर्थः। स्पष्टमन्यत्र।

ननु स एवायं गकारः सैवेयं गाथेत्यादि प्रत्यभिज्ञानबलात् द्रव्यत्वादि सामान्यवत् एकैक एवहि गकारादयो नित्याः अतो बाधितमिदमनुमानम्, न च प्रत्यभिज्ञायाः नित्यत्वादिविषयकत्वात्, कथं बाधः स्यादिति वाच्यम्, नाशकत्वात्। [1]किमुतशद्वान्तरसम्भवेऽपि[2] तया तत्कालीनता गकारस्य गृह्यते, तथा च "तावत्कालं स्थितं चैनं कः पश्चात् नाशयिष्यति" इति न्यायेन तार्किकाभिमताशुतरविनाशित्वस्य भावनिर्णयात् नित्यता अनेन पर्यवसन्ना। अत एवैतस्याः तज्जातीयत्वं विषयः इत्यपि परास्तं बाधकाभावात्।

स्यादेतत् एकत्र धर्मिणिविरुध्दयोः द्वयोः स्थितिः न सम्भवति। तथा च तारो गकारो मन्दो गकारः तारान्मन्दोऽन्यः इत्यनुभवात्। तारत्वमन्दत्वे विरुध्दधर्मौ। तथाच विरुध्दधर्माध्यासविषयत्वेन प्रत्यभिज्ञा न प्रमाणम्। नच तारत्व मन्दत्वादीनां तन्दतत्त्वेन प्रतीतावपि न गकाराद्याश्रितत्वं प्रतीतिमात्रेण वस्त्वसिद्धेः, रक्तो वह्निः लोहितः स्फटिकः इत्याद्यनुभवबलात् रक्ततापि तदधिकरणिका स्यादिति वाच्यम्। रक्तत्वादीनाम् अन्यधर्मित्वस्थितौ वह्न्यादीनां तद्विरुद्धधर्मवत्वस्थितौ च इन्धनजपाकुसुमादीनाम् अन्वयव्यतिरेकानुविधानात् बाधेन तत्र भ्रान्तत्वात्। न च प्रकृते तारत्वादीनाम् अन्यधर्मत्वेन स्थितिः नापि गकारादीनाम् विरुद्धधर्मवत्वं, नापि तारत्वाद्याश्रयाभावात् अन्यधर्मिणोऽनुविधानम् न च अवश्यंस्वीकृतवायोरेव धर्माः गकारादिगतत्वेन भासन्ते इति वाच्यम्। स्पर्शग्रहरूपत्वग्व्यापाराभावेन त्वचा ग्रहीतुमशक्यत्वात् कत्वादिवत् वायुः [3]चक्षुरादिदृष्टान्ताव-

1. ग – 'नाशकत्वाभिमत' इति पाठः।
2. क – 'अपि तया' इति पाठः लुप्तः।
3. क – 'चक्षुरादिदृष्टा' इति पाठः लुप्तः।

ष्टम्भेन अवायवीयत्वेन हेतुना वायुमात्रसमवेतधर्ममात्रग्राहकत्वात्।

यद्वा तारत्वादयो न वायुधर्माः श्रोत्रेन्द्रियग्राह्यत्वात्, कत्वादिवत् वायुश्च न सत्तान्यश्रोत्रग्राह्यधर्मा मूर्तत्वात्, पटवत् तस्मात् तारत्वमन्दत्वादयो धर्माः एव। अतस्सिद्धः विरुद्धधर्माध्यासः इति।

मैवं तारत्वादयो गकारादिजातयः गत्वादिना (संकर) [1]प्रसङ्गात् तथा हि तारत्वं विहायगत्वं मन्दगकारे, एवं च परस्परात्यन्ताभावसमानाधिकरणयोः तारगकारे समावेशात्। न च तत्तद्व्याप्यं, नानैव तारत्वं, [2]ताराकारादनुगतप्रतीत्यनुदयप्रसङ्गात्। किञ्च तारत्वमन्दत्वे न शब्दवृत्तिजाती अस्मादयं तारः तारतरः इत्यदिप्रकारेण सप्रतियोगिकत्वात् माधुर्यवत्, नापि तयोः परस्परं विरोधः, य एव गकारस्तारः तस्मात् स एवेदानीं मन्द्रः इति समयभेदेन वक्तृभेदेन च उभयोः एकत्र प्रतीतेः।

ननु तरोऽयं न तारतरः तारात् मन्दोऽन्यः इति प्रतीत्या भेदोऽपि विषयीक्रियते इति चेन्न। धर्मिणोरभेदे भासमाने विरुद्धभेदप्रतीतेः धर्मिभेदविषयत्वात् एकत्र पुरुषेदण्डी न कुण्डलीति प्रतीतिवत्, सन्तु वा तारमन्द्ररूपाभिन्ना एव गकारादयः, प्रत्यभिज्ञाने बाधकाभावात् तस्मात् वायुधर्मा एव तारत्वमन्दत्वादयः शब्दगतत्वेन भासन्ते, दर्पणधर्मा इव मुखादौ, न श्रोत्रेणाग्रहणमम्भवः। स्पर्शरूपत्वग्व्यापाराभावात्। न त्वचापि ग्रहणं सम्भवति इति दूषणे किमुत्तरमिति वाच्यम्। स्पर्शग्रहणपुरस्कारेणैव कर्णशष्कुलित्वगिन्द्रियेण इति गृहण, तारमन्दजनकवायूनाम् उत्कर्षापकर्षस्यउद्भूतस्पर्शवत्त्वस्य तार्किकैः अपि अङ्गीकारात् श्रोत्रेणैव

---

1. 'प्रसङ्गात् तथा' इति पाठः लुप्तः।
2. 'ताराकारादनुगतप्रतीत्य' इति पाठः लुप्तः।

वा तद्ग्रहोस्तु। न चैवं सति चक्षुरादिना कथं वायुधर्मग्राहकः स्यादिति बाधकमस्तीति वाच्यम्। तत्र अयोग्यस्य सत्त्वात् अत एव यः योग्यः स एव अनेन गृह्यते नान्यः। अन्यथा श्रोत्रातिरिक्तेन्द्रियेस्वगुणाग्राहकत्वदर्शनात् तदपि स्वगुणं न गृह्णीयात्, 'शब्दो नित्यः कृतकत्वात् इत्यनेन अनित्यत्वं सिध्यतु। नचेदं बाधितं स्वरूपासिद्धं वा श्रोत्रव्यापारानन्तरम् इदानीं श्रुतपूर्वगकारो नास्तीति कोलाहल इति प्रतीत्या प्रत्यक्षविषयीकरणात्। विनाशिभवत्वेनोत्पन्नभावत्वाच्च। न वा [1]संसर्गाभावग्रहः योग्यतया कथमभावः प्रत्यक्षः स्यादिति वाच्यम्। संसर्गाभावग्रहयोग्यप्रतियोगिकत्वस्यैव तन्त्रत्वात्। अन्यथा वायौ रूपाभावस्य अप्रत्यक्षत्वं स्यात्, तथापि अधिकरणसंग्रहं विना कथमयं प्रत्ययः स्यादिति चेन्न। आनुमानिकस्यापि तस्य प्रयोजकत्वात्। अत एवोक्तं किरणावल्याम् अन्धकारवादे अधिकरणमप्यनुमितं श्रुतं दृष्टं चेति।

मैवं वायुरूपव्यञ्जकाभावादेव विद्यमानस्यैव शब्दस्याग्रहः न तु ध्वंसत्वात्। अत एव अन्धकारे घटाग्रहेनाभावनिश्चयः विशिष्टत्वप्रतीतिः, अपितु इन्द्रियोपनीतवायुस्पर्शध्वंसविषयैव।

ननु तर्हि कथम् अनुकूलवाय्वादि अन्वयव्यतिरेकानुविधानं नियमत इति चेन्न। तस्य तद्व्यञ्जकत्वेन अन्यथा सिद्धत्वात्। तथा च वायुः व्यञ्जक एव नोत्पादकः, एवमेव प्रयत्नोऽपि, तस्मात् गकारो ध्वंस्त इत्यादिप्रतीतिः त्वगिन्द्रियेणोपनीतव्यञ्जकवायुस्पर्शध्वंसविषयैव।

ननु तथापि सुहृद्भावेन पृच्छामः वायुर्नोत्पादकः किन्तु

1. क – 'संसर्गाभावग्रहः' इति पाठः लुप्तः।

व्यञ्जक इत्यत्र ।क विनिगमकमिति। इदानीं श्रुतपूर्वो गकारो नास्ति, नष्टः कोलाहल इति प्रतीत्यनन्तरं पुनःश्रवणे श्रुतपूर्वोऽयं गकारः स एवायं कोलाहलः इति प्रत्यभिज्ञानमेव, न घटादिध्वंसप्रतीत्यनन्तरं[1] च न स घट इति प्रत्यभिज्ञानमेवेति तत्र विनष्टप्रतीत्या ध्वंस एव सिध्यति। एतेन शब्दानित्यत्वसाधकानुमानान्तरमपि परास्तम्। तस्मात् शब्दोऽनित्यः व्योममात्रगुणत्वात् ज्ञानवत्, विपक्षे बाधकं च प्रत्यभिज्ञानमेव ।। श्रीनृसिंह ।।

अत्रोच्यते - अस्ति तावत् सार्वलौकिकगकारादिवर्षेषु शुकशारिकामनुष्योत्पाद्येषु तत्रापि विशेषस्त्रीपुं[2] नपुंसकप्रभवेषु[3] प्रत्येकवैलक्षण्यप्रतीतिः कथमन्यथा इन्द्रियसंनिकर्षाभावे शब्दश्रवणमात्रेण शुकाद्यनुमानम्। यदि शुकाद्युच्चरितः शब्द एक एव स्यात् तदा वैलक्षण्यप्रतीतिरेव न स्यात्। नहि स्यादेवं लक्षणं भवति तस्मात् ते ते वर्णाः भिन्ना एव। न च व्यञ्जकवायोरेव तद्गकारादिगतत्वेन भासत इति वाच्यम्। गकारगतत्वे बाधकाभावात्। न च स एवायं गकार इति प्रत्यभिज्ञानं बाधकं तस्य शुकस्य आकारभेदः (?) गकारविषयाभेदकत्वात्। अन्यथा स एवायं गकार इति प्रत्यभिज्ञाने सत्यपि जायमानवर्णविशेषानुमितिः न स्यात्। न च व्यञ्जकवायोरेव वैलक्षण्यं स्यात् तस्य गकारावृत्तित्वात् तस्मात् यथा शुक्ला गौः कृष्णा गौरिति भेदे प्रतीयमानेऽपि गवाकारानुगतप्रतीतिः गोत्वमूला तथा शुकादिगकारेषु भेदे भासमानेऽपि अयं गकारोऽयमपि गकार इति प्रतीतिः गत्वमूलं भवेत् तथा च अभेदप्रतीतेः तज्जातीयविषयतया प्रत्यभिज्ञानस्यापि यथार्थता स्यात्।

---

1. क - 'प्रतीत्यनन्तरं' इति पाठः लुप्तः।
2. क - 'स्त्रीत्वं न केषु' इति पाठः।
3. क - 'भेदेषु' इति पाठः।

ननु गात्वदिकं न जातिर्भवति इति चेन्न। यदि गत्वादिकं न जातिस्तदा कोलाहल इति प्रत्ययो न स्यात्। भवति हि घटादौ बहुभिः वर्णोच्चारणे कृते दूरस्थस्य अनभिव्यक्तकत्वगत्वाकारादिवर्णविभागं कोलाहलं श्रृणोमीति। तथा च तत्र गत्वादेः अग्रहणकृत एव कोलाहलः प्रत्ययः। न च कोलाहलो नानाभिव्यक्तगकारादिवर्णविभागः, किन्तु ध्वनिरूपशब्द एवेति वाच्यम्। तदुत्पादकस्य भेर्यादेः अभावेऽपि जायमानत्वात्। न च वर्णोत्पादक एव ध्वन्युत्पादक एवेति साम्प्रतं, सर्वत्र ध्वन्युत्पादप्रसङ्गात्। तस्मादवश्यं गत्वादिजातिरूपेया, यदग्रहे कोलाहलत्वोव्यपदेशः। किञ्च तारत्वमन्दत्वाश्रयत्वेनापि अनित्यत्वसिद्धिः। तथाहि शब्दो नित्यः उत्कर्षवत्त्वे सति अपकर्षवत्त्वात् मधुरसवत्, परमाण्वाकाशयोः व्यभिचारवारणाय प्रत्येकं पदद्वयं भावपदार्थविभाजकोपाधिसाक्षाद्व्याप्यधर्मावच्छेदेन तदुभयाश्रितत्वं बोध्यम्। अतः तारमन्दगकारयोः भेदेऽपि शद्बत्वपुरस्कारेण एतदुभयमस्तीति।

ननु स्वरूपासिद्धो हेतुः, यद्वा गुणानधिकरणत्वे सति प्रत्येकमेव हेतुः इत्यतो न परमाण्वादौ। न च उत्कर्षापकर्षयोः जातित्वे जातिसङ्करः। तत्तद्व्याप्यभिन्नाङ्गीकारेण अदोषात्। न च ताराकारानुगतप्रतीत्यनापत्तिः सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वम् अनुगतं नानातारत्वेषु। प्रतिबध्यतावच्छेदकत्वं च मन्दत्वेषु इति आभ्यामेव अनुगतप्रत्ययव्यवहारौ एतज्ज्ञाने तयोरभावमेव तस्माद्भेदे भासमाने प्रत्यभिज्ञायाः सजातीयत्वं विषयः, न व्यक्त्यभेद इति। न सा शब्दनित्यतायां प्रमाणम्। न चैवं तज्जातीयोऽयमिति स्यात्, न तु सोऽयमिति वाच्यम्। तज्जातीयप्रतीतेरपि सोऽयमित्याकारादर्शनात् यदन्येन कृतमौषधं भुज्यते च तन्मयापि कृतं भुज्यते चेत्यादिषु। किञ्च यथा शंखादिध्वनीनाम् उत्पादविनाशप्रत्ययः तारत्वमन्दत्वविरुद्धधर्मसंसर्गाच्च अनित्यत्वं

त्वन्मते[1] सिद्धं "सैवेयं गूर्जरी" इत्यादिप्रत्यभिज्ज्ञानं तज्जातीयविषयादुच्यते तथा वर्णविषयप्रत्यभिज्ञा च उच्यताम्। अनित्यत्वं च तद्वदेवोच्यताम्, अन्यथा ध्वनयोऽपि नित्याः स्युः, अविशेषात्, तस्मात् "वर्णोः नित्यः सामान्यवत्वे सति अस्मदादिबहिरिन्द्रियग्राह्यत्वात् घटवत्, अस्मदादिप्रत्यक्षगुणत्वात् रूपवत्"। आत्मैकत्वप्रत्यक्षपक्षे अस्मदादिप्रत्यक्षविशेषगुणत्वात्, व्यापकसमवेतप्रत्यक्षविशेषगुणत्वत्, अनात्मप्रत्यक्षगुणत्वात्, अव्याप्यवृत्तित्वात्। न च अप्रत्यक्षधर्मतावच्छिन्न साधनावच्छिन्नसाध्यव्यापकस्य रूपवत्समवेतत्वस्य उपाधित्वं, ध्वनिष्वेवमाध्यव्याप्तेरिति सर्वमवदातम्।

ननु शब्दस्य गुणत्वमसिद्धम्, तथाहि शब्दो द्रव्यं समवायाभावान्यत्वे सति साक्षादिन्द्रियसम्बन्धवेद्यत्वात्,[2] स्वरूपसम्बन्धातिरिक्तसाक्षात्सम्बन्धेन गृह्यमाणत्वात् वा घटवत्, श्रोत्रं वा द्रव्यग्राहकं निरवयवेन्द्रियत्वात् मनोवत् गुणवत्त्वाभावेनैवमिति चेन्न। [3]संख्यादिवेगादीनामेव तद्गुणत्वात्। न च तद्गत्त्वप्रतीतिः भ्रान्तबाधकाभावात् इति चेन्न। शब्दो न द्रव्यम् आत्मभिन्नत्वे सति निरवयवेन्द्रियग्राह्यत्वात् सुखवत्। श्रोत्रं वा न द्रव्यग्राहकं चक्षुस्त्वन्यबहिरिन्द्रियत्वात्। रसनवत् सत्प्रतिपक्षत्वादिति ।। श्री नृसिंहः।।

क्रमप्राप्तां बुद्धिं लक्षयति – 'अर्थे'ति। प्रकाशोबुद्धिरित्युक्ते प्रकाशनामके कस्मिंश्चित् पदार्थेऽतिव्याप्तिः स्यात् अतः अर्थेति। ननु करणव्युत्पत्त्या अर्थप्रकाशः आलोकादिः भवत्येव। अतः कथं पुनः नातिव्याप्तिः इति चेन्न। बुद्धित्वजातिः यत्रप्रवृत्तिनिमित्तं तत्पदवाच्यप्रकाशो बुद्धिरित्यर्थः। तथा च भावव्युत्पत्तिरेव

1. ग – 'अपि' इति अधिकः पाठः।
2. क – 'इन्द्रिय' इति पाठः लुप्तः।
3. क – 'संख्यादि' इति पाठः लुप्तः।

आश्रयणीयेति ।। श्री नृसिंहः ।।

सुखलक्षणमाह – 'प्रीतिरि'ति । अत्रापि पर्यायशब्देन लक्षण-निर्वाहः । तथापि सुखत्वजातौ तात्पर्यम् । यद्वा धर्मासाधारणगुणात्मगुणत्वं बोध्यम् । एतच्च चन्दनाद्यभिमतविषयोपलब्धिजम् उत्पन्नमात्रवेद्यम्, एतच्च किञ्चिद् वैषयिकं तत्रोक्तमेव । किञ्चिन्मानोरथिकं यथा मनोराज्यादिकम् । किञ्चिदाभिमानिकं यथा कुल्याधिकरणस्य दरिद्रस्य प्रासादाधिकरणजं किञ्चिच्चैतत् आभ्यासिकं, यथा सत्तार्किकस्य सद्युक्तिस्मरणजं ज्ञानातिरिक्तं सुखं नास्तीति चेन्न, घटमनुभवामि सुखम् अनुभवामीति प्रतीतिभेदात् स्वर्गसांसारिकोपान्तरभेदवच्च । स्वर्गश्च-

"यन्न दुःखेन संभिन्नं,
न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत्,
तत्सुखं स्वः पदास्पदम् ।।

इति सांसारिकं चोक्तमेव तच्चेति । अमुमुक्षुसर्वात्मनाभ् अपेक्षणीयत्वेनैव वेदनीयमित्यर्थः इति ।। श्री नृसिंहः ।।

[1]दुःखलक्षणमाह – 'पीडे'ति । इदञ्चानिष्टविषयः अनपेक्षणीयत्वेनैव वेदनीयमित्यर्थः ।

इच्छालक्षणमाह – 'राग' इति । पदमिच्छात्वमुपलक्षयति । द्वेषान्यत्वे सति प्रयत्नासाधारणकारणात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्वं वा कामोऽभिलाषः । रागः, वैराग्यं, सङ्कल्पः, स्पृहा, तृष्णा, लोभः, वाञ्छा इत्यादयः इच्छाविशेषाः, कारुण्यं कापट्यंभावः इत्यादयोऽपि इच्छैव । गुणभाष्ये तथा दर्शनात् । पुनः पुनः विषयानुरञ्जने इच्छारागः, मैथुनेच्छा – कामः, अभ्यवहर-

1. क – 'दुःखलक्षणम्' इत्यारभ्य 'वेदनीयमित्यर्थः' पर्यन्तः भागः नास्ति ।

णेच्छाअभिलाषः, दोषदर्शनात् विषयपरित्यागेच्छा वैराग्यम्, अना- सन्नक्रियावश्यं कर्तव्यतेच्छा – सङ्कल्पः, परद्रव्यादौ[1] इच्छास्पृहा, अवश्यं कर्तव्यत्वेऽपि सर्वद्रव्यपरित्यागेच्छातृष्णा, अन्यायेन परद्र- व्येच्छा – लोभः, परदुःखनिवारणेच्छा – कारुण्यं, परदोचनेच्छा (?) – कापट्यम्, अन्तर्निगूढेच्छा भावः। विषयः चास्य अप्राप्त एव सिद्धे इच्छाविरहादिति ।। श्री नृसिंहः ।।

द्वेषलक्षणमाह – 'क्रोध' इति। अत्रापि क्रोधपदं द्वेषतोऽपि [2]फलकम्, दुःखासाधारणकारणकात्मगुणत्वस्य इच्छान्वयत्वे सति प्रयत्नकारणात्मविशेषगुणत्वस्य वा उपलक्षकम्।

ननु यत्र दुःखं नोत्पन्नं तद्धेतौ च द्वेष उत्पद्यते तत्र व्यभि- चारात् कथं दुःखकारणं स्यादिति चेन्न। तत्र तदनुमानाद्यनुभ- वादेव, एवमतीतस्थलेऽपि। मानं चात्र यस्मिन्नुत्पन्ने आत्मानं ज्व- लितमिव मन्यते तादृशं प्रत्यक्षमेव, परकीयश्च मुखवैकृत्या द्य- नुमेयः। निवृत्तिलक्षणप्रवृत्तिजनकश्च अयमिति ।। श्री नृसिंहः ।।

प्रयत्नं लक्षयति – 'उत्साह' इति। अत्रापि पर्यायपदेन प्रय- त्नत्वं जातिः लक्ष्यते। सोऽयं द्विविधः। जीवनयोनिराद्यः परश्च (प्रवृत्तिनिवृत्तिरूपः) आद्यस्तु सुषुप्तस्य प्राणादिनातीन्द्रियः अनु- मेयश्च प्राणादिगमनेनैव। जाग्रद्दशायां चेष्टादिप्राणादिक्रियायोश्च प्रयत्नजन्यत्वदर्शनेन सुषुप्तस्य तयोः प्रयत्नजन्यत्वानुमानम्, अतो नादृष्टेनान्यथासिद्धिः। द्वितीयस्तु इच्छाद्वेषजन्यः। इत्येषी बुद्ध्या- दिवत् द्विक्षणमात्रावस्थायित्वम्। परस्परवध्यघातकभावश्चेति ।। श्री नृसिंहः ।।

---

1. क – 'रः इत्यादौ' इति पाठः।
2. क – 'करणं' इति पाठः।

धर्माधर्मौ लक्षयति – 'धर्मे' ति। सुखासाधाणकारणं धर्मः दुः-खासाधारणकारणं चाधर्म इति प्रत्येकमेव लक्षणम्। ननु अनयोः किं प्रमाणमित्यत आह – 'तावि' ति। तदनुमानमाह – 'देवदत्तस्यें' ति। आत्मनः संयोगेन अर्थान्तरवारणाय विशेषेति। आत्मना व्यभि-चारवारणाय कार्येति। यज्ञदत्तशरीरे व्यभिचारवारणाय देवदत्तेति। देवदत्तशरीरात् पूर्वं देवदत्तविशेषगुणान्यस्य अभावात्। पक्षधर्मता-बलात् तावेव सिध्यत इत्याह – 'यस्त्वि' ति। ।। श्री नृसिंहः ।।

संस्कारं विभजते – 'संस्कार' इति। लक्षणं च संस्कारत्ववत्त्व-मेव। [1]आद्यस्य आश्रयमाह – 'तत्रे' ति। कार्यमाह – 'क्रिये' ति। द्वि-तीयस्याश्रयमाह – 'भावने' ति। कारणमाह – 'अनुभवे' ति। कार्यमाह-'स्मृती' ति। ननु चेदेवं तर्हि सदैव न कथं स्मृतिं जनयेत् इत्यतआह-'सचे' ति। एनमर्थं स्पष्टयति – 'उदि' ति। ननु सहकारिणः च कालो-दयः तथासति स दोषः तदवस्थ एव इत्यत आह – 'सहकारिणश्चे'-ति। अत्रार्थे पूर्वसम्मतिमाह – 'यथोक्तमि' ति। अयं च अतीन्द्रियः केवलं स्मृत्यनुमेयः। तृतीयस्य आश्रयमाह – स्थितेति। 'स्पर्शवदि' ति। कियत्स्वेव स्पर्शवत्सु वर्तते, न सर्वस्पर्शवत्सु इत्यर्थः। आत्मवि-शेषगुणान् भिन्नत्वेन कथयति – 'एते चे' ति।

कर्मनिरूपणम्

गुणपदार्थं निरूप्य अग्रेकर्मनिरूपणं करिष्यमाणः पूर्वापरस-ङ्गतिं दर्शयति – 'गुणा' इति। ननु संयोगविभागातिरिक्तं कर्मैव नास्तीति चेन्न। चलतीति प्रत्ययस्य संयोगाद्यविषयकत्वात्,

1. क – 'आद्यस्य' इति पाठः लुप्तः।

अन्यथा संयुक्तयोः निश्चलयोः चलतीति मतिः स्यात्। कर्मलक्षणमाह – 'चलने'ति। चलतीति सार्वलौकिकानुगतमत्या कर्मत्वजातिः सिद्धा, सैव लक्षणमिति भावः। संयोगविभागान्यतरासमवायिकारणमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं, जन्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं वा। आश्रयमाह – 'गुण इवे'ति। द्रव्यातिरिक्तेन वर्तते किन्तु कतिपयेष्वेवेत्यर्थः। विशिष्य आश्रयं कथयति – 'अविभ्वि'ति। अवच्छिन्नपरिमाणयोगी इत्यर्थः। एतत्कार्यं कथयन् त्रिक्षणावस्थायित्वमाह - 'विभागद्वारे'ति। नाशश्चास्योत्तर संयोगात्, कदाचित् आश्रयनाशाच्च। कर्मवति च कर्म नोत्पद्यते कुत एतदिति चेन्न। एकस्यां दिशि यदि संयोगविभागौ ताभ्यामुत्पाद्यौ तदा एकवैयर्थ्यमेव। यदि च विरुद्धदिशोः संयोगविभागौ द्वाभ्यां जननीयौ तदा परस्परविरोधेन नैकस्यापि जनकत्वं स्यात्। द्वीन्द्रियग्राह्यं चैतत्, कर्मत्वसाक्षाद्व्याप्यजातयः पञ्चैवेत्यभिप्रायेण तं विभजते - 'तच्चे'ति।

ननु भ्रमणादीनामपि सत्त्वात्[1] कथं पञ्चैवेत्यत आह - 'भ्रमणादय' इति। आदिशब्देन निष्क्रमणप्रवेशनस्यन्दनोर्ध्वज्वलनपतननमनोन्नमनरोचनानां संग्रहः। यदि गमनग्रहणेनैव भ्रमणादीनां संग्रहः, किमपराद्धम् उत्क्षेपणादिना। ऊर्ध्वं गच्छतीति उत्क्षेपणम् अधो गच्छतीति अपक्षेपणम्। एवं वस्त्रचर्मकम्बलाद्यवयवानाम् अन्योन्याभिमुखगमनम्[2] आकुञ्चनम्। पुनस्तेषामेव अवयवानां नानादेशगमनं प्रसारणम्। नियतदिग्देशक्रियासन्ततिः गमनम्। एवं सर्वत्र गमनपदप्रयोगात् एकविधमेव कर्मेति[3] कथं पञ्चेति विभागः क्रियते इति चेन्न। यथा द्रव्यपदस्य पृथिव्यादिनवके

---

1. क – 'सत्त्वात् कथं' इति पाठः लुप्तः।
2. क – 'गमनम् आकुञ्जनम्' इति पाठः लुप्तः।
3. क – 'कर्मेति–कथं' इति पाठः लुप्तः।

शक्तावपि लोके धने काञ्चने च[1] प्रयोगदर्शनात् तत्रापि शक्तिः, एवं गमनशब्दस्य स्पन्दनमात्रशक्तावपि नियतदिग्देशक्रियासम्पत्तावपि शक्तिः तथा च गमनपदप्रयोगसाम्येऽपि सामान्यविशेषभावेन गमनत्वसाक्षाद्व्याप्यजातिः गमनत्वं भिन्नमेव। तथा च कर्मगमनपदयोः पर्यायत्वे सिद्धे गमनपदस्य च कर्मविशेषमात्रवाचकत्वे च निर्णीते उत्क्षेपणत्वादि कर्मत्वसाक्षाद्व्याप्यजातिपञ्चकम् आदाय विभागः कृतः।

भ्रमणत्वादिकं न जातिः, तथाहि मण्डलाकारेण [2]वर्तमानेषु गृहेषु वारं वारं गृहात् गृहं व्रजन्त्यां कामिन्यां भ्रमः, गच्छति प्रविशति निष्क्रमति इत्यादि प्रमायाः सत्त्वेन तत्क्रियायां सङ्करस्य सत्त्वात्। एवमन्ये स्पन्दनत्वादयो न जातय इति। गमनग्रहणेनैवेति, मूलंतु भ्रमणादीनां कर्मपदवाच्यत्वेऽपि गमनत्वसाक्षाद्व्याप्यजातिमत्त्वम्। अतो न तानादाय विभागः कृतः इत्येवं परं बोध्यम्।

यद्वा भ्रमणं च केवलकर्मपदवाच्यं, नतु कर्मत्वसाक्षद्व्याप्यजातिपुरस्कारेण प्रवृत्तशब्दवाच्या इत्येवं परं बोध्यम्। इह यद्यपि उत्क्षेपणादयो नानापदार्थघटितत्वात् उपाधाय एव न जातयः तथापि एता इक्षुक्षीरमाधुर्यादिवत् विशिष्य निर्वक्तुमशक्या अपि अनुभवैकवेद्याः, अत एव वह्न्यादौ नियतोर्ध्वदेशगामित्वेन ऊर्ध्वं गच्छतीति प्रयोगो न तु उत्क्षिपतीत्येवं चोर्ध्वं गच्छतीति उत्क्षेपणम् इत्यादिना उत्क्षेपणादिपञ्चकर्मणां किञ्चित्साधर्म्यपुरस्कारेण ऊर्ध्वं गच्छतीति एतत्पदवाच्यम् [3]उत्क्षेपणरूपम्। कर्मत्वादिपुरस्कारेण पञ्चानामपि कर्मणां स्वरूपाख्यानमेव कृतं न तु

1. ग – 'काञ्चनादौ' इति पाठः।
2. क – 'वर्तमानेषु' इति पाठः लुप्तः।
3. क – 'उत्क्षेपणरूपम्' इति पाठः लुप्तः।

लक्षणमिति रहस्यम्। अस्य संक्षेपतः कारणं कथ्यते। चेष्टायाः प्रयत्न..............र संयोगसमवायिकारणं, निमित्तकारणं प्रयत्नादृष्टादि, समवायिकारणं चेष्टायाः शरीरं, हतस्तादिचेष्टायाः हस्तादि इत्येवं जीवनयोनिप्रयत्नपदार्थवायुसङ्गात्[1] संयोगात्प्राणादिषु कर्म एवं च क्वचित् प्रयत्नं विनापि गुरुद्रवत्ववेगान् व्यस्तान् समस्तान् वा अपेक्षमाणो यः संयोगविशेषान् अनूद्य नोदकयोः अविभक्तयोः तस्मात् अपि यथा पङ्कीभूतायाः पृथिव्याः स्पर्शवद्वेगवत् द्रव्यसंयोगमाह – अभिभूतो यः तस्मादपि पाषाणादिषु क्वचिद्गुरुत्वात् पतनमाद्यं फलादेः इति द्वितीयादिकर्मसन्ततिस्तु गुरुत्ववेगाभ्यां परं जलबिन्दुकणादावपि आद्यं कर्म उत्पाद्यतां गुरुत्वादेव द्विरुत्ववेगाभ्यामेव। न च गुरुत्वादेव कम वेगसत्त्वेऽपि विदतीयादिकंतु तस्य आवश्यकत्वादिति वाच्यम्। अन्यत्र गृहीतसामर्थ्युस्य अन्यत्र व्यर्थयितुम् अशक्यत्वात अन्यथा आद्यपनने गुरुत्वस्य असमवायिकारणत्त्वेपि द्वितीयादिकर्मणि वेग एवास्तु। करणं च घनतरमूर्तद्रव्य संयोगपर्यन्तं वेगजननस्य आवश्यकत्वात् क्वचिच्च घनतरमूर्तद्रव्योसंयोगेऽपि वेगो नश्यति यथा तीव्रवेगात् भूमिपतितस्यापि कन्दुकस्य उत्पन्ननिपातनादेवमेव नोदनादिना आद्यम् अहिः कर्म तत्कर्मकारित्त्वाच संस्कारात पुनः कर्म तस्मात् पुनः संस्कारः इति क्रमेण घनतरमूर्तद्रव्यसंयोगे पर्यन्तम् उत्पद्यते। क्वचित् शरोऽपि घनतरमुर्तद्रव्यसंयोगे सत्यपि उत्तरोत्तरं वेगवानेवावतिष्ठते। अत्र कुल्यादिकं भित्त्वा निस्सरति। क्वचिच्च द्वितीयादिकर्मसन्तानस्तु द्रवत्ववेगाभ्वां यथा द्वितियादि कर्म सन्ततिः स्रोती भूतानामपाम्, आसामेव आद्यं कर्मकेवलद्रव्यत्त्वात्, क्वचित् प्रयत्नं विनैव मनोवायवह्निगमनम् अदृष्टवत् आत्म सम्बन्धात्। एवमेव द्वयणुकजनने परमाणुकर्मणः

1, क – 'पपार्थवायुसङ्गात्' इति पाठः लुप्तः।

मन्त्रादिना विशकलमण्डाद्यौपथानां[1] (?) चलनानि च सर्वाणि अदृष्टवदात्मसंयोगादेवेति दिक् ।

सामान्यनिरूपम्

सामान्यलक्षणमाह – 'अनुवृत्ती'ति । अनुवृत्तिप्रत्ययासाधारणकारणमित्यर्थः । अनुवृत्तिप्रत्ययासाधारणकारणवृत्तिपदार्थविभाजकोपाधिमत्वं, द्रव्यगुणवृत्तिपदार्थ विभाजकोपाधिमत्वं, कर्मवृत्तिवृत्ति गुणवृत्तिपदार्थविभाजकोपाधिमत्वं वा बोध्यम् । इदं द्विविधं जातिरूपम् उपाधिरूपं च । येषां मते परस्परासम्बन्धात् जातिरेव उपाधिः तेषां मते द्वैविध्यम् । तस्याश्रयमाह – 'द्रव्यादी'ति । ननु व्यक्तिनाशात् किं नैतस्यापि नाश इत्यत आह – 'नित्यमि'ति । यतो नित्यम् अतोनतन्नाश इत्यर्थः । ननु असति (?) घटनाशेऽपि कुतो नोपलभ्यते इति चेन्न । कारणाभावात् । व्यक्तौ गृह्यमाणायामेव जातेर्ग्रहणमत एव व्यक्तियोग्यतान्तर्गतयोग्यताकत्वं जातौ सुप्रसिद्धम् । न च धर्मे निराश्रयत्वस्य वक्तुमशक्यतया घटनाशे भूतलमेव तदाश्रयो वाच्यः । तथा सति घटत्त्वेन भूतलमेव प्रतीयेतेति वाच्यम् । सर्वजगदाधारकालाधारत्त्वेन निराश्रयत्त्वाभावात्, समवायाभावाच्च न काले घटत्वप्रतीतिः । ननु काले घटत्वसमवाययोः सत्त्वदशामां पादुकयापि (तस्यापि) घटत्वेन प्रतीतिः स्यादेवेति चेन्न । येन सम्बन्धेन घटे घटत्त्वं तेन सम्बन्धेन कालेऽस्ति घटे च घटत्त्वस्य वृत्तिः समवायेन समवायस्य च वृत्तिः सहोपस्थितिः अथ विशेषेण अत एव स्वरूपसम्बन्धविशेषत्वेऽपि येन सम्बन्धेन घटे घटत्त्वसमवायः तेन सम्बन्धेन काले घटत्त्वसमवायः अत एव काले लक्षणमात्रमतिव्यापकमित्यपि चोद्यं

1. ग – 'शा' इत्यत्र 'धा' इति पाठः ।

भिरस्तम् ।

एकव्यक्तिमात्रसमवेतस्यजातित्वं नास्तीत्यभिप्रायेणाह - 'अनेके'-ति। एवं नित्यमनेकसमवेतमिति लक्षणमुक्तं जातिरूपसामान्यस्य। इयं च जातिः क्वचित् कार्यतावच्छेदकतया क्वचित् कारणतावच्छेदकतया क्वचिच्च अनुगतप्रत्ययानुरोधेन सिध्यति। तथा च यो धर्मः कार्यतावच्छेदकः, कारणतावच्छेदकः केवलं स्यादिति वाच्यम्। अवाच्यस्यापि तस्य दृढतरसंस्कारबलादेव उपस्थित्युपपत्तेः।

यद्वा आकाशपदान्निर्विकल्पकम् एव केवलं, नतु विशिष्टज्ञानम्। तुल्यत्वमपि ज्ञानत्वोपलब्धित्वयोः अत एव एतयोः एकैव जातिः। तुल्यत्वं चात्र अन्यूनानतिरिक्तवृत्तित्वम्। सङ्करोऽपि यथा भूतत्वमूर्तत्वयोः। तथाहि भूतत्वं हि मूर्तत्वात्यन्ताभाववति आकाशे वर्तते, एवं मूर्तत्वमपि भूतत्वात्यन्ताभाववति मनसि वर्तते। अनयोः अत्यन्ताभावसमानाधिकरणयोः एकत्र घटे समावेशात्। यद्येवं तर्हि का अनयोः जातिस्तु इति चेन्न। कार्यतावच्छेदकादिनियामकाभावेन विनिगमकाभावात्। अनवस्थापि, तथाहि सामान्ये अनुगतप्रतीत्यनुरोधेन जात्यङ्गीकारे तत्रापि तदनुरोधेन जात्यन्तराङ्गीकारः; स्यादेवम् उत्तरोत्तरगवेषणायाम् अवस्थितेः अभावात्। रूपहानिरपि यथा विशेषपदार्थे, स चैवं विशेषे सामान्याङ्गीकारे अचलात्मकत्वे सति सामान्यवान् अगुणो गुण इति गुणलक्षणयोगात् विशेषोऽपि गुणपदार्थ एव स्यादिति। असम्बन्धोऽपि यथा जातिव्यक्त्ययोः समवाय एव सम्बन्धः स च आत्माश्रयात् समवायेनास्त्येव, यद्यपि व्यक्तिभेदेनैव जात्यभाव इति समवाये वक्तुं शक्यत एव तथापि अयमपि भिन्नो दोष इति ज्ञापयितुं इयं रीतिरुक्ता। अत्र अर्थकारिका-

"व्यक्तेरभेदः तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः" ।। इति ।

तदेतद्विभजने – 'तच्चे'ति । परं व्यापकैकस्वरूपम्, अपरं व्याप्यरूपम् । परं किं सामान्यं तत्राह – 'परं सत्ते'ति अत्र हेतुमाह – 'बह्वि'ति । बहुषु आश्रितत्त्वादित्यर्थः । ननु बह्वाश्रिते द्रव्यत्वादौ अपरत्वव्यवहारोऽपि दृष्ट एव तद्वत्प्रकृते कथं न स्यादित्यत आह – 'सा चे'ति । सा चेयं सत्ता एकार्थसमवायरूपप्रत्यासत्त्या सामान्यादावपि सदिति अनुगतप्रतीतिमात्रहेतुः तत्सामान्यमेव न तु द्रव्यत्वादिवत् विशेषोऽपि इत्यर्थः । यद्वा परं सत्ता स्याद्यदि किञ्चित्प्रमाणं स्यादित्यत आह – 'बहुविषयत्वादि'ति । अनेकसमवेतत्त्वादित्यर्थः ।

ननु एतत्पथा संयोगादौ अनैकान्तिकम् अत आह – 'साचे'ति । अनुगतप्रतीतिमात्रकारणत्वात्, सत्ता सामान्यं परजातिः इत्यर्थः । नित्यत्वे सतीत्यपि विशेषणं बोध्यम् । तथा च विमता सत्ता परजातिः नित्यत्वे सति अनेकसमवेतत्त्वात् । अनुगतप्रतीतिमात्रकारणात् द्रव्यत्ववदिति व्यतिरेकानुमान प्रतिपादनपरोऽयं ग्रन्थः । अस्याश्च द्रव्यत्वादीनि साक्षाद्व्याप्यानि पृथिवीत्वादीनि परम्पराव्याप्यानि सत्तायाश्च न साक्षाद्व्याप्यत्वं न वा परम्पराव्याप्यत्वमपीति भवति व्यापकैकस्वरूपता । साक्षाद्व्याप्यत्वं च तद्भिन्न तद्व्याप्यंव्याप्यत्वे सति तद्व्याप्यत्वम्, एतच्च अभेदेऽपि समानम् । अपरसामान्यमाह – 'अपरमि'ति । अत्र हेतुमाह – 'अल्प विषयत्वादि'ति । सत्तापेक्षयेति शेषः । परं सदपरमित्यर्थः ।

सामान्यमसहमानं बौद्धं पूर्वपक्षत्वेन उत्थापयति – 'अत्रे'ति । व्यक्त्यतिरिक्तं भावरूपं सामान्यं नास्तीत्यर्थः । सिद्धान्तं वक्तुं

प्रतिजानीते – 'अत्रे'ति। तमाह – 'किमालम्बने'ति।

अन्यथासिद्धिमाशङ्कते – 'नन्वि'ति। 'विधिमुखेने'ति। अयं भावः। अतद्व्यावृत्तिकृत एव एकाकारप्रत्ययश्च इति ब्रुवाणः प्रष्टव्यः। इयमतद्व्यावृत्तिः किं ज्ञाता प्रयोजिका? आहोस्वित् अज्ञाता वा? नाद्यः गोत्वावच्छिन्न प्रतियोगिकान्योन्याभावरूपायास्तस्याः गोत्वादिज्ञानमन्तरेण ज्ञातुमशक्यत्वात्। अन्यथा शबलापि अगोरेव स्यात्। व्यक्त्यन्तरभेदस्य तत्रापि सत्त्वात्। किञ्च गोज्ञानाधीनं निषेधज्ञानं निषेधज्ञानाधीनं गोज्ञानमिति अन्योन्याश्रयपिशाच्याग्रहोऽपि। नान्त्यः गोसंनिकर्षमात्रे सति व्यासङ्गदशायामपि सर्वदा गवाकारानुगतप्रतीत्युदयप्रसङ्गात्। किञ्च तन्मते अभावस्य अशक्यतया ज्ञानं न सम्भवति इन्द्रियसंनिकर्षादेः अभावात्। न च- "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति" इति जार्गति इति वाच्यम्। न ह्ययं वेदः कारणाभावेन जन्यज्ञानस्य ब्राह्मणापि वक्तुम् अशक्यत्वात्। तस्मादगोत्वादिकं सामान्यं सविकल्पकनिर्विकल्पकविषयतया अकामेनापि स्वीकर्तव्यमिति भावः॥ श्री नृसिंहः॥

विशेषनिरूपणम्

विशेषपदार्थं निरूपयति – 'विशेष' - इति। नित्यद्रव्यसमवेतः समानगुणकर्मादि धर्मेषु वक्ष्यमाणानित्यद्रव्येषु परस्परं व्यावृत्तिहेतुः बुद्धिः या स विशेष इत्यर्थः। इयं च बुद्धिः योगिनामस्ति। लक्षणं तु नित्यमात्रवृत्तिमात्रवृत्तिपदार्थविभाजकोपाधिमत्त्वं वा वैशेषिकमते समवायेऽतिव्याप्तिवारणाय समवेतेति न देयमेव वा।

ननु एषां व्यावृत्तिः अन्योन्याभावकृतैवास्तु इति चेन्न। समानजातिगुणकर्मणः परमाणवः अन्योन्यव्यावर्तकसमवायिधर्मविशिष्टप्रतीतिविषयाः द्रव्यत्वात्, घटवत् इत्यनुमानात् भावरूपधर्मसिद्धेः प्रतियोगिभेदासिध्यौ तदन्योन्याभावानामपि भेदासिद्धेश्च। एतेन पृथक्त्वादिकमेव भेदकमिति परास्तम्। तस्य परमाण्वन्तरवृत्तिपृथक्त्वादिना सदृशत्वात्।

ननु अतीन्द्रियेषु एतेषु परस्परव्यावत्तिबुद्धिरस्ति इत्यत्र किं प्रमाणमिति चेन्न। घटादिदृष्टान्तेन द्रव्यत्वेन हेतुना तदनुमानात्। ते च विशेषाः स्वतो व्यावृत्ताः अन्यस्मात् व्यावर्तयन्ति अतः अन्त्या इत्युच्यन्ते ।। श्री नृसिंहः ।।

समवायनिरूपणम्

समवायं लक्षयति – 'अयुतसिद्धयोरि'ति। ग्रन्थविस्तरभयादाह- 'स चे'ति। असमवेतनिर्गणभावत्वम् असमवेतभावमात्रवृत्तिपदार्थविभाजकोपाधिमत्त्वं नित्यसम्बन्धत्वमिति लक्षणं बोध्यम्।

ननु कथमस्य नित्यत्वम्, प्रत्युत संयोगदृष्टान्तेन अनित्यत्वस्य सुखसाधनत्वादिति चेन्न। नाशकाभावात्। तथाहि इह जगति भावनाशकाः [1]समवाय्यसमवायिविरोधिगुणप्रादुर्भावाग्निसंयोगाः एव। समवायिकारणाभावे नाद्यस्य सम्भव एव। न द्वितीयोऽपि गुणभिन्नत्वात् न तृतीय [2]तुरीयौ आत्मादिव्यक्तौ [3]कदाचित् आत्मत्वाभावप्रतीतिप्रसङ्गात् नित्यत्वमविकलम्।

---

1. क-ख – 'नानाविध' इति पाठः।
2. ग – 'चतुर्थौ' इति पाठः।
3. क – 'कदाचित्' इति पाठः लुप्तः।

अयं चैक एव। ननु रूपसमवायपटसमवायरसमवाया भिन्ना इत्यादिप्रत्ययानां जागरूकत्वात् कथमेक एवेत्युच्यते[1] इति चेन्न एतेषां प्रतियोगिमात्रभेदविषयत्वात्। अन्यथा दण्डसंयोगो भिन्नः इत्यादिप्रतीत्या संयोगस्यापि भिन्नत्वं स्यात्। यद्येवायं भ्रमः तर्हि [2]प्रकृतेऽपि समानम्।

ननु स्यादेवं यदि समवाये प्रमाणं स्यादिति चेन्न। इह गुणिषु गुणाः एवमिह क्रियावति क्रियाः इह व्यक्तौ जातिः इत्यादिप्रत्यक्षस्यैव प्रमाणत्वात्। न च स्वरूपसम्बन्धनिमित्तकमेव एतत् स्वरूपद्वयात्मकोऽपि स्वरूपसम्बन्धः स्वरूपद्वयं च अननुगतमेव। अतः अनुगतसमवायेनोपपत्तौ अननुगतस्वरूपसम्न्धनिमित्तकत्वस्य अनुचितत्वात्। ननु गतेषु तत्तत्स्वरूपद्वयेषु स्वरूपसम्बन्धत्वप्रकारकानुगतप्रतीतिः कथं स्यादिति चेन्न। सम्बन्धान्तरमन्तरेणापि विशिष्टप्रतीतिजनकयोग्यत्वस्य अनुगतस्य सत्वात्।

अथ घटाभाववद् भूतलमित्यादिषु इव विशिष्टानुगतप्रतीत्यनुरोधेन वैशिष्ट्याख्यः सम्बन्धोऽङ्गीकार्यः। न। वैशिष्ट्येऽपि वैशिष्ट्यप्रतीतेः सत्वात् तत्रापि वैशिष्ट्यान्तरस्वीकारे तु अनवस्था। अतः तत्र यथा स्वरूपसम्बन्धनिबन्धना वैशिष्ट्यप्रतीतिः तथा भावाभावयोरपि स्वरूपसम्बन्धेनैव प्रतीतिरिति वाच्यम्। समवाये समावायत्वप्रतीतिः स्वरूपसम्बन्धनिबन्धना अतो गुणवैशिष्ट्यप्रतीतिरपि एवं निबन्धना इत्यस्यापि सुवचत्वात्। न च समवायो नित्य एकोऽङ्गीक्रियते इति वाच्यम्। वैशिष्ट्येऽपि एतस्य वक्तुं शक्यत्वात् तस्माद्भावानां यथा नित्यः सम्बन्धः समवायः तथा भावाभावयोः वैशिष्ट्यमपि। यद्येवं तर्हि घटा-

1. 'एवेत्यूच्यते इति चेन्न, एतेषां' इति पाठः लुप्तः।
2, क – 'तर्हि प्रकृतेऽपि' इति पाठः लुप्तः।

भाववति पटवति घटाभावधीप्रसङ्गः। न च परः प्रतिबन्धक इति वाच्यम्। वैशिष्ट्यस्य एकत्वेन प्रतिबन्धकाभावस्यापि सत्त्वादिति चेन्न। वायौ स्पर्शसमवायसत्त्वेन समवायस्यैकत्वेन रूपस्यापि सत्त्वं स्यादिति सर्वं समवाये समानमेवेति।

अत्रोच्यते – वायौ रूपसमवायसत्त्वेऽपि न रूपवत्वप्रतीतिः अधिकरणस्वभावात्। यदि च पटविशिष्टस्यापि अयमेव स्वभावः यन्मते तदभावविशिष्टबुद्धिं जनयतीति ब्रूमः। तर्हि पटाभावदशायामपि नाभावबुद्धिं जनयेत्, एकस्यैव भूतस्य विरुद्धस्वभावद्वयस्य वक्तुमयोग्यत्त्वात्, तर्हि एकं विरुद्धस्वभावद्वयं सम्भवतीति सम्प्रदायः।

वयं तु ब्रूमः। वैशिष्ट्ये घटो नास्तीति प्रतीतेः सार्वजनीतत्त्वात्। वैशिष्ट्ये अभावविशिष्टप्रतीतिः जायते। सा तु न तावत् तेनैव वैशिष्ट्येन, आत्मासमवायात्। अतः इयं च मतिः स्वरूपसम्बन्धादिति अकामेनापि स्वीकार्या। तथा च सर्वत्र स्वरूपसम्बन्धादेव अभावात् मतिरस्तु इति सर्वमनवद्यमिति।

अवयवातिरिक्तम् अवयविनम् असहमानो बौद्धः प्रत्यवतिष्ठते – 'नन्वि'ति। दूषयितुं परपक्षमनुवदति – 'अवयवे'ति। दूषयति- 'नैतदि'ति। अत्र युक्तिमाह – 'अवयवे'ति। ननु एवं सति घटोऽयमिति व्यवहारः किमालम्बनः स्यादित्यत आह – 'परमाणवोऽपी'ति। ननु तेष्वतीन्द्रियेषु कथंमयं प्रत्यक्षेण व्यवहारः स्यादत उक्तं – 'तथाभूते'ति। घटोऽयमिति व्यवहारजनक परस्परसंयोगवन्तः इत्यर्थः।

सिद्धान्तं वक्तुं प्रतिजनीते – 'अत्रे'ति। तमाह – 'अस्ती'ति ततः किमित्यत आह – 'न चे'ति। परमाणुत्वात् स्थूलप्रत्ययभावः,

अवयवापचयरूपत्वात् स्थूलत्वस्थानेकत्वात् एकमत्यभाव: अतीन्द्रियत्वात् प्रत्यक्षाभाव इति भाव:। नन्वेषा मति: कथ भ्रान्ता न स्यादिति आशंक्य [1]समर्थयति 'न चे'ति[2]। ननु एकस्य परमाणो: अप्रत्यक्षत्वेऽपि तत्समूह: कथं न प्रत्यक्ष:। दृश्यते हि दूरादेकैककेशाप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वमिति चेन्न। तत्र प्रत्येकं स्वरूपयोग्यत्वात् समूहोऽपि[3] प्रत्येकं एव, परमाणुषु[4] प्रत्येकं स्वरूपायोग्यत्वात्, एवं ब्रुवाण: कथं न सागरे मज्जतीति। एतावताप्रबन्धेनोक्तम् अर्थमुपसंहरति – 'तदेवमि'ति।

शक्त्यादयोऽपि ये पदर्था:[5] सन्ति ते कारणत्वात् व्यतिरिक्ता न भवन्ति अत एव तन्निरूपणेनैव सर्वे पदार्था निरूपिता: इत्यभिप्रायेणाह – 'तदेवमि'ति। (षट् इति) संख्याकीर्तनेन नान्योऽभावरूपपदार्थोऽस्तीति[6] सूचितम्। अत एव षडेव द्रव्यादिपादार्था इति सुप्रसिद्धम्।

ननु विशेषणसङ्गतस्य एव कारस्य हि अयोगव्यवच्छेदे शक्ति: दृष्टा यथा 'पार्थो धनुर्धर एव' इत्यत्र एवकारो विशेष्ये धनुर्धरत्वायोगं व्यवच्छिनत्ति। एवं विशेष्ये सङ्गतस्य एवकारस्य अन्ययोगव्यवच्छेदे शक्ति: दृष्टा यथा 'पार्थो धनुर्धरो भवत्येव' इत्यत्र एवकारो विशेष्ये धनुर्धरत्वरूपात्यन्तायोगं व्यवच्छिनत्ति। एषां मते एवकारस्य तदर्थोऽर्थे एकैव शक्ति:। अत एवकारार्थो व्यवच्छेदमात्रम्। तत्समभिव्याहारवत्त्वात् तत्तदर्थव्यव-

1. ग – 'समाधत्ते' इति पाठ:।
2. क – 'न चेति। ननु एकस्य' इति पाठ: लुप्त:।
3. क – 'समूहोऽपि प्रत्यक्ष एव' इति पाठ: लुप्त:।
4. ग – 'च' इति अधिक: पाठ:।
5. क – 'पदार्था' इत्यारभ्य 'न भवन्ति' पर्यन्तभाग: लुप्त:।
6. क – 'पदार्थोऽस्तीति' इत्यारभ्य 'द्रव्यादपिदार्था इति' पर्यन्तभाग: लुप्त:।

च्छेदप्रतीतिः उभयथापि अयम् एवकारः अन्ययोगव्यवच्छेदकः। तथा च अन्योन्याभावरूपपदार्थो यद्यपि सिद्धः तर्हि निषेधानुपपत्तिरेव। अथायं न सप्तपदार्थनिषेधक एवकारः अपि तु सप्तत्वं प्रसिद्धं तत्पदार्थेषु निषेधतीति न विचारसहत्त्वात् किमयं भावपदार्थविभाजकोपाधिः राशीकृतेषु षट्सु निषेधति सप्त उत (?) पदार्थमात्रे। नाद्यः अप्रसक्तप्रतिषेधात्। नापरः अवान्तरघटादिभेदमादाय सप्तत्वसत्त्वेन निषेध्दुम् अशक्यत्वात्। अत्र वदन्ति भावव्यक्तयः सल्लक्षणात्यन्तताभावमेलकशून्याः अयं मेलकः मेलकः अभावे प्रसिद्धः भावे च स्यात् तदतिरिक्तः पदार्थ आयातिति भावानधिकरणतया च निषेधे भवत्यन्ययोगव्यवच्छेद एवकारार्थः।

(?) यद्वा भाववृत्त्यत्यन्ताभावप्रतियोगित्वं न षट्क्षणावच्छिन्नषट्पदार्थं प्रत्येकं संलक्ष्यप्रसङ्गात्। षट्सु मेलकं भाववत्त्वलक्षणमस्तीति तद्धेतुना साधयति- 'तेचे'ति। त एव भावरूपा इत्येवकारो योज्यः।

यद्वा ननु षट्पदार्था द्रव्यादय इत्यसङ्गतम् अभावस्यापि सप्तमपदार्थस्य सत्त्वात् इति यथाश्रुतग्रन्थाक्षेप्तारं प्रत्याह - 'ते चे'ति। भावरूपाः षडेव पदार्था इत्यर्थः। अत्र हेतुमाह - 'विधिरि'ति।

ननु किमिदं विधित्त्वम्। न तावदस्तीति शब्दवाच्यत्वम्। अभावेऽपि सत्त्वात्। न च निषेधमुखप्रतीत्यविषयत्वं घटाभावाभावादिरूपेण प्रतीतिसत्त्वेन स्वरूपासिध्द्यापत्तेः। न च अभावान्यत्वम्, अन्योन्याश्रयादिति चेन्न। नञर्थानुल्लिखितधीविषयत्वस्य सत्त्वात्। न च तमोऽस्तीति प्रत्ययसत्त्वात् अभावेऽपि एतदिति वाच्यम्। न नञर्थान्तर्भावेनैव तमः-पदप्रवृत्तेः आलोकाभावस्यैव तमस्त्वा-

त्। यद्वा षडन्यान्यत्वमेव विधित्वमिति संक्षेपः। प्रतियोगिनिरूपणाधीननिरूपणत्वात् इदानीम् अभावनिरूपणमेवोचितमिति मनसिनिधाय सङ्गतिमाह– 'इदानीमि'ति। निषेधमुखप्रमाणगम्यः निषेधत्वप्रकारकप्रमाविषय इत्यर्थः। यद्वा निषेधमुखम् अनुपलम्भसहकृतं यत्प्रमाणं प्रत्यक्षं तद्ग्राह्य इत्यर्थः। अन्यथा भट्टमतप्रवेशापत्तेः।

ननु किमभावत्वं न तावत् भावान्यत्वम् अन्योन्याश्रयात्। नापि नञर्थोल्लिखितधीविषयत्वं घटादौ अतिव्याप्तेः। तदभावाभावत्वेन तस्यापि प्रतीतिविषयत्वात्, नाप्यसमवायित्वे सति समवायभिन्नत्वम्। अभावघटितत्वेन आत्माश्रयादिदोषप्रसङ्गात्। अतो भावत्वज्ञानं विना यद्यपि दुर्वचत्वं तथापि आपाततो विशेषणविशेष्यभावसम्बन्धवेद्यमात्रवृत्ति पदार्थत्वसाक्षाद्व्याप्यधर्मवत्वं तत्त्वम्। वित्तिश्च अध्यक्षैव। तं विभजते – 'अभाव' इति। संक्षेपतस्तु अभावान्तरविभागापेक्षया। तत्र यद्यपि संसर्गाभावत्वं प्रतियोगितायाः घटमात्रवृत्तित्वेन प्रतियोगितानवच्छेदकत्वात्। नापि संसर्गप्रतियोगिकाभावत्वम्। संसर्गान्योन्याभावे गतत्वात् संसर्गस्यैव अभावागमनेन घटादीनाम् अभावप्रतियोगित्वाभावप्रसङ्गात् वेति। तथापि प्रतियोग्यधिकरणयोः संसर्गताम् आरोप्य यो निषेधानुगमः तद्विषयो योऽभावः संसर्गाभावः, भूतलं घटसंसर्गो नेत्यत्र संसर्गो नारोप्यते, अपि तु तादात्म्यमेव इति वदन्ति। केचित् यत्र प्रतियोगिनम् अधिकरणे समारोप्य यो निषेधापगमः तद्विषयाभावत्वमिति वदन्ति।

वयं तु ब्रूमः प्रतियोगिसामानाधिकरण्यविशिष्टप्रतियोगिसमानकालीनताभावो यस्य तादृशाभावत्वात् संसर्गाभावत्वमिति।

ननु विशेषदर्शने सत्यधिकरणे कथमारोपः स्यादिति चेन्न।

आरोपस्य अन्वयव्यतिरेकाभ्यां कारणत्वे सिद्धे विशेषदर्शने सत्येव बुद्धिपूर्वकोऽयम् अभावो भवति अत एवायमाहार्य इति। सुप्रसिद्धं कृतसामान्यलक्षणम्।

संसर्गाभावं विभजते – 'संसर्गे'ति। तत्र प्रागभावं लक्षयति– 'उत्पत्तेरि'ति। कारणे समवायिकारणे इत्यर्थः। हेतुमुदाहरति– 'यथे'ति। ननु कारणे यथा रूपाद्युत्पत्तिः दृश्यते तथा प्रागभावस्येति कथं प्राक्कारणे न स्यादित्यत आह – 'न चे'ति। ननु सत्येवम् आत्मवत् उत्तरकालमपि प्रतीयेतेत्यत आह – 'विनाशी चे'ति। ननु चैवं कथं तर्हि घटवत् तद्विनाशोऽपि प्रतीयेत इत्यत आह– 'कार्यस्ये'ति। लक्षणं चास्योक्तमेव। ध्वंसलक्षयति – 'ध्वंसस्ये'ति। उत्पन्नस्य कार्यस्य कारणे समवायिकारणे योऽभावः इत्यर्थः। एतेन जन्याभावत्वं ध्वंसत्वमिति लक्षणमुक्तं भवति। लोके प्रसिद्धं पर्यायान्तरमपि विनाश इति। उदाहरति – 'यथे'ति। एतस्य समवायिकारणाजन्यत्वात् निमित्तमात्रजन्यत्वात्। तदेवाह – 'न चे'ति। अत्र युक्तिमाह – 'पुनरि'ति। ध्वंसस्यैव सत्त्वादित्यर्थः। यदि ध्वंसो निवर्तेत तदा ध्वस्तोऽपि घटः पुनः दृश्येतेति भावः। अत्यन्ताभावं लक्षयति – 'त्रैकालिक' इति। उदाहरति – 'यथे'ति। अन्योन्याभावं लक्षयति–'अन्योन्याभावस्तु' इति। एवमभिनीय दर्शयति – 'घट' इति। घटःसः घटात्मकाभित्यर्थः (घटात्मको नेत्यर्थः।

नन्वेतदसङ्गतम् घटभूतलतादात्म्यस्य अत्यन्तासत्त्वात् तादात्म्यसंसर्गाभावे गतत्वात्। घटादेः अन्योन्याभावाप्रतियोगित्वप्रसङ्गाच्च। अत एव अन्योन्यप्रतीयोगिकाभावः इत्यपि असाधीयः। एकस्याभावस्य उभयप्रतियोगिकत्वानभ्युपगमात्। भावे वा तदत्यन्ताभावेऽतिव्याप्तेः। नापि प्रतियोगिसमानकालीनसमानाधिकरणाभावत्वम्, अवृत्त्याकाशाद्यन्योन्याभावमात्रे अव्याप्तेः इति

चेन्न। यत्राधिकरणे प्रतियोगितावच्छेदकं धर्ममारोप्य यो निषेधावगमः तदवगमविषयाभावत्त्वम् अन्योन्याभावत्त्वमिति तत्तात्पर्यकत्त्वात्। लिखितं तु मूले पूर्वसम्प्रदायग्रन्थदर्शनादिति।

इदं तु अत्र विचारमर्हति भूतले घटो नास्ति इत्यनुभवः सार्वलौकिकः एतस्य विषयस्तावत् नान्योन्याभावः तथा सति भूतलं घटो न इत्येवमाकारः स्यात्। नापि संसर्गाभावः विचारासहत्त्वात्। तथाहि न तस्य अत्यन्ताभावो विषयः। कदाचित् तत्र तत्र प्रतियोगिसत्त्वात्। नापि प्रागभावध्वंसाभावौ तयोः समवायिकारण एव सत्त्वादिति।

अत्र वदन्ति तादृशस्थले उत्पादविनाशशीलः चतुर्थः संसर्गाभावो विषयः। न चैवम् अदृष्टकल्पनायामतिप्रसङ्ग इति वाच्यम्। प्रतीतेरन्यथोपपादयितुम् अशक्यत्त्वात्। अत एवोक्तं खण्डने–

1"अन्यथानुपपत्तिश्चेत् अस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टवैषम्यं सैव सर्वबलाधिका"॥ इति।

न च संसर्गाभावत्रैविध्यप्रतिपादकसूत्रविरोधः त्रैविध्यस्य उपलक्षणत्त्वात्। इदं तु अवधातव्यम् प्रागभावध्वंसादीनां योन्योन्याभावः प्रतीयते स्वरूपभेद एव नत्वधिकः अस्य अन्यथा अनवस्थादिदोषप्रसङ्गात्। अभावाभावस्य भावत्त्वनियमस्तु अत्यन्ताभावपर एव। अत एव घटाभावे घटाभावः अधिकरणस्वभावादेव तस्योपपत्तेरिति उपसंहरति – 'तदेवमि'ति।

प्रपञ्चितपदार्थानां सत्यत्त्वम् असहमानौ सौगतवेदान्तिनौ प्रत्यवतिष्ठेते 'नन्वि'ति। तत्राद्यस्य अयं भावः। ज्ञानव्यतिरिक्तं किञ्चिदपि नास्ति प्रमाणाभावात्। ननु चेत् सर्वं ज्ञानमेव तर्हि

1, खण्डनखण्डखाद्यम् – षड्दर्शनप्रकाशनग्रन्थमाला – p. 61,

कथं कार्यकारणभावादिव्यवस्था इति चेन्न। आलयविज्ञानानि प्रवृत्तिविज्ञानानां कारणानि अत एव घटत्वादिप्रकारको व्यवहारः स्वापवत् मिथ्यैवेति........। यस्तु– "[1] नित्यं ज्ञानमानन्दं ब्रह्म" इत्यादि श्रुतिसिद्धं चिदानन्दरूप ब्रह्म तदतिरिक्तं न किञ्चिदस्ति।

"एकमेवाद्वितीयं ब्रह्म"
"नेह नानास्ति किञ्चन" इति

श्रुत्या सर्वस्यैव अलीकप्रतिपादनात्। न च द्वितीयवादे कथं श्रुतिरपि उपन्यस्यत इति वाच्यम्। तत्त्वं बोधनीयमिति हि वैतण्डिकस्य मतं यतः।

ननु घटपटौ भिन्नाविति प्रत्यक्षेण बाधितत्वात् स्वार्थे न प्रमाणम्। न च 'यजमानः प्रस्तरो भवती'ति एषा मीमांसकं हि प्रत्यक्षं घटपटयोः अभेदं विषयीकरोति नान्यस्य। तथा चैतद् विषयात् अन्यत्र श्रुतिः निराबाधा। एवं च अनया भिन्न घटपटयोः अभेदो बाध्यते, तथा च एवंभूतस्य प्रत्यक्षभेदेनसमं भेदबोधने निराबाधात्। तयोरभेदं बोधयति तद्वदेव घटपटाभ्यां भेदस्यापि अभेदं बोधयति। तथा च तदभिन्नाभिन्नत्वेन अभेद एव पर्यवसन्नम्। एवं यदि यदेव बाधकत्वेन उपन्यस्यते तत्सर्वं प्रत्याख्येयमिति न ब्रह्मणोऽतिरिक्तं किञ्चिदस्तीति पूर्वपक्षसंक्षेपः।

परिहरति – 'मैवमि'ति। अत्र युक्तिमाह – 'अर्थानामि'ति। यदि च घटादयो ज्ञानमेव तदा चक्षुरादिना न गृह्येरन् इति भावः। किञ्च 'परमाद्वितीयं[2] ब्रह्म' 'नेह ब्रह्मणि नानास्ति किञ्चन' घट

---

1. क – 'नित्यं ज्ञानमानन्दमयं ब्रह्म' इति पाठः लुप्तः।
2. ग – 'एक' इति पाठः।

पटादिकमस्तीति श्रुतेरर्थः, अतः प्रत्यक्षानुकूला श्रुतिः। किञ्च आनन्दस्वरूपमपि न ब्रह्म। मत्वर्थीयप्रत्ययेन आनन्दवत्त्वं प्रतिपाद्यते नाभेदः। अन्यथा आनन्दशब्दस्य नित्यपुल्लिङ्गतया आनन्द इत्येव स्यात्, न च छान्दसत्वात् एवम् अन्यथैवोपपत्तेरिति दिक्।

आत्मशरीरेन्द्रियाणां कारणत्वेन उपजीव्यत्वात् अर्थानां बुद्धिनिरूपकत्वेन च अभ्यर्हितत्वात् एतेषां निरूपणे जाते तदनन्तरं मनसश्च ज्ञानक्रियोन्नेयत्वात् पूर्वं बुद्धिं पर्यायेण लक्षयति बुद्धिरिति। बुद्धिरुपलब्धिः एतावतैव लक्षणसिद्धेः बहुपर्यायाभिधानं सांख्यमतवन्नास्माकं मते बुद्ध्यादि पदानां भिन्नार्थतेति ज्ञापयितुम्। तथा च सूत्रम् - "बुद्धिरुपलब्धिर्ज्ञानमिति अनर्थान्तरमि"ति।

लक्षणान्तरमाह - 'अर्थे'ति। इदं च पूर्वं व्याकृतमेव। एतां विभजते - 'सा चे'ति। संक्षेपः करिष्यमाणावान्तरविभागापेक्षया। द्वे विधे दर्शयति - 'अनुभव' इति। पूर्वमेवास्य लक्षितत्वात्। इदानीं विभागमेवाह - 'यथार्थ' इति। चकारः तृतीयाभावं सूचयति। आद्यं लक्षयति - 'यथार्थ' इति। यत्प्रकारकानुभवः - तत्प्रकारकाश्रयप्रवृत्तिजनक इत्यर्थः। यद्वापूर्वकृतप्रमालक्षण एव अस्य तात्पर्यं बोध्यम्। ननु किं तत्कारणम् इत्य आह - 'य' इति। लक्षितप्रमाणजन्यानुभवत्वमित्यपि लक्षणं सूचितं यः प्रमाणविशेषो यं प्रति कारणम्। स्पष्टतया तदुदाहृत्य दर्शयति - 'यथे'ति। केषां यन्मते इन्द्रियाणि दृश्यानि तन्मतनिराकरणार्थम् उक्तम् - 'अदृष्टे'ति। अतीन्द्रियैरित्यर्थः। स्पष्टमन्यत्।

द्वितीयं लक्षयति - 'अयथार्थं' इति। तु शब्दो भेदसूचनार्थः। स्वप्रकारीभूतधर्मानाश्रयविषयकप्रवृत्तिजनक इत्यर्थः। एतत्कारणमाह - 'अप्रमाणे'ति। एवं विभजते - 'स' इति।

तिस्रो विधा दर्शयति – 'संशय' इति। इदानीं कृतलक्षणस्य अग्रे अवश्यं लक्षणं कर्तव्यमस्ति। तथा च अग्रे एव लक्षणकरणेन ग्रन्थलाघवं भवतीत्याह – 'संशये'ति। विपर्ययं लक्षयति – 'विपर्ययस्तु' इति। न तत् अतत्। तस्मिन् अतस्मिन् इत्यनेन अयथार्थता दर्शिता तदित्यनेन निश्चयाकारो दर्शितः। एतत्पर्यायमाह – 'भ्रम' इति। यस्यायं नास्ति तस्य अनुभवरूपो निश्चय इत्यर्थः। उदाहरति 'यथे'ति। रजततादात्म्यरूपे रजतत्त्वसंसर्गारोपे इदं रजतम् इत्येवमाकार एव भ्रम इत्यभिप्रायेणाह 'इदमि'ति।

ननु आरोपे सर्वत्र सदृशधर्मज्ञानं कारणम् अत एव चाकचक्यज्ञानानन्तरम् आरोप्यस्य ज्ञानं समानधर्मज्ञानात् एतच्चारोप्यज्ञानम् एवोपक्षीणम्। एवञ्च आरोप्यज्ञानमेव सर्वत्र आरोपे मृग्यते। तच्च क्वचित् समानधर्मज्ञानात् क्वचित् च प्रत्यक्षात्। अतस्तथा च नयनादिगतपित्तादेः प्रत्यक्षत एवोपस्थापिते पीतः शंखः इत्याद्यारोपे नकिञ्चिदनुपपन्नम्। नच तथापि नीलं नभः इत्याद्यारोपानुपपत्तिरेव नीलद्रव्येण समानरूपाभावात् आरोप्यस्मरणानुपत्तेः। अत्यन्तशुभतरदेशे अनुभूयमानस्य नीलिमाभावादिति वाच्यम्। मेरोः दक्षिणदिग्गतस्य इन्द्रनीलगुणस्य अनुभूयमानस्यैव तत्र आरोपात्। तथा चोक्तं गुणकिरणावल्यां यदाह भगवान् पतञ्जलिः –

"भूगोलमध्यमेदिनीभूतस्यैव [1]मेरोः प्रत्यक् – उदक् – प्राक्‌दक्षिणादिक्रमेण रजतसुवर्णपद्मरागेन्द्रनीलमयानि चत्वारि शृङ्गाणि तस्य दक्षिणेन्द्रनीलमयस्य शिखरस्य प्रभाया नीलमायाति। अन्यत्र सितपीतलोहितमि"ति।

यत्तु कैश्चित्समाहितं दूराङ्गणतयनरश्मयः तिग्मकिरणकराघातपरावृत्ताः स्वाधिष्ठानगोलकाभिसम्बन्धाः तदीयेव (यामेव)

श्यामतां गगनेऽपि प्रभादिम् इव शंखादौ आरोपोऽयमस्तीति (आरोपयन्तीति)। तन्न। काण्वक्षाणां तादृशत्वानुदयप्रसङ्गात्। एवं शक्तरूपविरोधित्वात् लक्षणसादृश्येन नियमादृष्टवशाच्च स्मृतं नीलगुणमारोप्य तदा नील इति भ्रमः इत्यादि स्वयमूह्यम्।

स्मरणं विभजते – 'स्मरणमि'ति। संस्कारासाधारणकारणज्ञानत्वं स्मृतित्वम्। प्रत्यभिज्ञायाम् इन्द्रियस्यापि कारणत्वात् न तत्रातिव्याप्तिः। ज्ञानत्वावान्तरजातिविशेषो वा तत्त्वम्। एतदुभयप्रकारं जाग्रद्दशायामेवेत्याह – 'द्विविधमि'ति। स्वप्ने विशेषमाह- 'स्वप्नेत्वि'ति। अत्र युक्तिमाह – 'दोषे'ति। लक्षणं तु बहिरिन्द्रियव्यापाराभावे सति निरिन्द्रियप्रदेशावस्थितस्य मनसि बहिरिन्द्रियद्वारेणैव यद्ज्ञानमुत्पद्यते तत्त्वम्। न च शय्यायां सुप्तस्तिष्ठामीत्यादि स्वस्थानां कथम् अयथार्थतेति वाच्यम्। इन्द्रियव्यापाराभावे सति इन्द्रियव्यापरवत्तारोपात्। केचित्तु ज्ञानपदं विहाय अनुभवपदं दत्त्वा अनुभव एव अन्तर्भावयन्ति।

ननु यथार्थायथार्थयोरपि स्मृत्योः न प्रमात्वाप्रमात्वे कथम्। न च तल्लक्षणस्य अनुभवघटितत्वात् न तत्रातिव्याप्तिरिति वाच्यम्। अनुभव इति पदं दूरीकृत्य ज्ञानपदे दीयमानेऽपि दोषाभावात्। ज्ञानत्वानुभवत्वयोः द्वयोरपि जातित्वेन गौरवादिदोषाभावादिति चेन्न। तान्त्रिकाणां तथा व्यवहाराभावात्। प्रमात्वप्रतीतिः प्रमाप्रमाबहिर्भूतेति दिक्।

ननु सर्वत्र प्रमालक्षणेषु व्यावर्त्याप्रसिद्धेः– 'यथार्थे'ति। विशेषणं व्यर्थम्। ज्ञानमात्रस्य यथार्थत्वात्। तथा च शक्त्यादिविषयके इदं रजतमित्यादिज्ञानानां ग्रहणस्मरणात्मकत्वेन अन्यथाख्यातौ मानाभावः। अथ रजतेच्छाजन्यशुक्तिविषयकप्रवृत्तिजनकं रजतत्वप्रकारकं ज्ञानं शुक्तिविषयकं शुक्तिविषयप्रवृत्तिजनकज्ञान

त्वात्, शुक्तीच्छाजन्यशुक्तिविषयप्रवृत्तिजनकज्ञानवत्। यद्वा शुक्तिविषयकम् इदं ज्ञानं रजतत्वप्रकारकं रजतत्त्वविषयकप्रवृत्तिजनकज्ञानत्त्वात् रजते रजतज्ञानवत्। न च दोषजन्यत्वमुपाधिः। स्वतःप्रामाण्यवादिमते ज्ञानमात्रस्यैव दोषाजन्यत्वेन साधनव्यापकत्वात्। न इष्टभेदग्रहे प्रवृत्तिर्नभवतीति उभयवादिसिद्धम्। तथा च उपस्थितेष्टभेदाग्रहात् एव प्रवृत्तिरस्तु विशिष्टज्ञानकारणत्त्वेन त्वयापि एतस्य प्रवृत्तिपूर्वम् अवश्यस्वीकारात् किं भ्रमरूपविशिष्टज्ञनेन। न च अभावापेक्षया लाघवेन रजतादिविषयकप्रवृत्तौ पुरोवृत्तिविषयकेष्टतावच्छेदकप्रकारेण विशिष्टज्ञानस्य कारणत्वकल्पनात् अन्यत्र सर्वत्रापि तदेव कारणमिति वाच्यम्। भेदाग्रहे सति पुरोवर्तिज्ञानस्यैव प्रवृत्तिमात्रे लाघवेन कारणत्वात्। ननु कथमेतल्लाघवमिति चेन्न। भेदाग्रहस्य उभयसिद्धत्वे पुरोवृर्तिविषयकेष्ठतावच्छेदकप्रकारकविशिष्टज्ञानापेक्षया इष्टपुरोवृर्तिज्ञानत्वस्य लाघवत्वात्। तस्य च ग्रहणस्मरणयोः विशेषज्ञानेचाविकलत्वात्।

ननु तत्तानुल्लेखात् कथं रजतमिति स्मरणं विशेषदोषवशेन तत्तायाः प्रमोषात्। अत एव स्वप्नोऽपि प्रमुष्टतत्ताकस्मरणमेवोत्युक्तम्। तस्मात् शुक्तिविषयकम् इद ज्ञानं न व्यधिकरणप्रकारकं ज्ञानत्वात्। व्यधिकरणप्रकारकत्वं च शुक्तीच्छायां प्रसिद्धमिति भ्रमरूपविशिष्टज्ञानाभावेऽपि ग्रहणस्मरणयोः प्रवृत्तिसामान्यकारणतासिद्धौ प्रवृत्तिविशेषे विसंवादिप्रवृत्तौ अगृहीतभेदं ज्ञानद्वयं, संवादिप्रवृत्तौ विशिष्टज्ञानं प्रवृत्तिमात्रे च भेदाग्रहे सति इष्टपुरोवर्तिज्ञानमिति नान्यथाख्यातिरिति प्राभाकरपूर्वपक्षः।

अत्रोच्यते रजते सत्यप्रवृत्ति प्रति विशिष्टज्ञानं कारणमिति उभयसिद्धम्। तथा च भ्रमस्थलेऽपि तदेव कारण लाघवात्। ननु

इष्टभेदाग्रहः गौरवात्। न च यथार्थप्रवृत्तित्वावच्छेदेनैव[1] विशिष्टज्ञानस्य गृहीता कारणता। अतः कथं सत्यप्रवृत्तिं प्रति तस्य सा स्यादिति वाच्यम्। तत्वावच्छेदेन गृहीतापि कारणता गौरवप्रतिसन्धानेन त्यज्यते। लाघवेन सत्यस्थलेऽपि प्रवृत्तित्वस्यैव कारणतावच्छेदकावधारणात्। ननु सत्यप्रवृत्तित्वस्य कार्यतावच्छेदकत्त्वे अतिरिक्तभ्रमरूपविशिष्टज्ञानमायाति प्रवृत्तित्वस्य कार्यतावच्छेदकत्त्वे तदायाति इत्यतो लाघवेनापि लब्धप्रवृत्तित्वरूपकार्यतावच्छेदके यथार्थत्वरूपविशेषणे दीयमाने महालाघवमिति धर्मिकल्पनातो वरं धर्मकल्पनायाः लघुत्त्वात् तस्मान्न प्रवृत्तित्वं कार्यतावच्छेदकमिति चेन्न। कारणताग्राहकसमवाये यदि भ्रमरूपमुपस्थितं तदा गौरवस्याकिञ्चित्करत्त्वं धर्मिणः सिद्धत्त्वात्। यदि चानुपस्थितं तदा गौरवस्यनवतार एव प्रतियोग्यनुपस्थितेरिति सिद्ध्यसिद्धिभ्यां पराहतत्त्वेन लाघवेन प्रवृत्तित्वस्य कार्यतावच्छेदकत्त्वे सिद्धेपश्चात् सिद्धं विशिष्टज्ञानरूपफलम् आदाय गौरवस्य फलमुखत्त्वेनादोषत्त्वात्।

ननु तथापि कारणतानुपपत्त्या भ्रमरूपकार्याभावः चक्षुरादेः प्रमाणस्य सत्यस्थल इव तत्रापि सत्त्वादिति चेन्न। दोषसहकृतत्त्वेन तदानीं प्रमाणत्वाभावात् एतेन सर्वत्र असंसर्गाग्रहः कारणम् असत्यप्रवृत्तौ विद्यमानासंसर्गाग्रहः कारणमिति प्राभाकरैकदेशिमतमपास्तम्। स्वतन्त्रान्वयव्यतिरेकाभ्यां सत्यस्थले विशिष्टज्ञाने अस्य प्रवृत्तिं प्रति कारणतावधारणेनान्यत्रापि तदेव कारणमिति कल्प्यते। अन्यथा क्वापि विशिष्टज्ञानं न सिध्येत्। तस्मात् असत्यप्रवृत्तिः विशिष्टज्ञानसाध्या प्रवृत्तित्वात् सत्यप्रवृत्तिवत्। एतेन ज्ञानं यथार्थमेव इत्यादिव्याप्तयः अप्रयोजकाः इति अन्यथाख्यातिसिद्धिः।

नन्वत्र किं चक्षुषा रजतं भासते न तावत् तत्र सत् प्राप्त्य-

भावात्। नापि अन्यत्र सत् चक्षुः सन्निकर्षाभावात्। अतः अत्यन्तासदेव रजतम् अनादिवासनाबलात् भासते इति असत्ख्यातिः। अस्तु इति चेन्न। अन्यत्र रजतस्य दोषात्, असंनिकृष्टस्यापि भानात्। यद्वा दोषः एव प्रत्यासत्तिः।

वस्तुतस्तु दोषसहकृतसंस्कारेन्द्रियाभ्यां प्रत्यभिज्ञानवत् इदमपि उत्पाद्यते इति न काप्यनुपपत्तिः। यच्चोक्तम् असदेव भासते इति। तन्न। केवलाया वासनाया ज्ञानाजनकत्वात्। अन्यथा सर्वदैव तदुत्पत्तेः संनिकर्षाभावात्, प्रत्यक्षप्रवृत्तेः व्याप्तिशक्यतावच्छेदकग्रहाभावात् शब्दानुमानयोः अप्रवृत्तेः। तदसत्। यद्यसत्तया भासेत तदा प्रवृत्ति र्न स्यात् सत्ताया भाने अन्यथाख्यातिरेवेति। अस्तु तर्हि अनिर्वचनीयाख्यातिः। न। शुक्तित्त्वेन बाधदशायां रजतत्त्वेन च भ्रमदशायाम् अभिलप्यमानत्त्वात् चक्षुरादिसम्बन्धेन घटादिरूपेण स्वजन्ये स्वाकारो घटत्त्वादिः जन्यते। न च आकारेण घटाद्यर्थः अनुमीयते। ज्ञानाकारेणैव विषयानुमानम्। अतः सर्वं ज्ञानं साकारमेवेति बौद्धैकदेशिमतम् अपाकर्तुमाह– 'सर्वमि'ति। अत्रहेतुमाह – 'साकारे'ति। प्रत्यक्षसिद्धस्य अतीन्द्रियत्त्वाङ्गीकारे सर्वयात्राविलोपः स्यात् इति भावः। 'अत एवे'ति। यतः अतीतानागतानाम् अजनकत्त्वे तद्विषयके ज्ञाने आकाराभावेन ज्ञानस्य आकारत्त्वं सर्वदा न सन्तरतीत्यर्थः। (संभवतीत्यर्थः)। ननु ज्ञानस्य साकारत्त्वाभावे घटादौ किं प्रमाणं स्यादित्यत आह – 'प्रत्यक्षसिद्धत्त्वादि'ति। ननु तथापि घटपटादिज्ञानानां कथं प्रत्येकं भेदः स्यादतः साकारत्त्वं सर्वदा स्वीकर्तव्यमित्यत आह – 'सर्वज्ञानमि'ति। अत्रहेतुमाह – 'अर्थे'ति। ज्ञानस्य सर्वविषयकस्यैव प्रत्यक्षेण ग्रहणं विषयविषयिरूपेण सम्बन्धेन अर्थसम्बन्धित्त्वनियमात् इत्यर्थः। ज्ञानग्रहणाकारमाह – 'घट ज्ञाने'ति। 'नत्वि'ति। अयं च प्रत्यक्षेणैव ज्ञाने गह्यमाणे इत्यवधातव्यम्। ज्ञामितिपदो–

च्यमानज्ञानानुव्यवसाये व्यभिचारात् ।

ननु घटज्ञानवानहमिति कथं मनसो ज्ञानमुत्पद्यते बहिर्विषये घटे मनसोऽप्रवृत्तेः सम्बन्धाभावात्। संयुक्तसंयोगस्य च सम्बन्धत्वेन सर्वदा घटो मनसा गृह्यते इति चेन्न। सत्यं संयोगादिसम्बन्धेन न बहिर्विषयं गृह्णाति। तथा च व्यवसायरूपज्ञानलक्षणया प्रत्यासत्त्या बहिः पदार्थभाने न दोषः। अत एव बहिः पदार्थो विशेष्यतया न भासते अपि तु विशेषणतयैव। तदुक्तम्-

"बहिर्विशेष्ये [1]मनसोऽस्वातन्त्र्यम्" इति। प्रवृत्तिं प्रति मनसः कारणत्वेन उपजीव्यतया तत्प्राक् मनो निरूपयति - 'अन्तरिन्द्रियमि'ति ।। श्री नृसिंहः ।।

ननु किमत्र प्रमाणमत आह - 'तदि'ति। मनोजन्यत्वात्, तदनन्तरं [2]दोषनिरूपकत्वाच्च तत्, प्राक् प्रवृत्तिं लक्षयति - 'प्रवृत्तिरि'ति। ननु प्रवृत्तिशब्दस्य प्रयत्न एव शक्तत्वात् कथं तेन धर्माधर्मौ उच्येते इत्यत आह - 'प्रवृत्तेरि'ति। प्रयत्नस्य अदृष्टद्वारा जगत्कारणत्वम्। तथा च जगत्कारणत्वरूपसाधर्म्येण उपचारात् प्रवृत्तिशब्दवाच्यत्वमिति भावः। यद्वा कारणेन कार्यलक्षणात् कारणवाचकपदं कार्मपदम् इति भावः। धर्माधर्मोभयसाधारणं प्रवृत्तित्वम् अदृष्टत्वमेव। तत्त्वं च प्रत्यक्षप्रवृत्तिगुणत्वसाक्षाद्व्याप्यजात्यनाश्रयविशेषगुणत्वं, गुरुत्वं न विशेषगुणः अतो न तत्रातिव्याप्तिः। तत्त्वबोधे च अदृष्टजनकानीति अप्रयत्नत्व प्रवृत्तित्वम् उक्तम्, अनित्येति विशेषणात् नत्त्वप्रयत्ने अव्याप्तिः। अदृष्टजनकेति विशेषणात् कार्यादिप्रयत्ने नातिव्याप्तिः। तस्य प्रतिबन्धकापनयनमात्रहेतुत्वेन अदृष्टाजनकत्वात्। इदमर्थं सामान्यलक्षणम्।

---

1. क - 'मनसोऽस्वातन्त्र्यम्' इति पाठः लुप्तः।
2. क - 'दोषनिरूपकत्वाच्च तत्' इति पाठः लुप्तः।

शाब्दं तु विशेषलक्षणम्। तथा सूत्रम्-

"प्रवृत्तिर्वाक् - बुद्धि - शरीरारम्भः"

इति आरम्भः प्रयत्नः। तथा च वाचा जनकः प्रयत्न इत्यर्थः।

प्रवृत्तिनिरूप्यत्त्वात् तदनन्तरं शरीरादिदोषपर्यन्तत्याग पूर्वकं तत्रापि रूपत्त्वात् (तत्र निरूप्यत्त्वात्) प्रेत्यभावस्य दोषनिरूप्यत्त्वाच्च, प्रेत्यभावात् पूर्वं दोषाणां लक्षणमाह - 'दोषा' इति। त्रितयसाधारणम् अदृष्टहेतुजनकप्रत्यक्षात्मविशेषगुणत्त्वं बोध्यम्। तथा च सूत्रम्-

"प्रवर्तनालक्षणाः दोषाः"।

प्रवर्तना च प्रत्यनुकूलो व्यापारः। न च विवक्षितविवेकेन रागादिरेव।

ननु प्रवृत्तेर्जनकत्त्वंमोहस्य इच्छाजनकत्त्वेन अन्यथासिद्धेरिति न मोहः प्रवृत्तिजनकः। प्रयत्नजनकात्ममनःसंयोगजन्यत्त्वे सति प्रवृत्तिजनकत्त्वात् अदृष्टवदित्यनुमानेन तत्सिद्धिरिति आत्मादिदोषान्तनिरूप्यत्त्वात् तल्लक्षणानन्तरं प्रेत्यभावलक्षणमाह - 'पुनरि'ति। अभ्यासार्थश्च पुनः शब्दः उत्पत्तेः अभ्यासान्तं नान्तरीयकतया पूर्वशरीरादित्याग उपलभ्यते, तेन पर्यवसन्नो योऽर्थः तमाह - 'स चे'ति। अनेन संसारित्त्वमुक्तं[1] भवति, तेन गर्भवासादिदुःखभागित्वेन अत्यन्तहेयताज्ञानेन एतत् ज्ञानं मुक्तौ उपयुज्यते इति आत्माद्युपजीवकत्वेन तदनन्तरं फललक्षणमाह - 'फलमि'ति। ननु स एव कः इत्यतआह - 'सुखे'ति। एतदुभयानुगतं भोगत्वं प्रागेवोक्तम्। इदं च फललक्षणं यथार्थश्रुतवार्तिकानुरोधेन। सूत्रं तु-

"प्रवृत्तिदोषजनितोऽर्थः फलम्"

इति जनितोऽर्थः फलमित्येव लक्षणम्। यद्यपि सम्भवति जन्य-

1, क - 'संसारित्त्वमुक्तं' इति पाठः लुप्तः।

मात्रस्य प्रवृत्तिजन्यत्वात्, तथाप्यनेनापि रूपेण निर्वेदोपयोगित्वज्ञापनार्थमुक्तं प्रवृत्तिरिति। दुःखेऽपि आत्मादीनां कारणत्वात् तदनन्तरं दुःखलक्षणमाह – 'पीडे'ति। ननु पर्यायशब्देन कथमितरभिन्नत्वेन ज्ञानं स्यादित्यत आह – 'तदि'ति।

मोक्ष – तत्साधननिरूपणम्

दुःखकारणत्वात् शरीरादावपि भोगे दुःखपदप्रयोग इति ज्ञातव्यमिति आत्मादीनां गौणमुख्यभेदेन दुःखत्वे सिद्धे तेषां हेतुत्वेनोपस्थितौ तदशेषनिवृत्तिरूपत्वात् अपवर्गस्य तन्निरूपणानन्तरम् अपवर्गं निरूपयति – 'मोक्षा' इति। बहुधाविप्रतिपत्त्याश्रयस्य कथं पर्यायेण लक्षणं स्यादित्यत आह् – 'स चे'ति। यैर्भेदैः एकविंशतित्वं तानाह – 'एकविंशती'ति। ननु दुःखस्य गुणात्मकत्वात् कथं दुःखपदेन शरीरादेः ग्रहणमित्यत आह – 'गौणमि'ति। इदं च सम्प्रदायमतेन लक्षणम्।

वस्तुतस्तु मुख्ये बाधकाभावात् मुख्यदुःखपरमेव। निवृत्तिश्च ध्वंस एव। तत्र च आत्यन्तिकत्वं दुःखरूपप्रतीयोगिप्रागभावासमानकालीनत्वम्। एवं ध्वंससमानाधिकरणदुःखप्रागभासमानकालीनो यो दुःखध्वंसः स मोक्ष इति पर्यवसन्नार्थः। समानाधिकरणेति पदं नान्यध्वंसमादाय अन्यस्य मुक्तत्वम्। दुःखप्रागभाव समानकालीनेति, दुःखपदमतिरिक्तं देयम्। तथा च समानाधिकरणदुःखदुःखप्रागभावोभयासमानकालीनत्वाभावात् नातिव्याप्तिरिति।

वयं तु ब्रूमः प्रथमदुःखम् एकविंशतिभेदभिन्नदुःखपरमेव। तथा च वर्तमानाप्यचिरम् अनुभूयते इति वार्तिकारस्वरात् ता-

दृशायामपि तत्प्रागभावसमानकालीनत्त्वात् नातिव्याप्तिरिति। ए-तेन दुःखाभावोऽपि नावेद्यः पुरुषार्थः इष्यत इत्यपि दूषणमपास्तम्।

ननु दुःखध्वंसोऽपि न मोक्षः, पुरुषप्रयत्नासाध्यत्त्वात्। त-थापि किमयं ध्वंसः अतीतस्य उत अनागतस्य आहोंस्वित् वेद्य-मानस्य वा? नाद्यः स्वत एवोत्पन्नत्त्वात्। न द्वितीयः प्रागभा-वदशायां ब्रह्मणापि ध्वंसयितुम् अशक्यत्त्वात्, नान्त्यः तस्य विरोधिगुणप्रादुर्भावेनैव नाशसम्भवात्। न च हेतूच्छेदे पुरुषव्या-पारः। अत एव कण्टकादिनाशार्थं वैदिके च प्रायश्चित्तादौ प्रवृ-त्तिरस्तीति वाच्यम्। तत्रापि किमुत्पादितदुःखकः उत उत्पत्स्य-मानदुःखकः नाद्यः प्रयोगस्य निष्फलत्त्वात्। न द्वितीयः भावि-न्यर्थे प्रमाणाभावात्। सत्त्वे वा निष्फलप्रयास इति दोषसम्भ-वादिति चेन्न। इदानींतनदुःखध्वंसस्य यत्नसाध्यत्त्वेऽपि निरुक्ता-त्यन्तिकदुःखध्वंसस्य अनादिवासनामिथ्याज्ञानोच्छेदद्वारा पुरुषप्रय-त्नाधीनतत्त्वज्ञानसाध्यत्त्वात् अत एवोत्पन्नचरमदुःखेन ध्वंसस्तत्र ज्ञानादेव भविष्यति। अन्यथा तत्र ज्ञानादपि न स्यादिति परा-स्तम्। अन्वयव्यतिरेकाभ्यां प्रतियोगिवृत्तित्त्वज्ञानस्यापि कारण-त्वात्। अत एव यस्य तत्त्वज्ञानमुत्पन्नं तस्यैव स उत्पन्नो नास्म-दादीनाम्। तस्मात् अनुपादेयरूपस्यापि दुःखस्य एतादृशध्वंसार्थम् उपादेयत्त्वेऽपि न कश्चिद्दोषः। न च अनागतप्रतियोगिनाशार्थं प्रवृ-त्तिर्नक्वापि दृष्टेति वाच्यम्। अनागतकुम्भनाशार्थं मुद्गरादेः प्रत्यक्षसिद्धत्त्वात।

वयं तु ब्रूमः – ध्वंससमानाधिकरणयावदुःखप्रागभावसंसर्गा-भावो मोक्ष इति वदन्ति। घटेऽतिव्याप्तिवारणाय – 'आत्मत्त्वे'ति। इदानीमतिव्याप्तिवारणाय – 'यावदि'ति। न संसर्गाभावमध्ये अ-त्यन्ताभावप्रवेशे भागेनापुरुषार्थत्त्वापत्तेः। यदि च ध्वंस एव

विवक्षितः, तथा च चरमदुःखदशायामेव अतिव्याप्तेः। सुखदुःखभावेतरत्त्वेन अपुरुषार्थत्त्वापत्तेश्चेति।

अन्ये तु यावद्दुःखध्वंससंवलनमेव मोक्ष इति। तदपि संवलनं प्रत्येकध्वंस एव वा। तन्निष्ठो धर्मः कश्चित्। आद्ये इदानीमतिव्याप्तिः अन्त्ये धर्मो जन्यो वा। नाद्यः अभावमात्रस्यैव जन्यधर्मानाश्रितत्त्वात्, अत एव नापरः। अपुरुषार्थत्त्वापत्तेरिति।

अपरे तु तदत्यन्तविमोक्षोऽपवर्ग इति सूत्रानुरोधात् दुःखात्यन्ताभाव एव मोक्षः। तथा च श्रुतिरपि– "दुःखेनात्यन्तविमुक्तश्चरती"ति। न घटादावेव अतिव्याप्तेः अबाध्यत्त्वापत्तेश्चेति।

परे तु एवमाहुः – लोकेऽपिकण्टकादिनाशार्थं प्रवृत्तिः दृश्यते वैदिकप्रायश्चित्तादौ प्रवृत्तेः दर्शनाच्च दुःखसाधनध्वंसः पुरुषार्थः इति दुःखप्रागभावसहवृत्तिदुःखसाधनध्वंस एव मोक्षः। न च उदाहृतस्थले अनेन दुःखं मा भूदिति कामनया प्रवृत्तेः दुःखानुत्पाद एव फलमिति वाच्यम्। तस्य अनादित्त्वेन अजन्यत्त्वात्, अफलत्त्वात्। न च तस्य अनादित्त्वेऽपि पापे सति अग्रिमक्षणसम्बन्धो न भवति। पापे च असति अग्रिमक्षणसम्बन्धो भवतीति स्थितस्य अग्रिमक्षणसम्बन्धरूपपालनं जन्यम् अतः प्रागभावपरिपालनजन्यतया प्रागभावो जन्य एवेति वाच्यम्। भावाभावसम्बन्धस्य स्वरूपद्वयानतिरेकेण प्रागभावकालयोः अजन्यत्त्वात् लक्षणताघटकस्योपाधेः जन्यत्त्वेऽपि प्रायश्चित्ताजन्यत्त्वात्, प्रायश्चित्तस्य निष्फलत्त्वप्रसङ्गादिति न दुःखसाधनध्वंसस्य स्वतः पुरुषार्थत्वात्। न चैवं प्रायश्चित्तमफलं प्रागभावेनैव सफलत्त्वात्। न च अजन्यत्त्वात् कथमेवं, यथा कृतौ सत्याम् अग्रिमक्षणे घटसत्त्वं तदसत्त्वे तदसत्त्वमतः कृतिजन्ये यदभावः तत्कारणमिति कारणलक्षणयोगात् प्रागभावोऽपि जन्य एव। न च घटे असत्त्वं सत्त्वं च वर्तते इति।

([1]भवतु जन्यप्रागभावे एतदभावात् कथमेवं स्यादिति वाच्यम्,..............योगक्षेमसाधारणं घटे योगो सतः स प्रागभावे क्षेमः, स्वत एव अग्रेऽपि सत्त्वात्। अथ कृतप्रायश्चित्ते पुरुषे यदि दुःखप्रागभावोऽस्ति तदा अवश्यं दुःखं यदि..............देव कार्याभावः इत्युभयथापि प्रायश्चित्तमफलमिति । न प्रागभावे सत्यपि तेन प्रागभावेन तदानीमेव यद्दुःखमुत्पादनीयं तत्प्रायश्चित्ते दीर्णशापरूपकारणनाशात् तदा ....खं नोत्पद्यत इति तदानीम् अनुत्पाद एव फलम्। अत एव स प्रागभावः देशान्तरमासाद्य कालान्तरे दुःखमुत्पादयिष्यत्येव इति नियमात् प्रायश्चित्तमफलमिति निरस्तम्। "क्षणं जीवितुमिच्छामि" इति न्यायेन तावत्काले दुःखप्रागभासत्त्वस्यैव फलत्वात्।

इदं च अवधातव्यं, कृतगोवधः कृतप्रायश्चित्तो यदि काश्यां मृतः ततो गोवधान्तरं कृत्वा गोवधजन्यदुःखमनुभूयैव अपवृज्यते अन्यथा प्रागभावसत्त्वेन अनिर्लोकापत्तिः निर्मोक्षा। न च तादृशे पुरुषे प्रागभाव एव नास्ति, तथा सति गोवधस्य दुःखजनकत्वबोधकवेदाप्रामाण्यं स्यात्। ननु वेदेनापि दुःखजनकत्त्वमात्रं बोध्यं, नतु प्रागभावसहकारित्त्वं तस्य उररीक्रियते। तथा च यत्र प्रागभावादि सहकारिलाभः तत्र अवश्यं दुःखम् इत्येवं वेदस्य तात्पर्यं कल्प्यमिति चेन्न। एवं सति बहुवित्तप्रयाससाध्ये यागादौ क्वापि प्रवृत्तिर्न स्यात् इति।

प्राभाकरास्तु – आत्यन्तिकदुःखप्रागभावो मोक्षः आत्यन्तिकत्त्वं च प्रागभावे प्रतियोग्यजनकत्त्वम् इत्याहुः। तन्न। एवं विधप्रागभावस्य अदृष्टचरत्त्वात् तस्य अत्यन्ताभावत्त्वापत्तेश्च इति। "नित्यं

---

1. ग – 'भवतु' इत्यारभ्य 'ज्ञानद्वारा परम्पराकारणत्त्वेनैव उपयोगात्' पर्यन्तभागः नास्ति।

विज्ञानमानन्दं ब्रह्म" इति श्रुत्यनुरोधात् नित्यनिरतिशय सुखाभिव्यक्तिः मुक्तिरिति केचित् वदन्ति, तदपि न। यतः उत्पत्तिनाशवतो ज्ञानसुखयोः अहं ज्ञानी अहं दुःखी इति आत्मभिन्नत्वेन अनुभूयमानयोः ब्रह्माभेदबोधने प्रत्यक्षात्मविशेषगुणत्वेन अनित्ये सुखे नित्यताबोधने श्रुतेः प्रत्यक्षादिबाधात् अन्यत्र तात्पर्यम्। किञ्च नित्येतिविशेषणं सुखस्याभिव्यक्तेः अभयथापि मुक्तसंसारिणोः अविशेषापत्तिः। मुक्तिकाले अभिव्यक्तकारणशरीराभावेन सुखमात्रान्वयेऽपि न विस्तरः (?)। तस्मात् मत्वर्थीयप्रत्ययेन ज्ञानवत्त्वमानदवत्त्वं च ब्रह्मणो बोध्यते, नाभेदः; अन्यथा नित्यपुल्लिङ्गस्य आनन्दशब्दस्य नपुंसकलिङ्गत्वापत्तिः। न च – "व्यत्ययो बहुलम्" इति सूत्रात्, छान्दसत्त्वात् वा लिङ्गव्यत्ययः, सुखे नित्यत्वसाधकप्रमाणाभावेन व्यत्यये प्रमाणाभावात्। ननु सुखत्वं नित्यवृत्तिगुणत्वसाक्षाद्व्याप्यजाति विशेषगुणवृत्ति जातित्वात् रूपत्ववत् शब्दस्य पक्षसमत्वात् न तत्र व्यभिचारः इत्यनुमानमेव मानम् इति चेन्न। दुःखत्वेन अनैकन्तिकात् अप्रयोजकत्वात् सुषुप्तावपि तत्प्रत्ययप्रसङ्गाच्चेति। अत एव ब्रह्माद्वैत साक्षात्कारात् अविद्यानिवृत्तौ विज्ञानसुखात्मकः, केवलमात्मैक्ये अपवर्गपरत्वमिति मतम् अपास्तम्। एतादृशब्रह्मणोऽपवर्ग इव इदानीं व्यक्तेः मुक्तसंसारिणोः अविशेषापत्तेः। पुरुषप्रयत्नसाध्यत्वेन तस्य अपुरुषार्थत्वापत्तेश्च। न च अविद्यानिवृत्तिः प्रयत्नसाध्या तन्निवृत्तेः अपुरुषार्थत्वादिति !

सौगतास्तु – सुखदुःखवत्त्वेनात्मनः संसारः। तथा च आत्महननमेव मोक्ष इत्याहुः। तन्न। आत्मनः नित्यत्वसाधनेन तन्निवृत्तेः अशक्यत्वात् अपुरुषार्थत्वाच्च। ननु जगन्नाथमुखदर्शन तुला...... दिकानां मोक्षफलकत्वं, तत्वज्ञाननिरपेक्षत्वेन श्रूयते–

"[1]न्यायार्जितधनस्तत्वज्ञाननिष्ठोऽतिथिप्रियः।

1. 'न्यायनगतथनः' इति पाठः।

श्राद्धकृत् सत्यवादीच गृहस्थोऽपि विमुच्यते"।।

इत्यादेः...............मोक्षकारणत्वम्। तथा च कथं तत्त्वज्ञानं कारणं व्यभिचारात्। न च वैजात्यकल्पना, अन्यथा योगादेरपि (यागादेरपि) स्वर्गकारणता न स्यादिति वाच्यम्। स्वर्गस्य भावरूपत्वात्। तथात्वेऽपि अपवर्गे तु अभा..............त्व ज्ञानद्वारा परम्पराकारणत्वेन उपयोगात्।) न च गुणनाशे समवाय्यसमवायिनाशविरोधिगुणानां वैजात्याभावेऽपि तत्तदुपाध्यवच्छिन्नकार्यनाशे यथाकारणत्वं तथा प्रकृतेऽपि किं न स्यादिति वाच्यम्। दृढभूमिवासनामिथ्याज्ञाननाशं विना न मोक्ष इति सर्वैरङ्गीकर्तव्यं मिथ्याज्ञानं नान्यस्मात् नश्यति अतो विशेषदर्शनत्वेन तत्त्वज्ञानस्यैव कारणत्वम्। इदमत्र ज्ञातव्यम्। तच्च तत्त्वज्ञानं मनने श्रुत्या वा जनितम्। न मिथ्याज्ञानम् उन्मूलयितुं समर्थम्। अतः आत्मसाक्षात्कार एव तज्जनकः, अत एव साक्षात्कारविशेषदर्शनाभावात् सूर्योदयेन प्राचीम् अनुमाय अपि स्वयं मुह्यति। अत एव साक्षात्कारविशेषदर्शनमेव विरोधि इति सुप्रसिद्धम्। तस्मात् आत्मसाक्षात्कारकारणत्वेनोपयोगात् जगन्नाथमुखावलोकनादेः योग इति न यथाश्रुतपुराणानुरोधेन साक्षान्मोक्षकारणत्वम्। अन्यथा–

"तमेव विदित्वाऽतिमृत्युमेति।
नान्यः पन्था विद्यतेऽयनाय"

इति श्रुतिविरोधोऽपि स्यात्। अत एव काश्यां मृतानां यस्तारकोपदेशः तस्मात् शाब्दज्ञानं तदनन्तरम् आत्मसाक्षात्कारः तदनन्तरम् अतत्त्वज्ञाननिवृत्तिः ।। श्री नृसिंहः ।। ततो मोक्ष इति। यद्वा–"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुत्यनुरोध एव तारकोपदेश एव श्रुतिः ततः श्रौतज्ञानानन्तरं मननं तदनन्तरं निदिध्यासनं तदनन्तरम् आत्मसाक्षात्कारः ततः तत्त्वज्ञानं ततो मोक्ष इति वयमालोचयामः।

ननु तत्त्वज्ञानं धर्मजनकं विहितत्वात्, योग (याग) वत्। अतः तत्त्वज्ञानस्य धर्मजनकत्वं कथं न स्यादिति चेन्न। मिथ्याज्ञानध्वंसरूपादृष्टद्वारेणैव उपपत्तौ अदृष्टकल्पनानवकाशात्। "पुष्टिकामो घृतं पिबेत्" इत्यादौ विहितस्यापि दृष्टद्वारकल्पने तत्तन्मिथ्याज्ञानध्वंसत्वेन व्यापारत्वं तत्त्वज्ञानेन च व्यपारित्वम्। ननु कथमेतन्मिथ्याज्ञानस्य यत्किञ्चिद्विरोधिगुणादेव नाशसम्भवात्। अन्यथा इदानीं जातोऽपि भ्रमो न विरोधिगुणात् नश्येत्। तथाच मिथ्याज्ञानं यत्किञ्चिद्विरोधिगुणनाश्यं ज्ञानत्वात् संमतवत्। विपक्षे बाधकं च अत्रेदानीं जातस्य गोरूपमित्यादिभ्रमस्य तत्त्वज्ञानपर्यन्तम् उपस्थितिप्रसङ्ग एवेति चेन्न। समानाधिकरणमिथ्याज्ञानध्वंसस्य तत्त्वज्ञानैकसाध्यत्वात्।

वेदान्तिनश्चात्र वदन्ति तत्त्वज्ञाने जाते अग्रिमक्षण एव एतादृश व्यापारोपपत्तौ अपेक्षणीयान्तराभावात अपवर्ग एव। न च

"नाभुक्तं क्षीयते कर्म
कल्पकोटिशतैरपि" इति

बाधकात् पूर्वोपार्जिताजनितभोगानां कर्मणां सत्वात् कथमेवं स्यादिति वाच्यम्।

"ज्ञानाग्निः सर्वकर्माणि
भस्मसात् कुरुतेऽर्जुन।।

इति वचनबलात् तेषां तत्त्वज्ञानादेव नाश इति कल्प्यते।

ननु एवं सति 'नाभुक्तम्' इति स्मृतेः किमुत्तरं कर्मनाशात्परस्त्रीगमनस्य प्रायश्चित्तादेः विधिना कर्मनाशजनकत्वबोधनेन तस्या अवश्यं सङ्कोचे प्राप्ते तत्कर्मभिन्नकर्मणो भोगात् नाश इति उक्तगौरवभयेन विधिबोधितनाशकानाश्यकर्मपरमिति कल्प्यते। तथा च ज्ञानाग्निरिति विधिना ज्ञानस्यापि नाशकत्वबोधनात्,

नाशककर्मभिन्न कर्मपरेत्यपि कल्प्यते इत्येवोत्तरं गृहाण। न च प्रायश्चित्तस्य कर्मान्तराधिकार एव फलम्। महापापातिरिक्तपापिनः अनधिकाराभावात्, अन्यथा यत्किञ्चिदपि पापे जाते अकृतप्रायश्चित्तस्य कुत्रापि अधिकारो न स्यादेव। अन्तिके तदभावाच्च। एतेन यथाग्नेः परम्परया भस्मजनकत्वं तथा ज्ञानस्यापि परम्परया भस्मजनकत्वमित्यर्थो वा, अथवा भस्मसात्करोति – फलाजनकानि करोति इत्यर्थे फललक्षणतया क्रियते इति परास्तम्। मुख्ये बाधकाभावात्। तस्मात्–

"भिद्यते हृदयग्रन्थिः,
भिद्यते करबन्धनम्।
क्षीयते वास्य कर्माणि,
यस्मिन् दृष्टे परावरे"॥

इत्यादिबलात् अफलान्येव कर्माणि तत्त्वज्ञानात् नश्यन्तीति।

अत्र वदन्ति – कर्मणां भोगनाश्यत्वेऽपि ज्ञानस्य कार्यजनकत्वं सम्भवति तथाच उभयस्मृत्यविरोधे सम्भवति कथमेतद्विषयेऽपि सङ्कोचः कार्यः। यच्चोक्तं लाघवेन विधिबोधितनाशकानाश्यकर्मपरमेव कर्मपदमिति। तन्न। प्रायश्चित्तादिविधिना सह सर्वदैव विरोधस्य परिहर्तुमशक्यत्वेन तत् कथम् अभिन्नकर्ममात्रपरतैवेति नाभुक्तमिति, कर्मपदस्येति गौरवस्य प्रामाणिकत्वात्। तथा च यथाग्नेः परम्परया भस्मजनकत्वं तथा परम्परया भस्म जनकत्वमेव भस्मपदेन लक्षणया उच्यत इति स्मृत्यविरोधि……… ……………गोऽपि श्रेयान्।

वयं तु ब्रूमः – भस्मपदं नाशे शक्तम्। तथा च यथा भस्मपदेन नाशः उपलक्ष्यते तथा प्रयोजकत्वमेव लक्ष्यतां विशेषाभावादिति। ननु केवलस्य भोगस्य अन्यत्रैव कर्मनाशत्वे दर्शनात् तत्त्व-

ज्ञाननिरपेक्षात्, तत एव कर्मनाशोऽस्तु इति चेन्न। कर्मप्रागभावासहकृतकर्मनाशे तत्त्वज्ञानापेक्षणात्। मुक्तौ प्रमाणं तु- "आत्मा वारे दृष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात् कर्तव्यश्चे"ति श्रुतेः एकवाक्यताम् आपन्ना। 'दुःखैनात्यन्तविमुक्तश्चरति, आत्मा ज्ञातव्यो, न च सः पुनरावर्तते आत्मा ज्ञानवान् न पुनः संसारी भवतीत्यादिश्रुतयः। देवदत्तदुःखत्वं सर्वमुक्तिसाधने दुःखत्वं वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्तिकार्यमात्रवृत्तिभावीयधर्मत्वात् एतन्प्रदीपत्ववत्। धर्मत्वादियुक्ते ध्वंसत्वे व्यभिचारः स्यात् अत उक्तं भावीयेति। तावत्येव कृते ध्वंसाकाशादिवृत्ति अनन्तत्त्वधर्मे व्यभिचारः स्यादत उक्तं कार्येति। मात्रपदादाने पुनरत्रैव व्यभिचारः स्यात् अतस्तदपीत्यादि अनुमानम् इति संक्षेपः।

ननु एतत्सर्वमनुपपन्नम् एवं विधात्यन्तिकदुःखनिवृत्तौ जायमानायां तुल्यन्यायत्वेन (ज्ञाने) पुरुषार्थत्वादित्यत आह - 'सुखमि'ति। अत्रहेतुमाह - 'दुःखे'ति। अनुषङ्गशब्दार्थमाह - 'अनुषङ्ग' इति। सुखस्य दुःखव्याप्यत्वादिति भावः। तस्मात् दुःखलिप्सवो दुःखनिवृत्तिमात्रार्थिनः एवाधिकारिणः। एतेन दुःखाभावे सति दुःखं नास्तीति ज्ञानं प्रवृत्तिप्रतिबन्धकमिति परास्तम्। नहि कश्चित् दुःखाभावे सति दुःखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवर्तते तथा एवंरीत्या अस्यापि सुवचत्वादिति वक्तुं सुखं दुःखम् इति वदतः तव विरोधो न, कथमित्यत आह - 'न चे'ति। अत्र दृष्टान्तमाह - 'मधुनी'ति। एतावता प्रबन्धेनोक्तां मुक्तिं प्रति शास्त्रस्य प्रयोजकतां कथयन् तत्प्राप्तिप्रकारम् आक्षेपपूर्वकमाह - 'सपुनरि'ति। विषयः स्रक्चन्दनादिदोषा दुःखेन अनुषङ्गः विरक्तस्य जिहासोः कदर्थात् द्वेषताभिभावः (?) एतादृशोऽपि यदि पुनस्सुखलिप्सुः तर्हि न तस्य मोक्षाधिकार इत्यत आह - 'मुमुक्षोः' इति। केवलं दुःखा

भावमात्रार्थिनः इत्यर्थः। ध्यायिनः श्रवणादिक्रमेण निदिध्यासन-युक्तस्य ध्यानपरिपाकवशात् पुनः पुनः निदिध्यासनाभ्यासवशात् साक्षात्कृतात्मनः गोरूपमित्यादिभ्रमनिवर्तकात्मसाक्षात्कारयुक्तस्य एतावता जीवन्मुक्ततापरयोगिता च उक्ता। तथा च एवंविधस्य योगिनः यः अपूर्वशरीराद्येकविंशतिदुःखसम्बन्धः न भवतीति अग्र-तनेन सम्बन्धः।

ननु एतादृशोऽपि यदि विहितं निषिद्धं वा कर्म कुर्यात् तदा अनागतधर्मार्जने सति कथं न दुःखसम्बन्धः इत्यत आह – निष्काम-कर्मानुष्ठानात्' – इत्यादि विहिते निषिद्धे वा कर्मणि कृतेऽपि पूर्व-जात्यतिरिक्तधर्माधर्माभावादित्यर्थः।

ननु मा भूदपूर्वार्जनं पूर्वोपार्जितानाम् अदृष्टानां कथं नाश इत्यत आह – 'पूर्वे'ति। पूर्वोपार्जितधर्मादिसमूहं तु ज्ञानस्य भावे न क्षयं कुर्वत इत्यर्थः।

ननु अतीन्द्रियस्यादृष्टस्य नाशः कथमेतत्प्रयत्नसाध्य इत्यत आह– 'योगप्रभावादि'ति। ननु एकैककर्मभोगनाशपर्यन्तंकथं तत्त्वज्ञानं तिष्ठेदित्यतआह – 'समाहृत्ये'ति। कायव्यूहं कृत्वेत्यर्थः। पर्यवसन्न-मर्थमाह 'पूर्वे'ति। अनागतधर्मस्याभावात् अनागतशरीराद्यभाव इ-त्यत्र हेतुमाह – 'कारणे'ति। उपसंहरति – 'सेयमि'ति। पर्यायान्तर-माह – 'सोऽपवर्ग' इति। श्री नृसिंहार्पणमस्तु।।

इति श्री गोविन्ददीक्षिततनुज – महामहोपाध्याय श्री गणे-श्वरदीक्षितकृतायां तर्कभाषाटीकायां तत्त्वप्रबोधिन्यां प्रमेयपरि-च्छेदः समाप्तः।

।। श्रीलक्ष्मीनृसिंहार्पणमस्तु ।

।। श्रीरस्तु ।। मङ्गलम् ।।

परिशिष्टम्

सहायकग्रन्थसूची

ग्रन्थनाम	प्रकाशनम्
१. अवच्छेदकत्वनिरुक्तिः	भारतीय विद्या प्रकाशन वाराणसी – 1968
२. अन्वीक्षानयतत्वबोधः	राष्ट्रियसंस्कृतसंस्थानम् दिल्ली - 1979
३. कारिकावली	चौखम्बा, वारणासी – 1982
४. खण्डनखण्डखाद्यम्	षड्दर्शनप्रकाशनप्रतिष्ठानम् वारणासी – 1979
५. तत्त्वचिन्तामणिः	केन्द्रीय संस्कृत विद्यापीठम् तिरुपति – 1973
६. तर्कसंग्रहः	मेहरचन्द लक्ष्मणदास दिल्ली
७. तर्कभाषा	चौखम्बा, वारणासी
८. तर्कभाषा	मोतीलाल बनारसीदास – 1976
९. तर्कभाषा	साहित्य भण्डार मेरठ – 1981
१०. नव्यन्यायभाषाप्रदीपः	कालिकाता संस्कृत महामिद्यालय गवेषण ग्रन्थमाला – 1973
११. न्यायमञ्जरी	चौखम्बा, वारणासी – 1971
१२. न्यायतात्पर्यदीपिका	गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, इलहाबाद - 1979
१३. न्यायकुसुमाञ्जलिः	केन्द्रीय संस्कृत विद्यापीठम् तिरुपतिः – 1980
१४. न्याय-मीमासादर्शनयोः प्रमाणविचारः	पद्मश्री पब्लिकेशन्स् तिरुपति–1983
१५. न्यायदर्शनम्	चौखम्बा, वाराणसी – 1983
१६. न्यायावलिः	नाग पब्लिशर्स, दिल्ली – 1980

१७. न्यायचन्द्रिका	केरल विश्वविद्यालयः – 1958
१८. न्यायदर्शनबिन्दुः	वाराणसीय संस्कृत विश्वविद्यालयः
१९. न्यायलीलावती	
२०. न्यायकोशः	B. O. R. I. Poona
२१. न्यायकौस्तुभः	सरस्वतीभवनग्रन्थमाला – 1967
२२. न्यायमञ्जरी	O. R. I. Mysore – 1969
२३. न्यायरत्नम्	G. O. M. LIBRARY MADRAS – 1953
२४. न्यायसिद्धान्ततत्त्वामृतम्	MADRAS GOVT ORIENTAL SERIES – 1950
२५. न्यायभूषणम्	षड्दर्शन प्रकाशन प्रतिष्ठानम् वाराणसी – 1968
२६. षड्दर्शनसमुच्चयः	चौखम्बा, वाराणसी – 1979
२७. षड्दर्शनम्	आर्य साहित्यभवन दिल्ली – 1979
२८. ब्रह्मसूत्रशांकरभाष्यम्	चौखम्बा – 1982
२९. वैशेषिकसूत्रोपस्कारः	काशी संस्कृतग्रन्थमाला – 1969
३०. प्रशस्तपादभाष्यम्	चौखम्बा – 1969
३१. प्रशस्तपादभाष्यम्	INDIAN BOOK CENTRE DFLHI – 1984
३२. सांख्य तत्त्व कौमुदी	मोतीलाल बनारसीदास – 1976
३३. UPAMANA IN INDIAN PHILOSOPHY	E. B. LINKERS DELHI – 1980
३४. भारतीय दर्शन में अनुमान	मध्यप्रदेश हिन्दी ग्रन्थ अकादमी-1973
३५. सर्वदर्शनसंग्रहः	आनन्दाश्रमसंस्कृत ग्रन्थमाला – 1977
३६. षड्दर्शनसूत्रसंग्रहः	सुधी प्रकाशन वाराणसी – 1984
३७. भारतीयदर्शन	चौखम्बा – 1984
३८. भारतीय दर्शन की रूपरेखा	राजकमल प्रकाशन दिल्ली – 1980
३९. भारतीय दर्शन	राजपाल एण्ड सन्स् दिल्ली – 1973
४०. मनुस्मृतिः	चौखम्बा – 1982